


निर्माय वास्तुभवनं कुशलः प्रदीपं प्रज्ज्वाल्य संस्कृतिपरो गृहमण्डनानि।

काव्यादिकानि कमनीयतराणि विद्वान् नम्यो वराहमिहिरस्तमहं नमामि ।।

# प्रथमं सोपानम्

# प्राक्कथनम्

बृहत्संहितायाः कर्ता आचार्यवराहमिहिरः विदुषां सुविदितः। संहिताग्रन्थेषु बृहत्संहितायाः स्थानं शिखरायमाणं वर्तते। अयं ग्रन्थः ज्यौतिषशास्त्रस्य तथा वास्तुशास्त्रस्य सङ्गमतीर्थभूतः विद्वद्वृन्देषु जागर्तितराम्। आछात्रकालात् मया नैकधा तीर्थभूते ग्रन्थेऽस्मिन् निमज्जनोन्मज्जनम् अकारि, फलतः ज्ञानरत्नानि अलाभि च । अतः ज्यौतिषवास्तुशास्त्रयोः आचार्यपदवीप्राप्त्यनन्तरम् अहं तथा च पदवी प्राप्तेः अनन्तरम् उभयशास्त्रोपकारिणं ग्रन्थम् अमुं मम वाचस्पति (Ph.D.) पदवीप्राप्तये संशोधनस्य विषयत्वेन स्व्यकार्षम्।

अन्तरिक्षस्य अध्ययने बहूनि गूढाणि तत्त्वानि आविर्भववन्ति। अच्युतानन्द झा महोदय संपादित बृहत्सहिताग्रन्थस्य प्रस्तावनायां प्रो. रामचन्द्र पाण्डेयमहोदयः उद्धरति–पेट्रिक मूरे महोदयः स्वग्रन्थे (Guide to the Moon) लिखति-

'The moon is shining down from a slightly misty sky with a lovely shimmering blueness like an electric glimmers, utterly unlike anything I have never seen before'

अतः एतादृशैः अध्ययनबिन्दुभिः सोत्साहं सम्प्रेरिताऽहं संशोधनकर्मणि। अस्य सारांशिका (Synopsis ) अग्रे संयोजिता वर्तते।

भारतीय संस्कृतिः, भारतीयपरंपरा, भारतीयविचारधारा च मह्यम् आबाल्यात् रोचते। एभिः सर्वैः संस्कृतभाषा गाढतया निबद्धा वर्तते।

अतः संस्कृते मम अभिरुचिः, तदनु अभिनिवेशश्च प्रतिदिनम् अवर्धत। अतः B.A पदवी-ग्रहणानन्तरं मया वटोदरसंस्कृतमहाविद्यालये मम अभिरुचिं पूरपितुं प्रवेशः कृतः। क्रमशः अध्ययनं कुर्वाणा अहं ज्यौतिषशास्त्रम् वास्तुशास्त्रम् चादाय विशेषयोग्यतायाम् आचार्यपरीक्षाम् उत्तीर्णा अभवम्।

एवम् अध्ययनस्य पूर्तिः अजायत। अतः तस्य परमोत्कर्षं साधयितुं संशोधनकार्यं प्रति उत्सुका जाता, तत्रापि क्रमशः विश्वविद्यालयतः (Arts College) M.Phil पदवी (तत्त्वाचार्य) समासादिता। पश्चात् Ph.D अंगभूतं संशोधनकार्यं कर्तुम् मम मनसि प्रबलेच्छा जागरिता अभवत्।

आचार्यवराहमिहिरस्य नाम को न जानाति ? मम नितान्तम् आदरः अस्मिन् दैवज्ञे दार्शनिके वर्तते। अतः तेन विरचितस्य बृहत्संहिताख्यग्रंथस्य विशिष्टम् अध्ययनम् कर्तुं मया विचारितम्। पश्चात् मम मार्गदर्शकरूपेण वटोदर-संस्कृत महाविद्यालयस्य भूतपूर्वः प्रधानाचार्यः डॉ. हरिप्रसाद-पाण्डेयमहोदयः सुनिष्चितीकृतः। तेन गुरुणा सह विस्तरपूर्वकं चर्चाविचारणानन्तरम् उपरिनिर्दिष्टः बृहत्संहिताविषयः मया संशोधनरूपेण स्वीकृतः।

भारतीयज्यौतिषशास्त्रस्य तथा वास्तुशास्त्रस्य स्वरुपं परम्परां च अनुसृत्य गुरुशिष्य-परिपाट्या संहितानाम्अध्ययनं मया आरब्धम्। तत्र पुनः विधानं वर्तते "स्वाध्यायः अध्येतव्यः"। अस्य अर्थः न केवलं संहितागतमंत्राणां मुखेन पाठः एव करणीय :, अपि तु मन्त्राणां अर्थबोधः अपि कर्तव्यः। अर्थबोधः सरलतया भवेत् इति शिक्षा, कल्पः, व्याकरणं, निरुक्तं, ज्यौतिषं, तथा छंदः इति वेदस्य षड् अंगानि सन्ति। तत्र वेदप्रतिपादित— यज्ञ-यागादि -प्रारम्भार्थं, मध्ये विश्रामार्थं तथा च दिनान्ते तस्य पूर्ति – अर्थं समयस्य ज्ञानम् अपेक्षितम् आसीत्। सूर्यचन्द्रयोः संम्बंधि एतद् अत्र वैदिक- ज्यौतिषं इति नाम्ना प्रसिद्धिं गतम्। साम्प्रतकाले वर्तमानं ज्यौतिषं वैदिकज्यौतिषात् सर्वथा भिन्नम् अस्ति।

**पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।**

**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।। १।।          याज्ञ. स्मृ.१३**

तानि परिगण्यन्ते यथा-ऋग्वेदः,यजुर्वेदः, सामवेदः, अर्थववेदः- इति चत्वारो वेदाः, वेदाक्रांति ।

**आर्युवेदो धनुर्वेदो गान्धर्वश्चेतिते त्रयः।**

**अर्थशास्त्रं चतुर्य तुं विद्या ह्रष्टदशैवतः।। विष्णुपुराण-३.६ २५.२६**

चत्वारः वेदाः। षड् अङ्गानि। अष्टादश पुराणानि उपपुराणानि च।

न्यायशास्त्रं, मीमांसाशास्त्रं तथा धर्मशास्त्रं, पुराणानि इति मिलित्वा-च चतुर्दश विद्याः भवन्ति। आजीविकार्थं उपवेदानां निर्मितिः जाता, यथा आयुर्वेदः धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रं च इति मिलित्वा १८अष्टादश विद्याः भवन्ति। वेदमहत्त्वम् अनया रीत्या वेदेषुसंहिताग्रंथेषु षट्सु अंगेषु तथा च चतुर्दश-१४ विद्यासु अथ च १८ अष्टादश विद्यासु ज्यौतिषशास्त्रस्य समावेशः कृतः अस्ति। एतेन-अस्य प्राचीनज्यौतिषशास्त्रस्य मूल्यं कियत् अस्ति इति कथनस्य आवश्यकता नास्ति। पाणिनीयशिक्षायां निरूपितं यत् वेदपुरुषस्य नेत्र-स्थाने ज्यौतिषं वर्तते।

अनेन वेदपुरुषस्य नेत्रस्थानीयेन ज्यौतिषशास्त्रेण विना पदार्थस्य दर्शनं न शक्यं भवति इति अतिस्पष्टं भवति।

यद्यपि ज्योतिःशब्देन सूर्यचन्द्रताराग्रहादीनां बाोधः भवति तथापि प्रमुखतया ज्यौतिषशब्देन अत्र सूर्यस्य बोधः विशेषतया भवति। अतः ज्यौतिषं अर्थात् सूर्यस्य शास्त्रं इदं भवति। ज्योतिषां प्रभावेण मानवानां, प्राणिनां, पशूनां , खगानां, वनस्पतीनां समुद्रादि, जलराशीनाम् उपरि प्रभावः प्रसरति। एतेषां ज्योतिषां विशिष्टभ्रमणेन एव तिथयः, दिवसाः पक्षौ मासाः, अयनम् ऋतवः इत्यादि सर्वं संभवति। एतेषां सर्वेषां शास्त्रीयम् अध्ययनं ज्यौतिषशास्त्रे कृतं लभ्यते। एवं ज्यौतिषशास्त्रेण कालस्य विशिष्टः बोधः भवति। येन कालस्य नियंत्रणं नियमनं शक्यं भवति। प्राचीनकाले विविधयज्ञानां कालनिर्धारणविषये चिन्तनशैल्या ऋषिभिः ज्यौतिषशास्त्रस्य उपयोगः प्रारब्धः। एवं इदं यज्ञविषये प्रारंभ-विराम-समाप्ति-समयनियामकं एतत् शास्त्रं निर्मितम्।

व्यवहारेऽपि इष्टपदार्थग्रहणं तथा– अनिष्टपदार्थत्यागः नेत्रदर्शनेन एव समीक्ष्यते। इयं व्यवहारस्य रीतिः वैदिकयज्ञ-अंगे स्वीकृता। ज्यौतिषशास्त्रे यवनाचार्याणां योगदानं महत्त्वपूर्णम् अस्ति। बृहत्संहितायाम् आचार्य वराहमिहिरेस्य यवनाचार्याणां भूरि प्रशंसा कृता दृश्यते, यथा–

**म्लेच्छा हि यवनास्तेषु सम्यक्शास्त्रमिदं स्थितम्।**
**ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद्विजः।। १ ।।**

अर्थात् यवनाचार्यैः ज्यौतिषशास्त्रं साधु प्रतिपादितम्, अतः ते ऋषितुल्याः वंदनीयाः सन्ति तत्र यदि विद्यासंम्पनाः ब्राह्मणाः दैवज्ञाः भवन्ति तर्हि ते अतिशयानाः भवन्ति।

ये अष्टादश (१८) प्रसिद्धाः ज्यौतिषस्य पूर्वतः आचार्याः वर्तन्ते, तेषु यवनाचार्यस्य आदि गणना भवति। यवनेभ्यः ताजिकशास्त्रं अधीत्य नीलकण्ठाचार्यः नीलकण्ठीनामकं ग्रन्थ-रत्नं विरचयांबभूव। अस्मिन् ग्रन्थे एकलाव्याः यवन शब्दाः अपि प्रयुक्ताः वर्तन्ते। ग्रन्थकारेण तान् यवनशब्दान् परिवर्त्य तेषां स्थाने समानार्थकाः संस्कृतशब्दाः न लिखिताः। तेन सिध्यति प्राचीनाः चिन्तकाः गुणग्राहकाः आसन्।

फलितज्यौतिषस्य प्रधानम् अंगं संहिता विभागः अस्ति।

अस्मिन् विभागे ग्रहचारादिकं वर्णनं, वायसविरुतं, काकवाणी, मृगचेष्टितं, श्वानचेष्टितं, गवेंगितम्, अश्वेंगितम्, हस्ति-चेष्टितम् निरुपितं वर्तते। अतः फलित-ज्यौतिषस्य एतत् प्रधानं अङ्गं वर्तते।

**बृहत्संहिताग्रन्थः ज्यौतिषशास्त्रविषये विश्वकोषतुल्यः वर्तते।**

अत्र ज्यौतिषशास्त्रस्य विषयाः सूक्ष्मतया केवलंन वर्णिताः, अपितु वास्तुशास्त्रस्य यथायोग्यं निरुपणं ग्रन्थकारेण कृतम्। सर्वेषु संहिताग्रन्थेषु बृहत्संहिता शिरोरत्नायते, इति न शंकालेशः अस्ति। ग्रन्थकारस्य आर्हन्ती दृश्यते अस्मिन् ग्रन्थे। ताम् आर्हन्तीं विशिष्टतया विश्लेषयितुकामा अहं बृहत्संहितां मम संशोधनस्य कार्यवर्तुलस्य केन्द्रबिन्दुं मानयामि। तथा हि ग्रन्थकारेण स्वग्रन्थे पंचसिद्धान्तिका विशदतया विवृता यथा पौलिष-रोमक- वासिष्ठ सौर- पैतामहाः एते सिद्धान्ताः। बृहत्संहिताशब्दे वर्तमानस्य "बृहत् " शब्दस्य विवेचनं टीकाकृता भट्टोत्पलेन बृहज्जातके इत्थं कृतम्। बहुशः बहुशः इति। अर्थात् केवलं आकारेण बृहत्त्वं न किन्तु विषयवैविध्यं बहु अपि अत्र वर्णितम् अस्ति।

सर्वेऽपि जनाः स्वेषु स्वेषु गृहेषु निवसन्ति। गृहव्यवस्था-सम्बन्धिनः सर्वे विचाराः वास्तुशास्त्रे कृताः वर्तन्ते। यथा गृहनिर्माणात्प्राक् भूमिपरीक्षा भूमिशुभाशुभ-निर्णयः खातमुर्हूतादयः
इति प्राथमिकविषयाः तथा च गृहनिर्माणस्य विविधाः विषयाः अत्र वास्तुशास्त्र- विषयकाः सन्ति। भगवतः शंकरस्य प्रस्वेदात् जातः वास्तुपुरुषः एव वास्तुदेवता-रुपेण पूज्यते।

एतस्मिन् शोधप्रबंधे मया ज्यौतिष शास्त्रेण सह वास्तुशास्त्रस्यापि अल्पः समावेशः कृतः वर्तते। पंडितेषु, छात्रेषु, सामान्यवाचकेषु बृहत्संहितायाः स्थानं अजरंअक्षरं च वर्तते। अस्मिन-शोधप्रबंधे विषयनिरुपणस्य क्रमः तस्य विकासश्च वैज्ञानिक-रीत्या, मया प्रस्तुतीकृतः। शोधप्रबंधस्य शैली यद्यपि प्रवाहपूर्वा वर्तते। अनेकेषां विदुषां सहयोगेन, मार्गदर्शनेन च मया कृतं परिश्रमपूर्णं मम शोधकार्यम् अध्येतृणाम् कृते उपकारि भविष्यति। अस्य क्रमशः अध्ययनेनैव तत्तु शक्यते।

शोधप्रबंधेऽस्मिन् नव प्रकरणानि सोपानरुपेण निरुपितानि सन्ति। तेषां सोपानानां विवरणं संक्षेपेण प्रस्तूयते।

आदितः सोपानानि ज्यौतिषशास्त्र-विषयकाणि तथा पाश्चात्यानि चत्वारि सोपानानि वास्तुविषयकाणि सन्ति।

मम शोधग्रन्थे आहत्य दशसोपानानि समुपनिबद्धानि। तेषु १ तः ६ सोपानानि ज्यौतिष-शास्त्रविषयकाणि तथा ७ तः ९ सोपानानि वास्तुशास्त्रविषयकाणि सन्ति। चरमं सोपानम् उपसंहारात्मकं वर्तते। तेषां सर्वेषां विवरणं यथाक्रमं निरूपितं वर्तते।

वेद-वेदांग ज्योतिष–वैदिकज्योतिष आधुनिक ज्यौतिष त्रिस्कंध ज्योतिष–संहिता-बृहत्संहिता- वराहमिहिरः।

ग्रन्थकृतः संक्षिप्तः परिचयः। ज्योतिषशास्त्रे यस्य नामाक्षराणि सुवर्णमयानि संन्ति, तस्य ज्योतिर्विदः आचार्यवराह-मिहिरस्य नाम कस्य न परिचितम् ?

संहिताग्रन्थेषु बृहतसंहिताग्रन्थः मुकुटायमानः अस्ति, मगधदेशे ईसवीये ४२७ वर्षे अयं महान्विद्वान् जन्म लेभे। भगवान् सूर्यः तस्य कुलदेवता आसीत्। एक- कथानुसारेण वराहमिहिरः सूर्यात् वरदानं प्राप्तवान्। तस्य पितुः नाम अपि आदित्यदासः इति आसीत्। मिहिर-शब्दस्य अपि अर्थः सूर्यः एव अस्ति। कापिश्यक ग्रामे तस्य निवासः आसीत्। तत्र सूर्यमंदिरं प्रसिद्धम् आसीत्।

टीकाकृत् उत्पलः मन्यते यत् सः मगधदेशीयः आसीत्। "मगम्" अर्थात् सूर्यँ ध्यायंति जनाः अत्र इति मगधशब्दस्य अर्थः अपि सूर्य- सम्बन्धी एवं वर्तते। भविष्यपुराणे एवं वर्तते। "मगं ध्यायन्ति एतस्मात् तेन ते मगधाः स्मृताः।" वराहमिहिर उच्चकोटिकः कविः आसीत्। अस्य अनुभवः बृहत्संहिताग्रन्थे पदे पदे भवति। तस्य शब्द- प्रभुत्वं, छंदसांसामर्थ्यं व्याकरण पाण्डित्यं, इत्यादि विविध शास्त्रसंपन्न ज्ञानं समग्र ग्रन्थे अत्र तत्र दृश्यते।

तस्य अनेके ग्रन्थाः प्रसिद्धाः।

१) पंचसिद्धान्तिका।
२) जातकम्।
३) यक्षेश्वमेध्ययोगाः।
४) योगयात्रा।
५) विवाहपटलम्।
६) बृहत्संहिता।

बृहत्संहितायां जौतिषशास्त्रस्य तथा वास्तुशास्त्रस्य अद्भुतः संगमः दृश्यते। अतः मया अयं विषयः मम विशिष्ट-संशोधन कार्यरूपेण स्वीकृतः।

आचार्य वराहमिहिरस्य विस्तृतः परिचयः पृथक् प्रकरणे मया प्रदतः।


- मम शोधकर्मणि अनेकैः विद्याकुशलैः विद्वद्भिः अमूल्यं मार्गदर्शनं कृतं, साहाय्यं च प्रदत्तम्। ज्यौतिष-वास्तु-सांहित्य-धर्मशास्त्रादिषु शास्त्रेषु कृतभूरिपरिश्रमाः मुखमण्डलोपरि वर्तमान तेजसा ज्ञानवारिधिं पिशुनयन्तः डॉ. हरिप्रसादपाण्डेयगुरुचरणाः यथापूर्वं मम शोधकर्मणि मार्गदर्शकाः। उत्फुल्लसकलरोमा अहं तान्प्रति सप्रणति धन्यवादान् वितरामि.
- प्रा. योगेश ओझा महोदयाः अपि मम गुरवः सन्ति। मम शोधकर्मणि लेखनकार्य-परिमार्जनादिषु तैः स्वयोगदानं प्रदत्तम्। तेषाम् उपकारस्मरणं सप्रश्रयं कुर्वाणा धन्यभाक् भवामि।

- डॉ. रामपलशुक्लमहोदयैः अपि, अनेकशास्त्रनदीष्णैः समये समये अहं प्रेरिता, मार्गदर्शनेन सनाथीकृता। तान् नमस्कृत्य उपकारं स्मरामि।
- डॉ. किशोरवैद्यः, डॉ. मीनापाठकः तथा डॉ. योगेशत्रिवेदी, डॉ. शास्त्रीकपिलदेव अेच., श्री सुरेश पटेल, डॉ.जागृतिजोशी बालाशिनोर ग्रामस्था आदि नैकेषाम् उपकारस्मरणं करोमि।
- कार्यकारिप्रधानाचार्याणां विद्वद्वरण्यानां श्रीमतां रमेश पटेल महोदयानाम् उपकारस्मरणं विना कथम् अग्रे सरेयम्।
- शोधप्रबन्धस्य लेखने टंकने परिभार्जने च यै यैः सहयोगः प्रदत्तः तेषामपि उपकारं स्मरामि। एभिः सर्वैः यत् कार्यं कृतं मम साहाय्यार्थं तेन सन्तोषम् अनुभवति।
- मम जीवनसंगिनः श्री किरीटकुमारस्य तथा "भ्रातरौ रामलक्ष्मणौ इति मूर्तिमन्तौ मम द्वौ पुत्रौ श्रीयुतौ दर्शक-भौमिकौ मम प्रस्तुत शोधकर्मणि कटिबद्धौ आस्ताम्। तयोः स्वकीययोः अपि प्रसन्नतापूर्वकं स्मरणं करोमि ।"

१. सुयुक्ता न मुन्युक्तिरप्यत्र शास्त्रे भवेत् कार्यवर्षस्य या हग्निरुद्धा ।[१]

२. वेदास्तावद्यज्ञकर्मप्रवृता यज्ञा प्रोक्तास्ते तु कालाश्रयेण ।[२]
तस्मादिदं कालविधानशास्त्रं यो ज्योतिष वेद स वेद यज्ञान् ।[३]

३. अप्रत्यक्षाणि शास्त्राणि विवादस्तत्र केवलम् ।[४]
प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ।।

४. दैवविदविहितचितो द्युनिशं यो गर्भलक्षणे भवति ।
तस्य मुनेरिव वाणीन भवति मिथ्याम्बुनिर्देशे ।।[५]

५. वृष्टिमूला कृषिः सर्वा वृष्टिमूलश्च जीवनम् ।
तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरेत् ।।[६]

६. कण्ठे कर्णे च हस्तैच सुवर्णं विद्यते यदि ।
उपवासस्तथापि स्यादन्नाभावेन देहिनाम् ।।[७]
अन्नं हि धान्यसंज्जातं धान्यं कृष्या विना न च ।
तस्मात् सर्वं परित्यज्य कृषिं यजेत कारयेत ।।[८]

---

१. (सि.त.वि.) बृ.सं., प्राक्कथन
२. बृ.सं., प्राक्कथन
३. वे.जो.
४. बृ.सं., प्राक्कथन
५. (बृ.सं., गर्भल-३) बृ.सं., प्राक्कथन
६. (कृ. पा. २.१) , बृ.सं., प्राक्कथन
७. (कृ. पा.१.५) बृ.सं., प्राक्कथन
८. (कृ.पा. १.७) बृ.सं., प्राक्कथन

७. The Moon is shining down from a slightly misty sky with a lovely shimmering blueness like an electric glimmes, utterly unlike anything i have never seen before.[१]

८. विलग्नमध्यो नीलाभो वज्रसंस्थानसंस्थितः ।
मध्यच्छिद्रविलीनाभो भयं करायते महत् ।।
हरितो पीतये विद्यात् पशूनां चाप्युपद्रवम् ।
पीतवर्णो गजान् हन्ति पीतो व्याधिकरस्तथा ।।[२]

९. आदित्यदासतनयस्तदवाप्तबोधः कापित्थके सवितृलब्धवरप्रसादः ।
आवन्तिको मुनिमतान्यवलोक्य सम्यग्होरां वराहमिहिरो रुचिरां चकार ।।[३]
सप्ताश्वि वेदसङ्ख्यम् ।[४]

१०. नवाधिकपञ्चशतङ्ख्यशाके वराहमिहिराचार्यो दिवङ्गतः।।[५]

११. द्रष्टव्य- भारतीय ज्योतिष ।[६]

१२. सुयुक्ता न मुन्युक्तिरप्यत्र शास्त्रे भवेत् कार्यवर्षस्य या हग्निरुद्धा ।[७]

१३. वेदास्तावद्यज्ञकर्मप्रवृता यज्ञा प्रोक्तास्ते तु कालाश्रयेण ।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान् ।।[८]

१४. अप्रत्यक्षाणि शास्त्राणि विवादस्तत्र केवलम् ।
प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ।।[९]

१५. मृगशिरसि सुरभिवस्त्राब्जकुसुभकफलरत्नवनचरविहङ्गाः ।
मृगसोमपीथिगान्धर्वकामुकाः लेखहराश्च।।[१०]

१६. वेदस्यनिमलं चक्षुः ज्योतिषशास्त्रस्यम कल्मषम्।[११]

---

१. बृ.सं. पृ-७
२. (अभ्दुतसागर) बृ.सं.पृ-७
३. (बृ.जा.उप., अ.-९) बृ.स.-पृ-८
४. बृ.सं., प्राक्कथन,पृ-८
५. (भारतीय ज्योतिष) बृ.सं.,प्राक्कथन,पृ-८.
६. (सि. त. वि.) बृ.सं.
७. बृ.सं., प्राक्कथन,पृ-८
८. (वे.ज्यो.) बृ.सं., प्राक्कथन,पृ-९
९. बृ.सं., प्राक्कथन,पृ-९
१०. बृ.सं. १५.३, प्राक्कथन,पृ-१०
११. आचार्य लगधः उचार्यज्यौतिषः कालविधानशास्त्र

अत्र मनुः -

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।

आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ।।[1]

श्लोकवार्त्तिके

श्रेयः साधनता ह्येषा नित्यं वेदात्प्रतीयते ।

ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः।।[2]

अपरं च

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।

एवं विदन्ति वेदेन तस्माद्वेदस्य वेदता।।[3]

अत्र मनुः

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।

स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः।।[4]

भास्कराचार्यः-

शब्दशास्त्रं मुखं ज्यौतिषं श्रोत्रमुक्तं निरुक्तं च कल्पं करौ।

या तु शिक्षाऽस्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आधैर्बुधेः।।[5]

भाष्काराचार्य-

वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते ।

संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाङ्गेन हीनो न किञ्चित्करः।। [1]

काश्यप मते-

सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः।

कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः।।

लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।

शौनकोऽष्टादशाश्चैते ज्योतिःशास्त्रप्रवर्त्तकाः।।[2]

---

१. बृ.सं- भूमिका , पृ-१३
२. बृ.सं- भूमिका , पृ-१३
३. बृ.सं- भूमिका , पृ-१३
४. बृ.सं- भूमिका , पृ-१३
५. बृ.सं- भूमिका , पृ-१४
६. बृ.सं- भूमिका , पृ-१४
७. बृ.सं- भूमिका , पृ-१४

पराशर मते –

विश्वसृड् नारदो व्यासो वसिष्ठोऽत्रिः पराशरः।
लोमशो यवनः सूर्यश्चयवनः कश्यपो भृगुः।।
पुलस्त्यो मनुराचार्यः पौलिशः शौनकोऽङ्गिराः।
गर्गो मरीचिरित्येते ज्ञेया ज्यौतिः प्रवर्त्तकाः ।।[1]

पराशर मते-

नारदाय यथा ब्रह्मा शौनकाय सुधाकरः।
माण्डव्यवामदेवाभ्यां वसिष्ठो यत्पुरातनम् ।।
नारायणो वसिष्ठाय रोमेशायोऽपि चोक्तवान्।
व्यासो शिष्याय सूर्योऽपि मयारुणकृते स्फुटम्।।
पुलस्त्याचार्यगर्गोऽत्रिरोमकादिभिरीरितम् ।
विवस्वता महर्षीणां स्वयमेव युगे युगे ।।
मैत्रेयाय मयाप्युक्तं गुह्यमध्यात्मसंज्ञकम्।
शास्त्रमाद्यं तदेवेदं लोके यच्चातिदुर्लभम् ।।[2]

सिद्धान्तशिरोमणि

त्रुटयोदिप्रलयान्तकालकलना मानप्रभेदस्तथा
चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः।
भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः स उदातोऽत्र गणितस्कन्धप्रबन्धे बुधः ।।[3]
यस्य नास्ति किल जन्मपत्रिका या शुभाशुभफलप्रदायिनी ।
अन्धकं भवति तस्य जीवितं दीपहीनमिव मन्दिरं निशि।।[4]
गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः।।[5]

---

१. बृ.सं- भूमिका , पृ-१४
२. बृ.सं- भूमिका , पृ-१४
३. बृ.सं- भूमिका , पृ-१५
४. बृ.सं- भूमिका , पृ-१५
५. बृ.सं- भूमिका , पृ-१६

ब्रह्माजशङ्कररवीन्दुकुजज्ञवीशुक्रार्कपुत्रगणनाथगुरून प्रणम्य ।

यः संग्रहोऽर्कवरलाभविवृद्धबुद्धेरावन्तिकस्य तमहं विवृणोमि कृत्स्नमं।।१ ।।

यच्छास्त्रं सविता चकार विपुलैः स्कन्धैस्त्रिभिर्ज्यौतिषं

तस्योच्छित्तिभयात् पुनः कलियुगे संसृत्य यो भूतलम्।

भूयः स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधा-

दित्थं यं प्रवदन्ति मोक्षकुशलास्तस्मै नमो भास्वते ।।२ ।।

वराहमिहिरोदधै सुबहुभेदतोयाकुले

ग्रहर्क्षगणयादसि प्रचुरयोगरत्नोज्ज्वले ।

भ्रमन्ति परितो यतो लघुधियोऽर्थलुब्धास्ततः

करोमि विवृतिप्लवं निजधियाऽहमत्रोत्पलः।।३ ।। **बृ.सं. पृ- १,**

कानीह शास्त्रे सम्बन्धाभिधेयप्रयोजनानि भवन्तीत्युच्यते- वाच्यवाचकलक्षणः सम्बन्धः। वाच्योऽर्थो वाचकः शब्दः। अथवोपायोपेयलक्षणः सम्बन्धः। उपायस्त्विदं शास्त्रमुपेयं ज्ञानम्। अथवा आब्रह्यादिविनिः सृतं वेदाङ्गमिति सम्बन्धः । अनेन शास्त्रेण च यद्ग्रहनक्षत्रोत्थानां शुभाशुभानां दिव्यान्तरिक्षभौमा-नामुत्पातानां फलज्ञानं तदभिधेयम्। जगतः शुभाशुभकथनं प्रयोजनं सम्यग्ज्ञानान्मोक्षावाप्तिरिति च प्रयोजनम् । किमेभिरुक्तै रित्यत्रोच्यते- श्रोतृणां सम्बन्धाभिधेयप्रयोजनकथनाच्छास्त्रविषये श्रद्धा जायत इति। तथा चोक्तमत्रार्थे-

सिद्धिः श्रोतृप्रभृतीनां सम्बन्धकथनाद्यतः।

तस्मात् सर्वेषु शास्त्रेषु सम्बन्धः पूर्वमुच्यते।।

किमेवात्राभिधेयं स्यादिति पृष्टस्तु केनचित् ।

यदि न प्रोच्यते तस्मै फलशून्यं तु तद्भवेत्।।

सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् ।

यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते ।। **बृ.सं. पृ- २,**

तस्मात् सम्बन्धाभिधेयप्रयोजनानि वक्तव्यानि ।कस्याऽस्मिन्

शास्त्रेऽधिकार इत्युच्यते द्विजस्यैव। यतस्तेन षडङ्गो वेदोऽध्येतव्यो

ज्ञातव्यश्च ।कानि तान्यङ्गानीत्युच्यते-

शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः।

छन्दसां लक्षणं चैव षडङ्गो वेद उच्यते।। **पा.शि.-४१, ४२.**

सतामयमाचारो यच्छास्त्रप्रारम्भेष्वभिमतदेवतानमस्कारं कुर्वन्ति। तदयमप्यावन्तिकाचार्यमगधद्विजवराहमिहिरोऽर्कलब्धवरप्रसादो ज्योतिः शास्त्रसंग्रहकृद् गणितस्कन्ध-होरास्कन्धौ संक्षिप्तौ कृत्वा संहितास्कन्धं संक्षिप्तं चिकीर्षुरशेषविघ्नोपशान्तये भगवन्तं तत्प्रधानं सूर्यमादावेव प्रणनाम- जयतीति-

भगवान् सविता श्रीसूर्यो जयति सर्वोत्कर्षेण वर्तते। कीदृशः? जगतः प्रसूतिः। प्रसूयते उत्पद्यतेऽ-स्माज्जगदिति जगतः प्रसूतिः। यतस्तद्वशाद् वृष्टेः सम्भवस्ततोऽन्नं ततः प्रजा इति। तथा च भगवान्मनुः-

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।

आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः।। इति। **बृ.सं. पृ- २**

विश्वात्मा विश्वस्य जङ्गमस्य स्थावररूपस्य चात्मा प्राणरूपेण हृदयान्तरस्थितः। तथा च श्रुतिः- सूर्य आत्मा जगतस्तस्थुषश्चेति।

जगतो सहजभूषणमकृत्रिममलङ्करणम्। यतो दृश्याकाशभागस्थेऽर्के सुतरां तस्य विराजनात् सहजं भूषणम्। द्रुतकनकसदृशेति। द्रुतं गलितं कनकं सुवर्णं द्रुतकनकस्य सदृशास्तत्तुल्या दशशतसंख्या ये मयूखाः किरणास्तेषां या माला प्रचयस्तयार्चितो व्याप्त इति। एवमिष्टदेवतासङ्कीर्तनात् कायवाङ्मनोभिः प्राधान्याद्धर्मः, धर्मेण चाधर्मनिवृत्तिः, तन्निवृतौ विध्नोपशमस्तदुपशमादिविध्नेन शास्त्रपरि-समाप्तिरिति ।।१।।

नन्वन्येषु ज्योतिः शास्त्रेषु सत्सु किमिदं प्रारब्धमिति पौनरुक्त्यपरिहारार्थमाह-

**प्रथममुनिकथितमवितथमवलोक्य ग्रन्थविस्तरस्यार्थम् ।**

**नातिलघुविपुरचनाभिरुद्यतः स्पष्टमभिधातुम् ।।२।। बृ.सं. पृ- ३**

मननाद् ज्ञानान्मुनिः। प्रथमश्चासौ मुनिश्च प्रथममुनिर्ब्रह्मा, तेन यत्कथितमुक्तमवितथं सत्यरूपं विस्तरग्रन्थमतिविस्तीर्णशास्त्रं तस्य ग्रन्थविस्तरस्यार्थमभिधेयमवलोक्य विचार्याहं नातिलध्वीभिः स्वल्पाभिर्न चातिविपुलाभिर्विस्तीर्णाभी रचनाभिर्वाच्यपदसन्निवेशैर्मध्यरचनाभिः स्पष्टं स्फुटतरमभिधातुं वक्तुं समुद्यतः प्रवृत्त इति। यतः संक्षिप्तस्य ग्रन्थस्य ग्रहणधारणे सुखम्। तथा च हस्तिवैद्यककारो वीरसोमः-

समासोक्तस्य शास्त्रस्यं सुखं ग्रहणधारणे ।।

अधुना मुनिविरचितस्य स्वरचितस्य च शास्त्रस्य साम्यमाह-

**मुनिविरचितमिदमिति यच्चिरन्तनं साधु न मनुजग्रथितम् ।**

**तुल्येऽर्थेऽक्षरभेदादमन्त्रके का विशेषोक्तिः।।३।। बृ.सं. पृ- ३,**

इदं यच्छांस्त्रं मुनिभिर्ब्रह्मादिभिर्विरचितं निबद्धं तत्साधु श्रेष्ठामिति। इतिशब्दो निश्चयार्थे। मुनीनामतीतानागतज्ञानं प्रत्यक्षादविशिष्टमाविर्भूतप्रकाशत्वात् । यतस्तच्चिरन्तनं मुनिभिः प्रागेव विरचितं तेन साधु न मनुजग्रथितं मनुष्यरचितत्वान्न साधु साम्प्रतं रचितत्वान्न शोभनमिति। एवमाशङ्क्याह- तुल्येऽर्थेऽक्षरभेदादमन्त्रक इति। तुल्ये सदृशेऽर्थेऽभिधेयेऽक्षराणां वर्णानां भेदादन्यत्वात् । तत्रामन्त्रक इति मन्त्रवर्जिते का विशेषोक्तिः किं विशेषवचनम्। एतदुक्तं भवति- मुनिकृतान्येव शास्त्राणि दृष्टवा तदर्थ एव नात्यल्पैर्नातिबहुभिः पदसन्निवेशैरुच्यत इत्यक्षराणां मात्राभेदा नार्थानाम्। मन्त्रार्थो वेदार्थोऽन्येः। शब्दैस्तदर्थप्रतिपादकैर्निबद्धो वेदवत्कार्यकरो न भवतीत्यत उक्तममन्त्रक इति ।

अधुना मुनिकृतानां महत्त्वं च स्वशास्त्रस्य चाल्पस्वं प्रदर्शयितुमाह-

**क्षितितनयदिवसवारों न शुभकृदिति पितामहप्रोक्तो।**

**कुजदिनमनिष्टमिति वा कोऽत्र विशेषो नृदिव्यकृतेः।।४।। बृ.सं. पृ- ३**

क्षितितनयस्याङ्गारकस्य दिवसः वारः। दिवसे वारो दिवसवारः। पितामहप्रोक्ते कमलजकथिते शास्त्रे न शुभकृदित्युक्तिः। न शुभं फलं करोतीति न शुभकृत्। भौमवारः सर्वकर्मणामशुभकृदिति कमलजकथिते शास्त्र उक्तिः। मदीये पुनः कुजदिनमनिष्टम्। "कु"शब्देन भूरित्युच्यते, ततो जातः कुजस्तस्य दिनं वारस्तच्चानिष्टमशोभनं सर्वकर्मणामित्युक्तिः। तस्मान्नृकृतेर्मनुष्यरचितस्य शास्त्रस्य। दिव्यकृतेर्देवरचितस्यार्थस्या-त्रास्मिन्नर्थे को विशेषः किमन्तरमिति भवन्त एव विचारयन्तु । अनेनर्षिकृतानां महत्त्वं स्वशास्त्रस्य संक्षिप्तत्वं प्रकाशितं भवतीति। अथवा नृदिव्यकृते इति पाठे नृकृते दिव्यकृतेऽ-त्रास्मिन् शास्त्रे का विशेष इति ।

एवं स्वग्रन्थकरणे निर्दोषतां संस्थापय सकलमुनिनिबद्धशास्त्रसंग्रहकरणहेतुं दर्शयितुमाह-

**आब्रह्मादिविनिः सृतमालोक्य ग्रन्थविस्तरं क्रमशः।**

**क्रियमाणकमेवैतत् समासतोऽतो ममोत्साहः।।५।। बृ.सं. पृ- ४**

ब्रह्मादिभ्यो यद्विनिः सृतं निर्गतं ग्रन्थविस्तरं विस्तीर्णशास्त्रं तच्चालोक्य दृष्ट्वा। अथवा तस्माद् ग्रन्थविस्तरादालक्ष्य क्रमशः क्रमेण समासतः संक्षेपेणैतच्छास्त्रं क्रियमाणम्। एवशब्दो

निश्चयार्थे। मुनिभिः पारम्पर्येण संक्षिप्तकृतमहमपि संक्षिप्तकरोम्यतोऽस्माद्धेतोर्ममोत्साहः श्रृङ्गार इति। तथा च भगवान् गर्गः-

स्वयं स्वयम्भुवा सृष्टं चक्षुर्भूतं द्विजन्मनाम्।
वेदाङ्गं ज्योतिषं ब्रह्मपरं यज्ञहितावहम्।।

मया स्वयम्भुवः प्राप्तं क्रियाकालप्रसाधनम् ।
वेदानामुत्तमं शास्त्रं त्रैलोक्यहितकारकम्।।

मत्तश्चान्यानृषीनं प्राप्तं पारम्पर्येण पुष्कलम् ।
तैस्तदा स्त्रष्टृभिर्भूयो ग्रन्थैः स्वैः स्वैरुदाहतम् ।। इति।।५।।

अस्मिन् शास्त्रे जगतः शुभाशुभकथनं तात्पर्यं तस्य च जगतः कुत उत्पत्तिरस्त्येतत्प्रदर्श-यितुमाह-

**आसीत्तमः किलदं तत्रापां तैजसेऽभवद्धैमे ।**
**स्वर्भूशकले ब्रह्मा विश्वकृदण्डेऽर्कशशिनयनः।।६।। बृ.सं. पृ- ४**

किलशब्दोऽत्रागमप्रदर्शनार्थः। इदं जगत्किल तम आसीत् । अन्धकारमभूत् तस्मिंस्तमस्यपां मध्ये हैमे सौवर्णेऽण्डे तैजसे तेजोमये स्वर्भूशकले यस्याण्डस्यैकं शकलमेकं खण्डं स्वर्गो द्वितीयं भूः। तथा भूते ब्रह्मा पितामहोऽभवद् जज्ञे। कीदृशो ब्रह्मा? अर्कशशिनयनः। अर्क आदित्यः शशी चन्द्रः ।एतौ नयने नेत्रे यस्य स विश्वकृद्विश्वस्त्रष्टा। एतदुक्तं भवति- तमोभूतेऽस्मिन् जगति भगवानव्यक्तः प्रजासिसृक्षुरादावपः ससर्जः, तासु च वीर्यमुदसृजत्। ततस्तदण्डं सौवर्णं सहस्त्रांशुसन्नि-भमभवत्, तस्मिन्नभ्यन्तरे ब्रह्मा जज्ञे, ततः स भगवांस्तत्र परिवत्सरमुषित्वा स्वयमेव ध्यानात्तदण्डं द्विधाऽकरोत्। ताभ्यां शकलाभ्यामेकं स्वर्गो द्वितीयं भूरिति निर्ममे। स ब्रह्मा सोमसूर्यनत्रः सर्वलोकपितामहो विश्वकृदिति स्मृतिकारः। **भगवान्मनुः-**

आसीदिदं तमोभूतमप्रज्ञातलक्षणम्।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः।।

ततः स्वयम्भूर्भगवानव्यक्तं व्यज्जयन्निदम्।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः। ।

योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः।
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ।।

सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्जादौ तासु वीर्यमवासृजत् ।।
तदण्डमभवद् हैमं सहस्त्रांशुसमप्रभम्।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः।।
आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यावनं पूर्वं तेन नारायणः स्मृतः।।
यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम्।
तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते।।
तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम् ।
स्वयमेवात्मनो ध्यानात्तदण्डमकरोद् द्विधा ।।
ताभ्यां स शकलाभ्यां तु दिवं भूमिं च निर्ममे ।
मध्ये व्योम दिशश्चाष्टावपां स्थानं व शाश्वतम् ।। **भगवानमनुः, बृ.सं. पृ- ५**

अत्रैव पक्षान्तराण्याह-

**कपिलः प्रधानमाह द्रव्याहीन कणभुगस्य विश्वस्य ।**
**कालं कारणमेके स्वभावमपरे परे जगुः कर्म ।।७।।**

**सांख्याचार्य बृ.सं. पृ- ५**

कपिलः सांख्याचार्यो जगतः कारणं प्रधानमाह कथयति । सत्त्वरजस्तमसां त्रयाणां गुणानां सुखदुः खमोहलक्षणानां प्रकाशप्रवृत्तिनियमार्थानां साम्यावस्था प्रधानमुच्यते । प्रधानमव्यक्तं प्रकृतिरिति पर्यायाः प्रकृतेर्महान् भवति महान् बुद्धिरध्यवसाय इति पर्यायाः। तस्या बुद्धेः सत्त्वाधिकाया धर्मो ज्ञानं वैराग्यमैश्वर्यामिति धर्माः। तस्या एव तमोऽधिकाया अधर्मोऽज्ञानमवैराग्यमनैश्वर्यमित्यध्यवसायो निश्चयः यथा पुरुष एवायं गौरेवायमश्च एवायमिति। ततो महतत्त्वादहङ्कारो भवति। अभिमान इत्यर्थः। यथाहं कुलजोऽहं सुरूपोऽहमीश्वर इत्यादि। अहङ्कारात् षोडशको गणो भवति। तद्यथा- शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति। एभ्यः पञ्चभ्यः पञ्च महाभूतानि भवन्ति आकाशवाय्वग्निजलपृथिव्याख्यानि। तेभ्यः शरीरिणां शरीरणि। यतः पञ्चमहाभूतमयानि शरीराणि। एवं प्रधानं चिद्रूपस्य पुरुषस्य विश्वं भोगार्थं मोक्षार्थं च सृजति। भुक्तभोगस्य वैराग्योत्पादनं मोक्षावाप्तिरिति। तथा च कपिलाचार्यः-

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः।

तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि।।

अध्यवसायो धर्मो ज्ञानं वैराग्यमैश्वर्यम् ।

सात्त्विकमेतद् रूपं तामसमस्माद्विपर्यस्तम् ।।

अभिमानोऽहङ्कारस्तस्माद् द्विविधः प्रवर्तते सर्गः।

ऐन्द्रियमेकादशकं तन्मात्रपञ्चकश्चैव ।।

सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्।

भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ।।

बुद्धीन्द्रियाणि कर्णत्वक्चक्षूरसननासिकाख्यानि ।

वाक्पाणिपादपायूपस्थं कर्मेन्द्रियाण्याह।।

सङ्कल्पकमत्र मनस्तच्चेन्द्रियमुभयथा समाख्यातम्।

अन्तस्त्रिकालविषयं तस्मादुभयप्रचारं तत् ।।

रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।

वचनादानविहरणोत्सर्गानन्दास्तु पञ्चानाम् ।।

स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या।

सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ।।

युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा ।

दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ।। **कपिलाचार्य मुनिः बृ.सं.पृ-७**

द्रव्यादीन् कणभुगस्य विश्वस्येति। कणभुक् कालदोऽस्य विश्वस्य द्रव्यादीन् पदार्थान् कारणमाह। द्रव्यगुणकर्मसामान्यविशेषस षवायाख्याः षट्पदार्थाः। तत्र द्रव्यं नवविधम् तद्यथा-आकाशवाय्वग्नि-जलपृथिव्याख्यानि पञ्च महाभूतानि ।आत्मा मनः कालो दिक् चेति। तथा च तद्वाक्यम् -

खादीन्यात्मा मनः कालो दिशश्च द्रव्यससंग्रहः ।इति ।

द्रव्याश्रिताश्चतुर्विंशतिर्गुणाः ।के ते ? उच्यन्ते ।तत्रात्मगुणा नव विशेषगुणाः ।तद्यथा-बुद्धिरिच्छा सुखं दुःखं प्रयत्नः संस्कारः पुण्यं पापं द्वेषश्चेति ।तथा च-

"बुद्धीच्छासुखदुःखप्रयत्नसंस्कारपुण्यपापानि ।द्वेषश्चेति ।

नवामी गुणास्त्वनित्याः सुखदुःखादिभुजां कदाचिद् भवन्ति कदाचिन्न भवन्ति । एते विशेषगुणाः। महाभूतानां खादीनां पञ्च यथाक्रमं शब्दादयो गुणाः समाश्रिताः । तथा संख्या परिमाणं पृथक्त्वं संयोगविभागौ परत्वापरत्वे स्नेहो द्रवत्वं गुरुत्वं च । एते चतुर्विंशतिर्गुणाः। पञ्चविधं कर्म। उत्क्षेपणमधिक्षेपणमाकुञ्चनं प्रसारणं गमनं चेति। सामान्यं जातिः। सा च द्विविधा परमपरं च । सामान्यं परं सत्ताख्यं महाविषयत्वात्। यतो द्रव्यादयस्त्रयः पदार्थाः सत्तया व्याप्ताः। अपरं द्रव्यगुणकर्मत्वादि। नित्यद्रव्यवृत्तय उक्त विशेषाः। नित्यानि द्रव्याण्यात्माकाशपैराणुप्रभृतानि । अपृथक्सिद्धानामाधाराधेयभावः सम्बन्धः समवाय इति। एतेषां षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं निःश्रेयसस्य मोक्षस्य हेतुः। साधर्म्यं सादृश्यं वैधर्म्यं वैलक्षण्यं भेदो विशेष इति साधर्म्य-वैधर्म्यज्ञानमवबोधो निःश्रेयसस्य मोक्षस्य हेतुः। एवमेते द्वयणुकादिक्रमेण कार्यं निर्वर्तयन्ति। चतुर्विधाः परमाणवः क्षितिजलाग्निवायूनाम्। द्वाभ्यां परमाणुभ्यां द्वयणुकमारभ्यते त्रिभिः परमाणुभिस्त्रयणु-कमारभ्यत इति क्रमेण स्थूलकार्यस्य द्रव्यस्योत्पतिः । एवं जगत्सम्भवः।

**कालं कारमणमेकम् इति च** । केऽपि कालकारणिकाः पौराणिकाः कालं कारणमाहुरुक्तवन्तः। कालस्य लक्षणम्-

नित्यमेकं विभुं द्रव्यं परिमाणं क्रियावताम् ।
व्यापारव्यतिरेकेण कालमेके प्रचक्षते ।।
आदित्यग्रहतारादिपरिस्पन्दमथापरे ।
भिन्नमावृत्तिभेदेन कालं कालविदो विदुः ।। **कालकारणिकाः, बृ.सं. पृ- ८**

एवं जगतः कालः कारणं प्रजाः सृजति स एव संहरति। तथा च तद्वाक्यम् –

कालः सृजति भूतानि कालः संहरति प्रजाः।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ।।इति ।

यथा कालेन बलिरिन्द्रः कृतः कालेन ततो निवर्तितः काल एव पुनरेवं कर्तेति ।

स्वभावमपर इति । अपरे अन्ये लौकायतिकाः स्वभावं जगतः कारणमाहुः। स्वभावादेव जगद्वि-चित्रमुत्पद्यते स्वभावतो विलयं याति। तथा च तद्वाक्यम्-

कः कण्टकानां प्रकरोति तैक्ष्ण्यं विचित्रभावं मृगपक्षिणां च ।
माधुर्यमिक्षोः कटुतां च निम्बे स्वभावतः सर्वमिदं प्रवृत्तम् ।।

परे जगुः कर्मेति । परे अन्ये मीमांसका जगतः कर्म कारणं जगुरुक्तवन्तः। शुभाशुभकर्म प्राणिनां पुण्यापुण्यरूपं जगतः कारणं शुभेन कर्मणा शुभफलभोगी जायते अशुभेन विपरीतमिति। तथा च-

पूर्वजन्मार्जितं यच्च कर्म पुसां शुभाशुभम्।
तदेव सर्वजन्तूनां सृष्टिसंहारकारणम्।।

एवमनेकजन्मकारणेषूक्तेषु किं जगत्कारणं निश्चितमित्यत्र निषेधमाह-

**तदलमतिविस्तरेण प्रसङ्गवादार्थनिर्णयोऽतिमहान् ।**
**ज्योतिः शास्त्राङ्गानां वक्तव्यो निर्णयोऽत्र मया ।।८।।**

अलमिति वारणपक्षहेतुर्दृष्टान्तैर्दर्शनान्तराणि निवर्त्य कारणनिश्चयः । स चेह प्रस्तुतः, कुतो जगदुत्पत्तिरिति। प्रसङ्गादतिविस्तरेण वादः प्रसङ्गवादः, प्रसङ्गवादे अतिमहानतीवार्थस्य निर्णयो विचारो य आरब्धस्तस्यालं भवतु । अनेनास्माकं न किञ्चित् प्रयोजनम। यतो मया एतस्मिन् शास्त्रे ज्योतिः शास्त्राङ्गानां निर्णयो वक्तव्यः। ज्योतींषि ग्रहनक्षत्रादीनि तान्यधिकृत्य कृतं शास्त्रं ज्योतिःशास्त्रं ग्रहनक्षत्रयोगेन जगतः शुभाशुभसम्भवात्। ज्योतिःशास्त्रे यान्यङ्गानि गणितहोराशाखाख्यानि तेषां निर्णयो निश्चयो वक्तव्यः कथनीयः। यद्यपि गणितहोरास्कन्धौ प्रागेवोक्तौ तथाप्यत्राङ्गत्वेनोदाहतौ। पुरुषलक्षणादौ जातकं समागमादिषु गणितमिति। अथवा तदुक्तस्यात्र फलकथनं क्रियत इति। **बृ.सं. पृ- ८**

ज्योतिः शास्त्रस्वरूपं तत्र संज्ञान्तरण्याह-

**ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं**
**तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता।**
**स्कन्धेऽस्मिन गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ**
**होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ।।९।।**

ज्योतिःशास्त्रं कीदृशम् । अनेकभेदविषयम्। भेदो विशेषः। अनेको बहुप्रकारो भेदोऽनेकभेदः। अनेकभेदो विषयो यस्य तद्भिद्यतेऽस्मादिति भेदः। यथा श्वेतवर्णयोगात् कृष्णो वर्णो भिद्यते। एवं बहुप्रकारो भेदः स्कन्धत्रयमध्यनिर्दिष्टस्तस्य विषयं गोचरं स्कन्धत्रयाधिष्ठितं स्कन्धत्रयेण गणितहोराशाखाख्येनाधिष्ठितं व्याप्तम् । तत्कात्स्न्योपनयस्येति। तस्य

ज्योतिषशास्त्रस्य कात्स्न्र्येन निरवशेषेणोपनयः कथनं यस्मिन् शास्त्रे तच्छास्त्रं संहितेति मुनिभिर्गर्गादिभिर्नाम सङ्कीर्त्यते कथ्यते। तथा च भगवान् गर्गः-

गणितं जातकं शाखा यो वेति द्विजपुङ्गवः। त्रिस्कन्धज्ञो विनिर्दिष्टः संहितापारगश्च सः।

स्कन्धेऽस्मिन्निति। अस्मिन् ज्योतिःशास्त्रे ग्रहाणामादित्यादीनां या गतिर्गमनं प्रतिराशौ सञ्चरणं सा येन ज्ञायते तद् गणितं तस्य च तन्त्रमिति संज्ञा। असौ गणितस्कन्ध-स्तन्त्राभिधानः। होराऽन्योऽङ्गविनिश्चयश्च कथित इति। प्रतिष्ठायात्राविवाहादीनां लग्नहोराख्यः कथित इति। होरास्कन्धे द्वितीयः । स्कन्धस्तृतीयोऽपर इति। अपरस्तृतीयोऽयं स्कन्धो वक्ष्यमाणः शाखाख्य इति । **बृ.सं. पृ- ८**

अथ स्कन्धत्रयविभागमाह-

**वक्रानुवक्रास्तमयोदयाद्यास्ताराग्रहाणां करणे मयोक्तः।**

**होरागतं विस्तरशश्च जन्म यात्राविवाहैः सह पूर्वमुक्तम्।।१०।।**

ताराग्रहा भौमादयस्तेषां वक्रं प्रतीगनमनम्। यथा भौमादिको ग्रहो मेषस्थो मीनं याति स प्रतीप-गतित्वाद्वक्रित इत्युच्यते। अनुवक्रं स्पष्टगतित्वम् । वक्रां गतिं त्यक्तवा पुनः स्पष्टां गतिमाश्रितोऽनु-वक्रित इत्युच्वते । अस्तमयस्तेषामेव ग्रहाणां सूर्यवशेन भवति। यः कश्चिच्चन्द्रादिको ग्रहः सूर्यसमीपवर्ती भवति स च रविकरनिकराभिभूतो गमने लोकानामालोकं नायति तदास्तमित इत्युच्यते। तथा च एव ग्रह आदित्यमण्डलाद्विप्रकृष्टो यदा भवति तदा नभसि दृश्यते स चोदित इत्युच्वते। एवं वक्राऽनुवक्रास्तमयोदयाद्यास्ताराग्रहाणाम्। आदिग्रहणात् परस्परं ग्रहाणां युद्धं चन्द्रेण नक्षत्रैश्च सह समागमो ज्ञेयः। एतदप्युपलक्षणार्थम्। मध्यगतिस्तिथिनक्षत्रच्छेदः स्फुटगतिस्त्रिप्रश्नश्चन्द्रार्कग्रहणे उदयास्तमयौ शृङ्गोन्नतिः समागमस्ताराग्रहसंयोग इत्येते मया करणे पञ्चसिद्धान्तिकायामुक्ताः कथिताः, सर्व एव। तथा होरागतं विस्तरशश्च जन्मेति। विस्तरशो विस्तरेण प्रदर्शनेन जन्म जातकं होरागतं होराशास्त्रसम्बन्धं यात्राविवाहैः सह पूर्वमादवेवोक्तं कथितम् । एतदुक्तं भवति-बृहज्जातकं बृहद्यात्रा बृहद्विवाहपटलं च मयादावेव विरचितमिति ।। **बृ.सं. पृ- ९**

अथात्र वक्ष्यमाणे स्कन्धेऽनुपयोगिकं त्यक्त्वा यत्सारं तद्वक्ष्यामीत्येतदाह-

**प्रश्नप्रतिप्रश्नकथाप्रसङ्गान् स्वल्पोपयोगान् ग्रहसम्भवांश्च।**

**सन्त्यज्य फल्गूनि च सारभूतं भूतार्थमर्थैः सकलैः प्रवक्ष्ये ।।११।।**

प्रश्नो यथा । हिमवदादौ स्थितो गर्गादिको मुनिः शिष्येण क्रौष्टुकिपूर्वेण पृष्टः भगवन्। ज्योतिःशास्त्रं ज्ञातुमिच्छामि किं स्वरूपं केनोत्पादितं किं तेन करणमित्यादि। प्रतिप्रश्नो यथा गर्गादिको मुनिः शिष्यवचनं श्रुत्वाह- यत्वयाऽहं पृष्टस्ततो वक्ष्यामीति। तथा च प्रश्नः-

हिमवच्छिखरे रम्ये नानाधातुविचित्रिते ।
नानद्रुमलताकीर्णे नानातीर्थसमाश्रिते ।।
हंसकारण्डवक्रौञ्चचक्रवाकविराजिते ।
सिद्धगन्धर्वसङ्कीर्णे देवर्षिगणसेविते ।।
हुताग्निहोत्रपासीनमाश्रमे देवदर्शनम् ।
वृद्धगर्गं द्विजश्रेष्ठं मुनिभिः परिवारितम् ।।
अभिगम्य समीपस्थो विनयात् संश्रितव्रतः।
क्रौष्टुकिः परिपप्रच्छ प्रश्नं लोकानुकम्पया ।।
भगवन् मुनिशार्दूल सर्वज्ञानविशारद।
ज्यौतिषं श्रोतुमिच्छामि परं कौतूहलं हि नः।।
ज्यौतिषं ज्ञानमुत्पन्नं कथमेतदनुत्तमम्।
केन वा पूर्वमेवोक्तमृषिणा दैवतेन वा।।
किमस्य कारणं लोके परिज्ञानाच्च किं फलम् ।
नामतश्चानुपूर्वेण ब्रूहि मे मुनिसत्तम् ।। [१]

मुनिवश्नः । तथा च प्रतिप्रश्नः-

एवमुक्तस्तु मुनिना वृद्धगर्गो महातपाः।
प्रोवाच तानृषीत् सर्वान् क्रौष्टुकिप्रमुखस्थितान् ।।
श्रूयतां स्वर्ग्यमायुष्यं धर्म्यं पुण्यं यशस्करम् ।
ज्ञानविज्ञानसम्पन्नं द्विजानां पावनं परम्।।
कालज्ञानमिदं पुण्यमाद्यं हि ज्ञानमुत्तमम् ।
सिसृक्षुणा पुरा वेदानेतत्सृष्टं स्वयम्भुवा ।। **गर्गमुखेन काल निरुपणम्**

---

१. गर्गादिका मुनः , बृ.सं, शास्त्रोपनपनाध्यायः, पृ-१०

वेदाङ्गमाद्यं वेदानां क्रियाणां च प्रसाधकम् ।
ज्योतिर्ज्ञानं द्विजेन्द्राणामतो वेद्यं विदुर्बुधाः ।।
ज्योतिश्चक्रे तु लोकस्य सर्वस्योक्तं शुभाशुभम् ।
ज्योतिर्ज्ञानं च यो वेत्ति स तु वेत्ति परां गतिम् ।।
चन्द्रनक्षत्रताराणां ग्रहाणां भास्करस्यं च ।
ज्योतिषामपि यज्ज्योतिर्ज्योतिषामपि पावनम् ।।
तद्भावभाविनं युक्तं तं देवा ब्राह्मणं विदुः।
तस्मात्पूर्वमधीयीत ज्योतिर्ज्ञानं द्विजोत्तमः।।
धर्मसूत्रं ततः पश्चाद्यज्ञकर्मविधिक्रियाम् ।
यज्ञाश्चायुष्यहोमाश्च चूडोपनयनादि च ।।
साम्राज्यं पौर्णमास्यं च पितृदैवततर्पणम् ।
सर्वारम्भाश्च जगतो लोके च विविधाः क्रियाः।।
न ज्यौतिषं विना तासां प्रवृत्तिरुपलभ्यते ।
आप्यायनं च देवानां यज्ञाः प्रोक्ताः क्रियाश्रयाः।
यज्ञार्थमपि अहोरात्रं क्रियाश्चान्या जगद्धिताः।।
न ते च सम्प्रवर्तन्ते कालाज्ञानात् कथञ्चन ।।
यज्ञक्रिया अहोरात्रं क्रियाश्चान्या जगद्धिताः।
तस्मात् पुण्यं समं वेदैर्यज्ञचक्षुः सनातनम् ।।
स्वर्ग्यमध्येयमव्यग्रैर्ब्राह्मणैः शंसितव्रतैः।
ततः कालप्रसिद्ध्यर्थं राशयः पूर्वमीरिताः।।
अहोरात्रविभागश्च तिथीनां च क्रियाविधिः।
सोमसूर्यविलग्नानामृक्षाणां चापि निश्चयः।।
आदानयोगभोगाश्च विसर्गाश्चार्कसोमयोः।
दिनर्तुपक्षमासानां चन्द्रार्काणां विनिश्चयः।।
कर्मोपभोगमानानां लेख्यप्रश्नविधिस्तथा ।
एवमाद्याः समस्ताश्च क्रिया ज्यौतिषसंश्रिताः ।। **काल निरुपणम्**

एवमादिकाः प्रतिप्रश्नाः। तथान्यान् कथाप्रसङ्गानिति । आख्यायिका कथा तत्र प्रसङ्गः प्रसक्ति। यथा भगवता पराशरेण पुष्करस्थाने कथा कृता । पुरा खलु सुरासुराणां महति

महायुद्धे विग्रहे विपरीतविग्रहे भार्गवप्रयुक्ताभिचारोपहतवीर्यप्रभावाः सुराः शत्रुविक्रमोपहततेजसः स्वयम्भुवं शरणमभिजग्मुः। शुक्र एव वो गतिरित्याधिपत्यं सुराः शुक्रमभिसमेत्याऽऽनतास्ते देवाः पवित्रैर्मन्त्रैराद्यैरभिष्टुतवन्तः। सर्वरत्नधनधान्यादिष्टाः यज्ञभागं चास्मै दत्वा पैतामहा ऋषयो देवताश्च वरमपि४भयाचयाम्बभूवुः। अनेकविधप्रयुक्तस्याद्यधर्मस्य परन्तपस्य यथा न स्यान्नाशस्तथा भगवान्नो विधत्ताम् । यथा च नो बृहस्पतिरूपाध्यायस्तथा भगवानपि भवत्विति। शुक्रः परमपीत्युक्त्वा देवान् शान्तिस्वस्त्ययनादिभिः पुनस्तेजसाभिवरयामास। न हि वेदमन्त्रकर्मणां यथावत्प्रयुक्तानां किञ्चिदप्यसाध्यं पश्यामस्तेषां शुद्धाशुद्धमन्त्राचार्यप्रतिग्रहीतृ-देशकालकरणद्रव्यसाधनसामग्रयम्। इतरथा हि मिथ्या हीनमन्त्रप्रयोगा यजमानस्यै-वाभिचाराय भवन्ति । पुरा खलु सुराधिपत्यमाजिहीर्षुरतिप्रवृद्धवीर्योत्सेकाद्वृत्रः पुरन्दरमभिचचार। अथैनं कर्मविधिसमाप्ताविन्द्रशत्रुवृद्धिवचनसुरापराधिनमिन्द्र एव शत्रुमभिवृद्धो वृत्रमभिजघान। एवमनियत-कर्मारम्भाः शतशः सुरा विलयं जग्मुः। अतो विधिहीनकर्मारम्भदनारम्भ एव श्रेयान्। तत्राऽभिचार-कर्माऽथर्ववेदमन्त्रोपदिष्टैरुपकल्पयोदित्यादि।

एवमादिकाः प्रश्नाः प्रतिप्रश्नाः कथाप्रसङ्गाः स्वल्पोपयोगाः प्रायो न कुत्रचिदुपयुज्यन्ते । आचार्येण यद्यपि रोहिणीयोगादिष्वीषत्कथाप्रसङ्गः प्रदर्शितस्तथापि न दोषः। यत आचार्येण सहृदयहृदया-ह्लादकं शास्त्रं कृतं तावन्मात्रेण तेषां चितरञ्जनं भवति ।

तथा ग्रहसम्भवांश्चेति । ग्रहाणामादित्यादीनां सम्भवा उत्पत्तयः । कृतः सूर्यादय उत्पन्न इति। तथा च भगवान् पराशरः-

हिमवति हिमावदातेऽवनिधरवरशिखरविपरिवर्तितमिव विवस्वन्तं भगवन्तं पराशरमभिसङ्गम्य विनयावनतः कौशिकोऽभ्युवाच- भगवन्। सर्वात्मा कालगतिविधाता सूर्यस्तस्य चरितमभिशुश्रुषामहे। द्वादश च श्रूयन्ते । एक एव तपन दृश्यते। शीतोष्णवर्षा-भ्रानिलानां कथमस्मात् प्रादुर्भावः। कथं वर्त्तवस्तन्मानु-वर्तते। मार्गप्रमाणवर्णसंस्थानादि शुभाशुभफलमखिलमभिव्याहर्तुमर्हसीति।

तमुवाच भगवान् पराशरः- पुरा खल्वपरिमितशक्तिप्रभाववीर्यायुरारोग्यसुखैश्वर्य-धर्मसत्त्वशुद्ध-तेजसः पुरुषा बभूवुः। तेषां क्रमादपचीयमानसत्वानामुपचीयमानरजस्तमस्कानां लोभः प्रादुरभवत् । लोभात् परिग्रहं परिग्रहाद् गौरवं गौरवादालस्यमालस्यात्तेजोऽन्तर्दधे। अथ भगवान् परमर्षिरचिन्त्यः पुरुषो नारायणः स्ववेद्यमाद्यमात्मानं द्वादशधा कश्यपाददितेर्जन-यामास। येनानन्तं पुनर्जगदभवत्। यान् द्वादशादित्या-नाचक्षते। इन्द्रो विष्णुर्विवस्वान्मि-

त्रोऽशुमान् धाता त्वष्टा पूषा वरुणोऽर्यमा भगः सवितेति। अथ सवितारं पितामहोऽतितुष्टाव वरार्हं चैनं वरयाञ्चकार। यथा द्वादशादित्येभ्यस्त्वामुपस्थास्यतीति । मत्तो योगस्तेजा रुद्रात् स्वयमग्नीषोमौ वायुरमृतं मर्त्यं चेति। चन्द्रस्य पराशरमुनिना सम्भवो नोक्तः।[1]

राहोर्यथा- अथा भगवन्तमनिलबलसमीतिपोद्धतहुतवहप्रभाभासुरमविगतथदर्शन-मुदासीनमा-श्रमस्थमभिसंक्रस्य कौशिको विनयात् पराशरमुवाच- भगवन् सकलभुवनविलयोद्भ-वस्थितिविकरणौ कथमुपरज्येते सूर्याचन्द्रमसौ गृह्णाति को वा ग्रहो ग्रहणप्रयोजनं फलं वा किमस्य ग्रहणे नियतमनियतं चेति।

**तमुवाच भवान ् पराशर**ः – पुरा पुरुहूतपितरं कश्यपमपत्यार्थमकाले सिंहिका अभियाचया-मास। तस्यै मुनिरकालयाञ्चाकोपाद्दारुणं यमकालान्तकोपमं सुतमदात् । यं राहुरित्याचक्षते कुशलाः। स जातमात्र एवाऽदितिसुतसङ्गरावमर्दादनु विमुखीकृतः क्रोधाद्धि-मवति दिव्यमत्युग्रमयुतं वर्षाणां तपोऽतप्यत। स पितामहाद्दिवि चरणममरतां सुरविजयमर्कचन्द्र-सम्भक्षणं च वरमभिरयामास। तस्मै भगवानमरगुरुः स्वयम्भुः प्रहसन्नुवाच । अतिवरमशक्त-स्त्वमेतौ जरयितुं किन्त्वेमस्त्वित्युक्त्वाऽन्तर्हिते भगवति। दिनकररजनिकारावभिदुद्राव राहुः। ततो हरिरविविमथनं चक्रमुपरि परिक्षिप्यास्य शिरश्छित्वोवाच । सर्वमवितथां पितामहवचो भवतु स्वे स्वे युगे पर्वणि ग्रहणं कुर्वन् जगतः। शुभाशुभानां कर्ता भविष्यसीति ।

केतोः केतुचारोक्ता एवोत्पतिः । तथा च **भगवान गर्ग**ः-

जातस्तूशनसः शुक्रः सूर्यपुत्रः शनैश्चरः।
पुत्रः सोमस्य तु बुधो भूमेरङ्गारकः स्मृतः।।
पुत्रमङ्गिरसः प्राहुबृहद्वाक्यं बृहस्पतिम्।
राहुः स्वर्भानुपुत्रः स्यात् पुत्रः केतुर्विभावसोः।।
मनसा ब्रह्मणा खातावुभौ सोमदिवाकरौ।। इति।।[2]

सप्तषष्टिसहस्त्राण्यशीतियोजनकोटयो भूर्यत्पृथिवीमण्डलं परमस्यादगम्यं तमः। तन्मध्ये हिरण्मयो मेरुश्चतुरशीतियोजनसहस्त्रोच्छ्रितः षोडश चाधस्तात् त्रिगुणाविस्तारायामो यं स्वर्गमाचक्षते। तन्मध्येनाम-र्कचन्द्रौ ज्योतिश्चक्रं च पर्येति ।

---

१. तमुवाचभगवानः पराशरः, बृ.स. , पृ.१२

२. बृ.स. शास्त्रोपनयनाध्यायः, पृ-१५

मेरोरर्धविभागे सूर्यश्चन्द्रो द्वितीयके त्वटते ।
ग्रहनक्षत्रतारकासहितौ द्वौ कृतैककालविभागौ ।।

इति गोलकशास्त्रे निश्चयः । तस्य छायां निशामिच्छन्ति कुशलाः एवमादिकं बहुप्रकारमस्माकं **गोलज्ञानेन सिद्धयन्ति** । तथा च -

मेरोरर्धप्रमाणेन सूर्यस्य गतिरुच्यते।
भगणस्याथ पञ्चाशदादित्यादुपरि स्थिता। ।
भगणात् सप्तषष्टिस्तु सोमस्य गतिरुच्यते ।
अध्यर्यं तु गतेः सोमाद्भार्गवस्य गतिः स्मृता ।।
बृहस्पतिर्बुधश्चैव प्राजापत्यः शनैश्चरः।
केतवश्च ग्रहाः सर्वे ज्ञेयाः सोमसमा गतौ।।
निमेषान्तरमात्रेण योजनानां शतं शतम् ।
पर्येति भगवानर्को भावयन् भूतभावनः।।
अन्ते निम्नोन्नता मध्ये कूर्मपृष्ठोपमा मही।
त्रिगुणाद् भूपरीणाहादष्टभागो दिगन्तरम् ।।[१]

एवमादिकानि वाक्यानि निरुपपत्तिकानि गोलविरुद्धान्यसाराणि सन्त्यज्य यत्सारभूतं श्रेष्ठं लोकप्रत्यक्षजननं भूतार्थं सत्यार्थं दृष्टप्रत्ययं सकलैः समग्रैः परिपूर्णैरर्थैरनाकाङ्क्षैः प्रवक्ष्ये कथयिष्य इति।

## ग्रंथकर्ता वराहमिहिराचार्य ः

१. **वराहमिहिरस्य व्यक्तित्वं** :- तस्य ग्रन्थानां विवरणं च

अध्ययनेन अनुमीयते - सः उदार जीवनवादी तथा मानवतावादी -नर्मस्वभावः नैतिकंम्भ्यसं आनंत्निवृत्तिः तस्य कामशास्त्रस्य अर्थ शास्त्रस्य ग्रहनं अध्ययनं आसीत्। बृहत्संहितोपरि जातं टीका साहित्यम्

१) **पुरातनकालतः** बृहत्संहिता लब्ध प्रतिष्ठः ग्रन्थः इति नितरां प्रसिद्धिं गतः अतः एतत् स्वाभाविकं अस्ति यत् काले काले विविधैः विद्वद्भिः अस्य ग्रन्थस्य उपरि टीकाः विरचिताः। तथापि भट्टोत्तपलात् प्राक् बृहत्संहितायाः कति, केच, टीकाकाराः अभवन्।

१. बृ.स. शास्त्रोपनयनाध्यायः, पृ-१५

तथा च हण्टर्[1] वर्यस्य नेतृत्वे प्रवृत्तम् अन्वयेषणं च AD6 शताब्दस्य समीपवर्तिकालः एव वराहमिहिराचार्यस्य कालः इति निर्धारयितुं प्रभावभूतानि वर्तन्ते। तत्रापि द्वौ एतन्नामकौ पण्डितावास्ताम् इत्यपि अभिप्रायो विद्यते। भट्टोत्पलस्य बृहत्संहिताटीकाअध्ययनेन इदं फलितं भवति यत् बृहतसंहितायाः अर्थघटनविषये द्वे विचारधारे (Two different schools) तस्य कारणानि अधः प्रदर्श्यन्ते। बृहत्संहितायाः व्याख्याकारस्य भट्टोत्पलस्य कालः (८८८ तमे शताब्दे सः टीकां लिखितवान् ) तस्य केषाञ्चन विवरणानाम् आधारः कश्चित् विद्वार्न पञ्चतन्त्रं पारसीक- भाषायाम् अनूदितवान् तस्मिन् सः वराहमिहिरं स्मरति।

१) ३८.२, अ. श्लोक- भट्टोत्पलः लिखित... केचित् उचिर.... इति पठंन्ति।

२) १०८.. अध्याये तिनर्यन्च इति स्थाने सः तिरश्चाम् इति प्राचीनं पा वेदनं करोति।

३) ४६.११ अध्याय- ११ श्लोक तरलं काचिकं ,पय इति केन्चित्।

४) ३८-१ स्थाने प्रकृतयश्च ततः हि अनूकम् इति स्थाने स. लिखति अपरे अन्यथा लिखंति।

५) तत्रैव ३८.५७ श्लोके केचित् मृदुउ...

६) तत्रैव ६३- श्लोक सः एकाधिकं अर्थघटनं कुर्वन आह। अ) एवं केचित... ब) अन्ये पुनः....

७) ५६-६८ तथा ७८ा स्थानयोः सः विश्वयोः द्वयोः विचारधारयोः निर्देशं करोति। तथा अन्ते उपसंहरन् आह एषां ऐव व्याख्या ज्यायसी

८) तत्रैव १२ श्लोके प्राप्तसूर्यादिक इति वाक्यस्य अन्येन कृतं अर्थ घटनं दूषयन् स लिखति अत्र केचितउ... अयुक्तं एत्त तथा अन्ते गर्गम् उद्धरन् आह.... भगवान गर्गः।

९) तत्रैव ३१ श्लोके शौण्डिक इति शब्दस्य व्याख्यां कुर्वन्, स आह.... मधुपानसक्तेः कल्याक इति केचित्। (केलाल इति प्राकृतभाषायाम्)

१०) तत्रैव (७९ श्लोके अर्थ घटन टयं र्कुवन् स आह... एवं केचित् व्याचक्षते, अन्ये चनश्रो दिश इच्छन्ति।

---

१. विख्यातः इतिहासकारः।

११)	२३-७५ स्थाने नवगुणसूत्र.... इति ग्रन्थ संदर्भ विषये पूर्व-टीकाकारान पुष्यन स आह चोदयन्ति अत्र केचित अनिश्चित बुद्धयः विकल्पाना। तथा च स्व मत परिपोषणाय सः नन्दी गर्ग इति सिद्ध विदुषां उद्धरणं ददाति।

१२)	अत्रैव ३१ श्लोक स लिखति केचित् चतस्त्रः इति वर्धयन्ति।

१३)	अत्रैव ४१ श्लोके स लिखितम् केचित अविदित शास्त्र सद्भावाः मन्यन्ते।

१४)	११.७ श्लोके स लिखिति... अत्र व्याख्या विप्रतिप्रतिः अग्रे स्वक्रिय शुद्धं अर्थघटनं अपि उपस्थापयति।

१५)	५.२६ स्थाने श्लोके अन्यत् अर्थघटनं परश कुर्वन् स आह...अन्ये एवं व्याचक्षेत।

१६)	३१.५ स लिखति... अक्षिभ्यां शिश्नेन सिंचति इति केचित्।

१७)	३१-१९ स्थाने स. लिखति केचित् पठन्ति।

१८)	३८-१२ स्थाने स लिखति... इति पठिन्त।

## २. **वराहमिहिरः कविरूपेण**

प्रोफेसर रामकृष्णभट्टः बृहत्संहितायाः आंग्लप्रस्तावनायां लिखति यत् असंशयं वराह मिहिरः उच्चतम कोटिषुं विराजमानेषु कविषु एकतमः। तस्य प्रियः कविः कालिदासः आसीत् इति तस्य काव्यलेखनशैल्या स्पष्टतया लक्ष्यते। महान् समीक्षकः क्षेमेन्द्रः वराहमिहिरं कविरूपेण भूरि प्रशंसति। ज्यौतिषवास्तुतुल्यशास्त्रीयग्रन्थलेखनेऽपि सः सहजतया काव्यात्मकं निरुपणं करोति। स्वसिद्धान्तपरिपोषणाय सः अलंकाराणां प्रयोगं करोति। तस्य ग्रन्थे अनुप्रासः, अर्थान्तरन्यासः, काव्यलिङ्गं ,दृष्टांतः, सारः ,स्वभावोक्तिः, यथासंख्यं,प्रतीपः,- व्यतिरेक, उत्प्रेक्षा निदर्शना, श्लेष, समुच्चयः अर्थापत्तिः, अतिशयोक्तिः, रुपकं - यमकम्-परिकरः,–विशेषोक्तिः, –उपमा,- इत्यादीनां अलङ्काराणां रुचिराः प्रयोगाः। अत्र तत्र तेन कृताः।

## ३. **वराहमिहिरस्य पाण्डित्यम्** : वराहमिहिरस्य पांडित्यं सर्वतोमुखम् आसीत्। यथा -

**व्याकरणशास्त्रे** - सन्नन्ताः प्रयोगाः तेन सहजतया बहुशः कृताः दृश्यन्ते यथा चिचीषया संचिक्षिप्सुः दित्सन्ति , युयुत्सन्तः बिभक्षयिषुः जुगुप्समानाः – प्रकृतिवर्णने कालिदासं स्त्रवन्मदवारिधारा. सुखान्युपलेभिरे ते (रधुवंशः XIII ), स्त्रवद्वारिदानैः (XXIV 18), वाल्मीकिं 'मनो हि मूलं'... इत्यादि निरूपणेन च समानीकरोति वराहमिहिरेः। विषयेण तथा शैल्या लोकोत्तरं काव्यं भवति बृहत्संहिता।[1]

---

१. बृ.सं.एम् रामकृष्णभट्टः

✓ यंगन्त रुपाणि : तथा यंग् लुगन्त रुपााणि पोप्लूयन्ते, पेपीयन्ते , बोभूयते, रोरूयते, बम्भ्रमीति, पापठद्धि:, देदीप्यमानम् बोभवीति, नरीनर्ति

✓ तद्धितरुपाणि:- द्वास्थानिकम्, शार्व्याम् तान्तवम् ज्यैष्ठी, औपयिकम्, वैयाघ्र:, पर्वतीया: औदीच्या: , शाकुनी, कौच्यै:

✓ नाम धातुरुपाणि: – पुरोषणे धूमायन्

✓ समासविषये: - अध्यक्षरम्

✓ दुर्लभा: प्रयोगा:

१) प्रियमन्नं (अ. ३४-१४)

अस्य अर्थ: दुर्लभं मूल्यवत्च प्रियमन्नम् अद्यापि अयं प्रयोग: कर्नाटक देशे क्रियते। डोम्ब शब्द: वराहमिहिरेण अवकाशे स्तेभद्वय निष्ध्य रज्जूपरि भ्रमणं कुर्वाण:। दक्षिण भारते अस्मिन् एव अर्थे डोम्बराट इति शब्द: प्रदृश्यते।

## ४. वराहमिहिरस्य भाषा

तस्य भाषा अर्थपूणा सरला पारदर्शिका पदलालित्ययुकता अस्ति। तस्य भाषा विषये- समीक्षका: लिखन्ति यत् तस्य रचनासु द्राक्षापाक: प्रसादगुण: – माधुर्यं सुकुमारता इत्यादि काव्यगुणा: बहुलतया दृश्यन्ते। आवश्यकतानुसारेण स: ओजोगुणस्यअपि प्रयोगं करोति एवं उदारतादय अन्पेगुणा: अपि वराहमिहिरेण कृता:।

## ५. वराहमिहिरस्य सृष्टिसौन्दर्य वर्णनम्।

तस्य अवलोकनशक्ति: सूक्ष्मा आसीत्। अत: स्वग्रन्थे स: समुद्र उद्यान: मेधा: नगर पर्वता: अरण्या- वृष्टि- शिशिरता- सनक्षत्रंआकाशं मत्स्य दर्दुर इत्यादीनां यथातथं वर्णनं चमत्कृतिपूर्णं कृतम्। कालिदास: इवस: निसर्गस्य वर्णनं ललितसुन्दर रुपेण करोति। तेन विविधानां छन्दसां अपि प्रयोगा: सहजतया कृत:। तस्य रचनायां वर्णनं नादमयता प्रभावपूर्णा शैली, उत्तमं वस्तु च। इति चत्वारिऽअपि काव्यतत्वानि तस्य कृतिषु भूरिश: दृश्यते। पुष्यस्नादिप्रसंगे तस्य काव्यं उच्च श्रृंगारमयं भवति। वरामिहिरस्य उपरि आदि कर्मे: वाल्मीके: अपि महान् प्रभाव: दृश्यते।

**आसीत्तम : किलेदं तत्रापां तैजसेऽभवेद्धैमम्।**

**स्वर्भूशकले ब्रह्मा विश्वकृदण्डेऽर्कशशिनयन:।।**[1]

१. बृ.सं. १/५

६. <u>वराहमिहिरस्य छन्द्रोज्ञानंम्-</u>

विविधानां छन्दसां प्रयोगाः बृहत्संहितायां कृताः दृश्यंते। श्लेषालंकारेण बहुधा छन्दोनाम्नां सः चातुर्यतः प्रयोगं करोति। यथा जधनचपला अस्य अर्थः नर्तकी, अन्य अर्थ एकः छन्दो विशेषः। आर्चायेण बृहतसंहितायां मुख्यतया आर्याछन्दः प्रयुक्तः। आर्या छन्द्र सः सप्तभेदाः आचार्येण प्रयुक्ताः। बृहत्संहितायां तेन ५२ छन्दांसिप्रयुक्तानि। तेन प्रयुक्तानि कतिचित् छन्दांसि छन्द्रःशास्त्रस्य एकस्मिन् अपि ग्रन्थेन लभ्यन्ते। हरिणीछन्द्रसः उल्लेखं सः वृषभचरितम् इति शब्देन करोति। तेन दंण्डकछन्द्रसः अपि साधु प्रयोगः कृतः। एवं तस्य वेदविषयकम् ज्ञानं यज्ञयागादि विषयकं ज्ञानं अपि बहुलतया प्रस्तुतग्रन्थे दृश्यते। धर्मशास्त्रस्य अपि उचिताः प्रयोगाः तेन कृताः। यथा स्थालीपाकः शूद्रेभ्यः प्राणापन्थमंत्र देवाः कयोत् महाशान्तयः महारोहिणः तथा इष्टापूर्तम् इत्यादि।

तस्य आयुर्वेदस्याऽपि गहनं ज्ञानं दृश्यते। आरोग्यविषये तथा दीर्धजीवनविषये तेन तानि तानि सूचकवचनानि निर्दिष्टानि। यथा आयुर्वैधृतम् इत्यादि। स्वग्रन्थे दन्त मज्जन निर्माणस्य प्रक्रिया विस्तरेण वर्णिता। तस्य ाचनायां पातंजलयोगदर्शनस्य सांख्यदर्शनस्य च निरुपणं अत्र तत्र वर्तते। तस्य प्राक्शास्त्रीयं ज्ञानं अदभुतं आसीत्। मोदकः अपूपः शश्कुली पायसम् गुडासनः परमान्नं इत्यादि। तस्यपक्षिशास्त्रः विषयकं ज्ञानमपि दृश्यते।

अयं ग्रन्थः औपयोगिकानां ज्यौतिषायुर्वेदशाकुनिकौत्पातिकशान्तिकपौष्टिकवृक्षा-युर्वेदधार्मिका-ध्यात्मिकभौगोलिकैतिहासिकादिविविधाविचित्रविलक्षणविषयाणां सन्निवेशेन 'बृहत्संहिता' बृहत्संहि-तैवेति परमो योग्यः संस्कृतवाड्मयस्य मूर्धाभषिक्तो ग्रन्थः।[१]

७. <u>तस्य मौलिक-टीका ग्रन्थाः</u>

वराहमिहिरस्य अध्ययनं कियत् अगाधं विस्तृतं चासीत् इति ज्ञातव्यं तर्हि बृहत्संहितायाः सामान्यमध्ययनमपि पर्याप्तम्। कति विषयाः कीदृश्या शैल्या असुलभकाव्यभङ्ग्या वर्णितवान् इति वक्तुम् असाध्यम्। इष्टदेवताप्रार्थनया आरब्धे उपोद्घाते 'मुनिविरचितमिदमिति यत् साधु न मनुजग्रथितम्'[२].....

अनेन विदुषा स्वतंत्रतयापि केचित् ग्रन्था लिखिताः।

१) प्रश्नज्ञानम्, आर्याछन्दोबध्धः७०, श्लोकात्मकः अयं लधु ग्रन्थः अतीव उपयोगी वर्तते।

---

१. मण्डनमिश्रः कुलपतिः, सम्पूर्णानन्दविश्वविद्यालयः- बृहत्संहितायाः शिवसङ्कल्पे , १९९६

२. बृ.सं.- एम् रामकृष्णभट्टः उपोद्घातः – २

२)	भट्टोत्पल होराशास्त्रम् अयं ७५ श्लोकबद्धः ग्रन्थः।

३)	अल्बेरुनिः अनुसारेण भट्टोत्पलेन द्वौ अन्यौ ग्रन्थौ अपि लिखितौ।

१) राहुनिराकरणम्।

२) कर्णपातः।

'आसीत्तमकिलेदं तत्रापां'[१]

वास्तुशास्त्रोपरि अपि एकः ग्रन्थः अनेन लिखितः इति उल्लेखं सः बृहतसंहितायां टीकायां स्वयंकरोति। बृहज्जातकादिग्रन्थानां व्याख्यात्रा भट्टोत्पलेन शकाब्दे ८८८ तमे स्वस्य टीका लिखिता इति सूचितमस्ति। इष्टदेवताप्रार्थनया आरब्धे उपोद्घाते 'मुनिविरचितमिदमिति यत् साधु न मनुजग्रथितम्'[२]..... इत्यादिना अस्मिन् ग्रन्थविशेषे पूर्वजैः कृतस्य अथवा सम्पादितस्य एव ज्ञानस्य ऋजुरीत्या सरलतया च आविष्कारः क्रियते। सूर्यसिद्धान्तम्, बृहत्सिद्धान्तं सिद्धान्तशिरोमणिः भास्करीयम् इत्यादिषु ग्रन्थेषु उक्ताः अयनांशः, भूभ्रमणम् इत्यादिवस्तुतानाम् आधारेण गणना क्रियते चेदपि कालः ज्ञातुं पार्यते। भास्वति ग्रन्थस्यं निर्माता शतानन्दः[३]

**१) <u>रोबर्टबेकरः हावर्ड फेन्डमेन</u> :-**

एतौ द्वौ पाश्चात्यपंडितौ संशोधनं कृत्वा लिखित-वन्तौ अस्माकं शरीरे तादृशी यंत्रणा निर्मिता अस्ति, या सूर्यस्य ऊर्जाम् आत्मसात् करोति। क्वचित् दृश्य वाच्यचक्रं सौरवायुःवर्तते। प्रायः सर्वेपि प्राणिनः सौरचुम्बकेन प्रभाविताः भवन्ति।

**२) <u>अल्बेरुनि : अल्बरुनीज इण्डिया, जिल्द १, पृ-१७४-१७७</u>**

पाश्चात्यः विद्धान् प्रवासी एकादश शतकस्य पूर्वार्धे भारतदेशं आगतः। तस्य हेतुः ज्यौतिषशास्त्रस्य गहनं अध्ययंन इति आसीत्। तेन बृहत्संहितायाः अनुवादः अरबीभाषायां कृतः। लधुजातक नामकस्य अन्य ग्रन्थस्य विपर्ण तेन कृतम्। वराहमिहिरस्य बृहत्संहिता ग्रन्थोपरि तेन टीका लिखिता। तत्र केचन दोषाः दृश्यन्ते। ताराणां उदयकाले प्रातः समये भारतीयाः यज्ञादिकं कर्म प्रारभन्ते किन्तु एतत् सर्व धान्या नां तुषाः इव व्यर्थं प्रतीयते। तत्र गोधूमादिधान्यस्य सारः न दृश्यते, भारतीयैः पण्डितैः अस्य प्रतिकारः कृतः। तुषा धान्यकणान् रक्षन्ति अतः ते न निरर्थकाः किन्तु सार्थकाः सन्ति।

---

१. बृ.सं. एम् रामकृष्णभट्टः उपोद्घातः - ५

२. बृ.सं.- एम् रामकृष्णभट्टः उपोद्घातः - २

३. बृ.सं. रत्नप्रथा पुलियूर - उपोत्घातः पृ. ८

३) <u>**डॉ. थीबोनामकः**</u> पच्चसिद्धान्तिका की भूमिका, PL III-LV

वैदेशिकः विद्वान, मन्यते यत् प्राचीनं भारतीयज्यौतिषं शनैः शनैः नूतनं शास्त्रीय रुपं जग्राह। तस्य मतेन एतेषां सिद्धान्ते भारतीय ज्यौतिषस्य प्राचीनं रुपं दृष्टि- गोचरं भवति। यद्यपि विशिष्ट- सिद्धान्ते ज्यौतिष सिद्धान्ताः अधिकं परिपक्वाः जाताः तथापि तेषां शास्त्रीयता। पैतामहसिद्धान्तात् किंच्चित् न्यूना भारतीय ज्यौतिषस्य प्राचीनः प्रवाहः ग्रीसदेशात् अपि आगच्छति। ग्रीक ज्यौतिषसिद्धान्ताः केचन टोलेमी नाम्ना विदुषा प्रदर्शिताः। अस्मिन् विषये विटने नामकः विद्धान विवेचयति टोलेमीतः प्राक्वर्तमानाः ग्रीकज्योतिषे सिद्धान्तः भारतीय ज्यौतिषं प्रति प्रवाहिताः जाताः।

४) <u>**टोलेमीतः प्राचीनतः हिपार्कसः**</u>

सूर्यचन्द्रगति विषये यान् सिद्धान्तान् निरूपितवान तानेव सिद्धान्तान टोलेमी अपि स्वीचकार। पौलिशसिधान्ताःऽपि भारतीय ज्यौतिषे प्रतिबिम्बिताः दृश्यन्ते। अतः एव एषा उक्तिः अति प्रसिद्धा-

ज्यौतिषे जातकस्कंधकं भारतीयाः पाश्चात्यज्यौतिषेभ्यः गृहीतवंतः , अयं विषयः पंडितैः बहु विवेचितः Franas of Literary Society Madras 1827 अस्मिन् ग्रन्थे विप्नेनामकः पाश्चात्य विद्वान लिखति यत् उपरि निर्दिष्टं विवेचनं वेबरनामकेन विदुषा History of Indian Literature पृष्ठ २५१ एतत् सर्वं शंकरबालकृष्णदीक्षितविरचितान भातीय ज्यौतिषग्रन्थान् श्री विश्वनाथ ... कृत हिन्दी अनुवादात् मया संगृहीतम्। यवनानां ज्यौतिषशास्त्र ज्ञानं – विषये वराहमिहिरः उदार बुद्द्धङ्ङ बृहतसंहिता द्वितीये अध्याये पंचदशे श्लोके लिखितवान्-

**म्लेच्छा हि यवनास्तेषु सम्यक्शास्त्रमिदं स्थितम्।**

**ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद्विजाः।।५।। बृह.सं.अ.२**

५) <u>**कौटिल्येन अर्थशास्त्रे विवेचितं**</u> यत् गृहंक्षेत्रम -आराम सेतुबन्धः तडागः एत् सर्वं वास्तु शब्देन उच्यते।

वेदपुराणेतिहासादिग्रन्थेषु वास्तुशास्त्र निर्देशः अस्ति। ऋग्वेदे वास्तुशब्दस्य उल्लेखः द्वित्रेषु स्थानेषु कृतः दृश्यते। यथा तां वास्तुनि उष्मसि गमध्यै इत्यादि मन्त्रेषु स्पष्टतया निर्देशः दृश्यते। श्रीमद्भागवतपुराणे द्वारिकानगरीवर्णने शास्त्रीयरीत्या वास्तुसंकल्पना दृश्यते। वाल्मीकिरामायणे भगवता रामेण पंचवटी प्रदेशे निर्मिते कुटीरभवने वास्तुपूजनं कृतम्।

अयोध्या लङ्का किष्किन्धा आदीनां नगरीणां वर्णनं तस्मिन्काले वास्तुशास्त्रस्य विचारान् स्पष्टयति। महाकविकालिदासेनअपि रंधुवंशमहाकाव्ये षोडशसर्गे वर्णितं यत् अयोध्यानगर्याः नवीनीकरणं रामपुत्रकुशेन कृतम्। तदनन्तरं वास्तुपूजनं कृत्वा स्व-स्व-भवने प्रवेशः सर्वैः कृतः। महाभारते विश्वकर्मणा निर्मितं लाक्षागृहं इत्यादिकं वास्तुविषयकं वर्णनं भूरिशः वर्तते।

वास्तु विषये एतानि वैदेशिकानां विदुषां मतानि।

वराहमिहिरः ग्रन्थेऽस्मिन गर्गः वृद्धगर्गः, काश्यपः, पराशर, नारन्दः, मनुः, अस्तिः, मयः, अत्रिः, भागुरिः सारस्वतः, विश्वकर्मा, ऋषिपुत्रः, शुक्रः, इत्यादीनां मतानामुल्लेखं तत्र तत्र चकार। अनेन सिद्ध्यति यत्, पूर्वाचार्याणाम् मतानाम् अवलोकनं कृत्वैच आचार्यः, अस्मिन् यत्ने प्रवृत्तः इति।

**६) लियाङ्गाचिचावहमहोदयः लिखति यत्-**

लोकमान्यतिलकमहोदयेनापिस्पकीयओरियननाम्नि ग्रन्थे भारतीयानां नक्षत्रविद्यां विवरणं विषये निष्कर्णे दीयते पूर्वोकतोद्वारणतः सुस्पष्टं जायते- यत्- ज्यौतिषशास्त्रोस्योद्भवस्थानं भारत एव ।

वर्तमानसमयपर्यन्तं यदान्ये हस्तपादादि क्रियाणामनभिन्ना आसन् तदैवावायुभयभ्रातरौ (भारत चीन देशो) **Letter on India , P 109-111**

मानवसम्बन्धितसमस्यानां प्रश्नानां साधनं ज्यौतिषविज्ञान द्वारा निराकरणे समथावास्ताम् ।[१]

**७) प्रो. मैकसूलर महाशयेन स्पष्टशब्देन लिखितं यत्-**

भारतीयनामन्तरिक्षमण्डलस्य तथा च नक्षत्रमंडलस्य ज्ञानार्थमन्यदेशानामनृष्यं , नास्ति, अपितु भारतदेश एव तस्यं आविष्कारः। **इण्डिया कैन इट टीच अस पृ. .३६०-३६६**

**८) बर्जेशमहोदयेन अपि लिखितम्-**

वर्जेशमहोदयस्तुं ज्यौतिषस्य प्रभावत तथा च सूर्यसिद्धान्तनामकस्य प्रसिद्धग्रन्थ-स्योपरि आङ्लभाषायां टीकामपि लिखितवान् । ततैव परिशिष्टे निर्दिष्टं भारतीयज्योतिषं टोलमीहोदयस्य सिद्धान्तं नाश्रितवान् । कारणमिदं यत् खिस्ताब्दात् पूर्वकाल एव ज्योतिषस्य पर्याप्तं ज्ञानं भारतीयानामासीत् ।[२] **सूर्यसिद्धावीस्य अंग्रेजी अनुवादः।**

---

१. भारतीय. ज्यो. प्र.अ.पृ.२४,२६

२. भा.ज्यो.ने.शा.

**९) डॉ. मार्गेन महोदयः Ancient and Mediaeral India Vol. I., P. 374**

भारतीयानां गणितज्यौतिषं ज्यौतिषं च पाश्चात्यदेशस्य कस्यापि गणितस्य ज्यौतिषस्य वापेक्षया महत्वपूर्णम् अस्ति इति डॉं मार्गेन महोदयस्य मतम् अस्ति ।

**१०) फान्सीस पर्यटकः । ट्रावेल्स इन दी मुगल इम्पाायर पृ-३२९**

फान्सीस पर्यटकः महोदयेन मते फान्सीस पर्यटकः क्राक्वीस वर्णियरेणापि भारतीयज्योतिषः स्याध्ययनेनांकत्म् यत् "भारतीयाः स्वग्रणनाद्वारैव चन्द्रग्रहणस्य, सूर्यग्रहणस्य च शतप्रतिशतं सत्यां भविष्यवाणीं कुर्वन्ति, अतस्तेषां ज्यौतिषं प्राचीनं तथा च मौलिकं च वर्तते " ।[१]

प्रत्येकाध्यायस्य विषयानवलोक्य अनेन क्रमेण विश्लेषणं क्रियतेऽत्र।

(नासदीयसूक्तसमानं)[२] इत्यादिभिः पद्यैः प्रपञ्चोत्पत्तितः आरभ्य विविधान् विषयान सोदाहरणं विवृणोति आचार्यः। दैवज्ञलक्षणम्, आदित्यचारम् इत्यारभ्य सप्तर्षिचारपर्यन्तं विविधग्रहाणां नक्षत्राणां च चारफलविवरणं क्रियते।

१. भारतीय ज्योतिष, नेमि. चन्दशास्त्री प्रथम अ.पृ.२४-२६

२. ऋ.वे. - नासदीयसूक्तम् - ८/७/१७

## वरामिहिरः

नवाधिकपञ्चशतसंख्यशाके वराहिमिहिराचार्यो दिवं गतः।

धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटखर्परकालिदासाः।

ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुर्चिनव वित्र्कमस्य।।[1]

वर्षैः सिन्धुरदर्शनाम्बरगुणै ३०६८ र्याते कलौ संमिते

मासे माधवसंज्ञिते च विहितो ग्रन्थक्रियोपक्रमः।।[2]

स्वस्तिश्रीनृपसूर्यसूनुजशके याते द्विवेंदाम्बरत्रै

३०४२ मानाब्दमिते त्वनेहसि जय वर्षे वसन्तादिके।

चैत्रे श्वेंतदले शुभे वसुतिथावादित्यदासादभूद्वेदांगे निपुणो वराहमिहिरो विप्रो खेराशिभिः।।[3]

वक्रानुवक्रास्तमयोदद्यास्ताराग्रहाणां करणे मयोक्ताः।

होरागतं विस्तरतश्च जन्मयात्राविवाहैः सह पूर्वमुक्तम्।।१०।।[4]

अध्यायानां विशतिः पञ्चयुक्ता जन्मन्येतद्यात्रिकं चाभिधास्ये।।३ ।।

.....विवाहकालः करणं ग्रहाणां प्रोक्तं पृथक् तद्विपुला च शाखा।।६ ।।[5]

होराशास्त्रं वृत्तैर्मया निबद्धं निरीक्ष्य शास्त्राणि।

यत्तस्याप्यार्याभिः सारमहं सम्प्रवक्ष्यामि।।१ ।।[6]

अष्टादशभिर्बध्वा ताराग्रहतन्त्रमेतदध्यायैंः।

भजते वरामिहिरो ददाति निमेत्सरः करणम् ।।६५।।[7]

यत्तत्परं रहस्यं भ्रमति मतिर्यत्र तन्त्रकाराणाम् ।

तदहमपहाय मत्सरमिस्मन् वक्ष्ये ग्रहं भानोः।।५।।

दिक्स्थितिविमर्दकर्णप्रमाणवेलाग्रहाग्रहाविन्दोः।

ताराग्रहसंयोगं देशान्तरसाधनं चास्मिन् ।।६।।

सममण्डलचन्द्रोदय- यन्त्रच्छेद्यानि ताण्डवच्छाया।

उपकरणाद्यक्षज्जावलम्बकापक्रमाद्यानि।।७।।[8]

---

१. ज्योतिर्विदासभरण

२. रघुवंश कुमारसम्भव, कवि कालिदास

३. व.मि.

४. बृहज्जातक, अध्याय-१

५. बृहज्जातक, उपसंहराध्याय

६. ग्रन्थ लघुजातक

७. पञ्चसिद्धान्तिका-अध्याय १८।

८. सिद्धान्तोस्य मध्यम ग्रह तथा ग्रहण-विचारो, अध्याय-१ ।श्लोक ५-७

### ब्रह्मगुप्तकालः

श्रीचापवंशतिलके श्रीव्याघ्रमुख्ये नृपे शकनृपाणाम्।
पञ्चाशत्संयुक्तैर्वर्षशतैः पञ्चभि ५५० रतीतैः।।७।।
ब्राह्मस्फुटसिद्धान्तः सज्जनगणितज्ञगोलवित्प्रत्यै।
त्रिंशद्वर्षेण कृतो जिष्णुसुतब्रह्मगुप्तेन।।८।।[1]

### करणप्रकाश (काल तथा कर्ता)

नत्वाहमार्यभटशास्त्रसमं करोमि श्रीब्रह्मदेवगणकः करणप्रकाशम् ।[2]
भोज्यं यथा सर्वरसं विनाज्यं, राज्यं यथा राज विवार्जितञ्चा।[1]
सभा न भातीव सुवक्तृहीना, गोलानाभिज्ञः गणकस्तथात्र।।
वादी व्याकरणं विनैव विदुषां धृष्टः प्रविष्टः सभाम्।
जल्पन्नल्पमतिः स्मयातं पटुबटुभ्रूभङ्गवक्रोक्तिभिः।।
ह्रीणः सन्नुपहासमेति गणको गोलानभिज्ञस्तथा।
ज्योर्तिर्वित्सदसि प्रगल्भगणकप्रशनप्रपञ्चोक्तिभिः।।[2]

## वराहमिहिरस्य व्यक्तित्वं एवं कृतित्वम्

आदित्यदासतनयदवाप्तबोधः।कापित्थके सवितुर्लब्धवरप्रसादः।।
आवन्तिको मुनिमतान्यवलोक्यसम्यक्। होरां वराहमिहिरो रुचिरां चकार।।
दिनकरमुनिगुरुचरणप्रणिपातकृतप्रासदमतिनेदम्।
शास्त्रमुपसङ्गहीनं नमोऽस्तु पूर्वप्रणेतृभ्यः।।
अशेष जगदज्ञानतिमिरौधरविप्रभा ... तत्राऽमवद् द्विजवरः
परमप्रतिष्ठापात्रं यशोनिधिरशेषगुणानुरोगी।
विद्या तपो विनयकीर्त्यतुलः पृथिव्यां सन्तोषकृद् गुणवतां
शिवदासनामा शिवदासात्मजो गङ्गादास.. तत्पुत्र कृष्णादेव :
तच्चरणाम्बुजरेणो : प्रसादमासाद्या तत्सुतो
गुणवान् किल पद्मनाभनामा। कुरुते व्यवहारदीपिकाख्यम्। व्यवहार प्रदीप
धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभटट्घटखर्परकालिदासाः।

---

१. ब्राह्मस्फुट सिद्धान्त,श्लोक-८
२. करणग्रन्थ
३. गोलकुशलता तथा ग्रहगाविता
४. भास्कराचार्य ग्रहगोलाध्यायः

**ज्यौतिषर्विदाभररम् कालिदासकृतम्**

ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वैवररुचिर्नव विक्रमस्य।। [1]

विस्तरकृतानि मुनिभिः परिहृत्यपुरातनानि शास्त्राणि।

होरातंत्र रचितं वराहमिहिरेण।। संक्षेपाता मुनिभिः

राशिदशवर्गभूपतियोगायुर्दायगोदशादीनाम्।

विषय विभागैः स्पष्टः कर्तु नो शक्यते यतस्तेन।।

अतएव विस्तरेण यवननरेन्द्रादिरचितशास्त्रेभ्यः।

सकलमसारं त्यक्त्वा तेभ्यः सारमुदधृत्य।।

देवग्रामपयः प्रपोषणबलाद्ब्रह्माण्डसञ्जरकीर्तिः।

सिंहविलासिनीव सहः साथस्नेहभक्त्या गताः।।

होरां व्याध्रपदीश्वरो रचयति स्पष्टां तु सारावलीम्।

श्रीमान शास्त्रविचारनिर्मलमनाः कल्याणवर्माकृती।।

होरात्युष्णार्थनां शिष्याणां स्फुटतरार्थ शिशिरजला।

कल्याणवर्माशैलावदीह सारावली प्रसृता इति।।[2]

**बृहत्संहिता –**

बृहत्संहिता वाराही संहिताप्युच्यते। अस्य प्रणेता वराहमिहिराचार्योऽस्ति। स हि ४२७ मितशकाब्दमभित आसीत्। बृहत्संहितायां षडधिकशताध्यायाः सन्ति। यत्र निरूपितविषया यथा तेनैवोक्तम्-

**बृहत्संहिता-**

संहित+टाप् प्रत्यये संहिता शब्दः निष्पन्नः। आचार्यवराहमिहिरानुसार 'संहिता' शब्दस्य अर्थः भूकम्पः-ग्रहणः-उत्पातः-दिग्दाहः ग्रहचारः च इत्यादीनाम् अवस्था सम्बधनेन यः फलस्य सिद्धिर्भवति सः ज्यौतिषस्यभागः संहितानाम्ना कथ्यते।

वराहमिहिरः पञ्चसिद्धान्तिका च - यद्यपि ज्यौतिषशास्त्रे वराहमिहिरस्य सर्वातिशायि स्थानं अस्ति। वराहमिहिराचार्य आर्यभटस्य समकालिकः निर्देशः भवति। प्रसिद्धः गणितज्ञः भास्कराचार्ये वराहमिहिरस्य कार्यहेतवे प्रशंसा अस्ति। अर्वाचीनकालतः वर्तमानयुगस्य मध्य पर्यन्तम् वराहमिहिरस्य रचनायाः भारतीयज्यौतिषे एकः कीर्तिस्तम्भः परिदृश्यते। स्वकीयप्रतिभायाः लक्षणस्य कारणं वराहमिहिरः एकः कालजयीज्यौतिषिक इति प्रसिद्धः। अतः पंचसिद्धान्तिकाग्रन्थे वराहमिहिरस्य प्रतिभायाः दर्शनं प्राप्तं भवति।

१. ज्योतिर्विदाभरम् कालिदासकृतम्
२. सारावलीग्रन्थः कल्याणवर्मकृतः

आचार्यवराहमिहिरे संहितायाः भेदाः तथा विषयवस्तूनां विस्तृतं वर्णनं प्राप्तं भवति। यथा- सूर्यादिग्रहाणां संचारः- प्रमाणवर्णः (बिम्बेन परिमाणः)- किरणः-द्युति संस्थानः ग्रहाणां उदयास्तः-मार्गः- वक्र-नक्षत्राणां सह ग्रहसमागम-अगस्त्यः संचारः-ग्रहयुद्धः-ग्रहसमागमः-गर्भलक्षणं-रोहिणीयोगः स्वातियोगः-आषढीयोगः वर्षाज्ञानं - उल्कापात-दिग्दाहस्य लक्षणं तथा अभावः-भूकम्पः-धूलिलक्षणं-अंगविद्या-वायसविद्या अन्तरचक्रं-मृगचक्रं-मृगचक्रं-प्रासादलक्षणं-खंजनलक्षणं-रत्नपरीक्षा दीपलक्षणं-दन्तकाष्ठं च इत्यादिनां द्वारा शुभाशुभ फलस्य लक्षणं जगतेः प्रत्येकः पुरूषस्य तथा राज्ञस्य पूर्वोक्त प्रत्येकः लक्षणस्य विचारसहितायाः विभागः अस्य विषयस्तु अस्ति। सामान्यतः संहिताशास्त्रे सूर्यादीनां विशेषेण नक्षणेन सहोदयेन प्राणिषु सम्भवी प्रभावो ग्रहकृतपरिवर्तनं वर्षादियोगश्च निरूपणीय विषयेष्वन्यतमाः। अस्य मुख्यविषयः मुहूर्तज्ञानमस्ति। पृथक्शास्त्रत्वेन संहिता कद्वोदो जातः इति तु न शक्यते इदमित्थन्तया वक्तुम्। बृहत्संहिताकृवराहमिहिराचार्यो स्वपूर्ववर्तित्वेन गर्गपराशर-असित-देवल-वृद्धवर्ग-कश्यप-भृगु-वशिष्ठ-बृहस्पति-मनु-मय-सारस्वत-ऋषिपुत्रादीनां संहिताः कृताः दृश्यन्ते तत्र तत्र। संहितायाः विविधग्रन्थाः सन्ति।

**'सौम्यायनं मासषट्कं मृगाधं भानुयुक्तितः।**

**अहः सुराणां तद्रात्रिः कर्काधं दक्षिणायनम्।। इति। (१) संवत्सरफलमुक्तम्**

ततश्च द्वितीयाध्याये सूर्यादिनवग्रहचाराः कथिताः। तृतीये निरूपितं पञ्चवन्ति नवमानानि ब्रह्मदैवमानुषपित्र्यसौर सावनचान्द्र नाक्षत्रबार्हस्पत्य भेदात्। ग्रन्थोक्तं पद्ग्रहणं सौरमानतः गर्भादिकं सावनतः नाक्षत्रमानतः यात्रोद्वाहव्रत क्षौर तिथिपर्वादि तु चान्द्रमानतो गुरूमानेन प्रभावादधब्द लक्षणमेव। ततः पष्टिसंवत्सराणां नामान्युक्तानि अत्रैव। ग्रन्थोक्तं यत्पञ्चभिर्वषैर्युगं भवति द्वादश युगानि च। ततश्च युगेश्वराः प्रोक्ता विष्णवाधाः। ततः संवत्सरफलमुक्तम्। यथा उक्तम्।

अस्मिन्ग्रन्थे भट्टोत्पलकृता विस्तृतटीका लभ्यते। अत्रैव वराहमिहिरेण यात्राविवाहप्रकरणे नैव समावेशिते तयोः संहिताङ्गत्वेऽपि। सम्भवति तत्तद्विषये तेनैव पृथक्पृथग्ग्रन्थ प्रणीतत्वात्तथा कृतं स्यात्। योगयात्रा विवाहपटलः विवाह-खण्डः ढौकनिकयात्रा-दिक्रिनीयात्रा-ग्रहण्डलपटलं समास संहिता च इत्यस्यैवान्ये संहिताविषयकग्रन्थाः। अत्र योगयोत्रायां राज्ञां यात्राविषये विस्तरतो विचारितमस्ति। पञ्चपक्षीभविष्यदर्थ प्रकाशको ग्रन्थः। समाससंहिता सम्भवति बृहत्संहितायामेव संक्षिप्तरुपम्। बृहत्संहितायाः पूर्वेडपि तत्तद्विषये ग्रन्थाः प्रोक्ताः प्रणीता वा आसन्निति। मुहूर्ततत्त्वे यद्यपि

ग्रन्थान्तरापेक्षया बहवः एव विषयाः सन्ति। किन्तु न तथा यथाऽभीष्टाः। तेन शङ्कर बालकृष्णः सत्यमेव कथयति यद्वराहमिहिरानन्तरं संहितैव लुप्तप्राय इति। संहिताविषयेषु केवलं मुहूर्तखण्डमेव सम्प्रत्यपि सजीवम्। मुहूर्तो नाम कृत्यनिमितानिश्चितसमयः। यथा - विवाहमुहूर्ता इति। कृत्य विशेषनिमित्तग्राह्यग्राह्य-तिथिवार नक्षत्रादिविचार अस्य मुहूर्तस्य ग्रन्थस्य प्रयोजनमस्ति। सामान्यतः मुहूर्तस्य व्यवहारेण सहापरिहार्यः सम्बन्धः। निषेकादिश्मशानान्ता ये संस्काराः कर्षणादारम्य कुसूलपूरणपर्यन्तं यत्कृषिकर्म चुल्लिका-निर्माणादिकं यद् गृहकर्म यात्रारम्भः शिलान्यासादाभ्य गृहपवेशनपर्यन्तं यन्निर्माणकर्म ते सर्वेऽपि शुभमुहूर्त एव भवन्ति। अथाऽत्र कतिपये ज्ञाताः मुहूर्तग्रन्थाः अत्रोपस्थाप्यन्ते सारतः।

महाभारतेऽपितु वाल्मीकीये रामायणेऽपि-संहिताविषयाः उल्लिखिताः भवन्ति। यथा-

**'युक्ते मुहूर्ते विजये सर्वाभरणभूषितैः।**

**भ्रातृभिः संहितो रामः कृतकौतुकमङ्गलः।। १ (१/७३/०९)**

**नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु।**

**ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह।।२ (१/१८/८-९)**

**नारदसंहिता –**

नारदसंहिता पञ्चपञ्चाशदध्यायेषु विभक्ता अस्ति। अत्रैव मङ्गलाचरणानन्तरमष्टा-दशज्योतिः शास्त्रप्रवर्तकानाम् इत्थं निर्देशाः

**'ब्रह्माऽऽचार्यो वशिष्ठोऽत्रिर्मनुः पौलस्त्यरोमशौ। आचार्यः सूर्य इति परम्परा।**

**मरीचिरङ्गिरा व्यासो नारदः शौनको भृगुः।**

**च्यवनो यवनो गर्गः कश्यपश्च पराशरः।**

**अष्टादशैते गम्भीरा ज्योतिः शास्त्रप्रवर्तकाः।। इति (२-३) नारदसंहिता**

## १. ज्यौतिषशास्त्रस्य विकास :

ज्यौतिषशास्त्रमपि शास्त्रान्तरवत्कतिपयावस्थाम् अतिक्रम्य साम्प्रतिकीम् अवस्थां प्राप्नोति। मानवस्य मौलिकप्रवृत्तिः जिज्ञासा एवास्ति।

यथा-हि स भोक्तुम् इच्छति-रन्तुम्इच्छति-आत्मानं प्रकटयितुम् इच्छति तथैव स स्वं परश्च ज्ञातुम् इच्छति। ज्ञानस्य आविष्कारिणी जिज्ञासा एव अस्ति। ग्रहनक्षत्रविषयकजिज्ञासा एव ज्यौतिषशास्त्रस्य आविर्भावे हेतुः। व्यवहारे पशुवदपि मानवोऽनादिकालाद् एव दिवस-रात्रि-अयनादि विषये स्वल्पम् अपि जानाति स्म। ज्यौतिषशास्त्रस्य विकासः पश्चसु अवस्थासु विभक्तः दृश्यते-प्राग्वैदिककालः वैदिकसंहिताकाः, वेदाङ्गकाल, सिद्धान्तकालः आधुनिककालश्च इति अथवा अज्ञातकालः, आदिकालः पूर्वमध्यमकालः, उत्तरमध्यमकालः आधुनिककालश्च इति। अस्य हि प्राग्वैदिककालऽज्ञातकालो वा नितान्तः एव ज्ञातोऽस्माभिः। वैदिकसंहितासु यादृशं ज्यौतिषस्य स्वरूपं प्राप्तं लभ्यते तदाधारेण वयम् अनुमातुं प्रभवामो यत्तत्पूर्वम् अपि ज्यौतिषस्य यत्किश्चित् आसीत् इति। वैदिककालः ऋग्वेदकालाद् आरभ्य लगधपर्यन्तं चलति। आधुनिककाले ज्यौतिषे वराहमिहिरस्य अतिशयः प्रभावः वर्तते। तस्य त्रयःस्कन्धा ज्यौतिषशास्त्रस्य विषये अतीवमहत्वपूर्णप्रभावशीलाः अभवन्। उत्तरमध्यमकाले यावनगणकैः तथा आरवगणकेन सह भारतीय गणकानां सम्मेलने तेषां सम्पर्केण ज्यौतिषशास्त्रे विविधाः नवीनताः प्रविष्टाः। तस्य प्रभावस्य फलं ताजिकम् एव अस्ति नीलाम्बरादारभ्य आङ्गलसम्पर्केण गणिते नूतनं परिपाटी प्रविष्टा। एतेषां सम्पर्केण भारतीय ज्यौतिषे किश्चिन्मौलिकं सज्जातम्। तथापि भारतीयज्यौतिषे स्वकीयं वैशिष्टयम् अतीव सुदृढमस्ति।

ज्यौतिषशास्त्रम् "सूर्यादिग्रहाणां बोधकं शास्त्रम्" तथा "कालगणना" प्रकार एव अस्ति।

प्राचीनकाले ब्रह्मशौनकभृगुच्यवनबृहस्पतिवशिष्ठपाराशरअत्रिमनुपौलस्त्यलोमसमरीचि-अंगिरो-जैमिनी-व्यास-नारद-गर्ग-आर्यभट्ट-लल्ल-ब्रह्मगुप्त-वराहमिहिर-श्रीपति-भास्कराचार्य-मुनीश्वर-ज्ञानराज-कमलाकरभट्टाः एते प्रधाना ज्योतिर्विदः विद्वांसः सन्ति। नवीनेषु नीलाम्बर-बापूदेव-सुधाकर-शङ्करबालकृष्ण-योगेशचन्द्र-केतकर-आप्टेप्रभृतयो विद्वांसः परिगण्यन्ते गणकत्वेन।

## ज्यौतिषशास्त्रस्य परिचय :

ज्यौतिषशास्त्रम् किमस्ति ? - सूयादिग्रहाणां स्थित्यनुसारेण मनुष्येषु उत्पतिः एवं स्थितिः तथा विकासः एतेषां त्रयाणां विषये अनुकूलं तथा प्रतिकूलं विषयं ज्ञातुं शक्यते तत् शास्त्रस्य नाम ज्यौतिषशास्त्रमस्ति। ज्यौतिषमेकमागमशास्त्रमस्ति। ज्यौतिषशास्त्रं विज्ञाानमेवास्ति। तत्र नास्ति मतद्वयम्। ज्यौतिषशास्त्रान्तर्गताः अनेकविधाः विभागाः सन्ति। ज्यौतिषशास्त्रे अनन्तगूढार्थ-विषयाः सन्ति। वर्तमानकालानुसारेण ज्यौतिषशास्त्रस्य उपयोगिता कया रीत्या भवति ? वर्तमानसमये एतस्य ज्यौतिषशास्त्रस्य पूर्वार्धभागः एकमान्यरूपेण स्वीकृतमस्ति। अधुना भारतवर्षस्य एतत्-विषय सम्बन्धी अनेकविध शाखायां विज्ञानेन प्रमाणतया अधिकारः नैव भवति। एतत् सत्यमस्ति।

भारतीयाना कृते सर्वप्रथमा आद्या ग्रन्था वेदा वर्तन्ते। वेदेषु विविधप्रकारस्य ज्ञानं विज्ञानं च वर्तते- इत्यत्र नास्ति शङ्कलेशोऽपि। वेदानां सम्यग्ज्ञानार्थं वेदाङ्गानां प्रवृत्तिः। ज्यौतिषं वेदाङ्गेष्वेकतमम्। महर्षिर्याज्ञवल्क्यश्चतुर्दशविद्यास्थानानामुल्लेखं करोति - तद्यथा -

**पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।**

**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।।**[1]

## वेद-नेत्र-ज्यौतिषम्

नमो देवि ! महाविद्ये ! नमामि चरणौ तव।
सदा ज्ञानप्रकाशं मे देहि सर्वार्थदे शिवे।। १ ।।
यत्कृपालेशलेशांशलेशलेशलवांशकम्।
लब्ध्वा मुक्तो भवेज्जन्तुस्तां न सेवेत को जनः।।२ ।।
स्वयमाचरते शिष्यानाचारे स्थापयत्यपि।
आचिनोतीह शास्त्रार्थानाचार्यस्तेन कथ्यते।।३ ।।
चराचरसमासन्नमध्यापयति यः स्वयम्।
यमादि योगसिद्धत्वादाचार्य इति कथ्यते :।।४ ।।
जन्महेतु हि पितरौ पूजनीयौ प्रयत्नतः। गुरुर्विशेषतः पूज्यो धर्माधर्मप्रदर्शकः।।५ ।।
हरिदतः पितुर्नाम बलदेवो गुरुस्तथा। यदीयचरणाम्भोजं ग्रहाणां ज्ञानदायकम्।।६ ।।[1]
भूतंभव्यं भविष्यं व सर्व वेदात्प्रसिद्धयतिः ।[2]

---

१. याज्ञ. स्मृ. -१.३
२. बृ.जा. , श्लोक-१-६
३. मनुस्मृति-मनुः एवाचः

## प्राचीन भारतीय ज्यौतिषम्

वेदास्तावद् यज्ञकर्मप्रवृताः यज्ञाः प्रोक्तास्ते तु कालाश्रयेण।

शास्त्रादस्मात् कालबोधो यतः स्याद् वेदाङ्गत्वं ज्यौतिषस्योक्तामस्मात्।।

शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं कल्पः करो।

या तु शिक्षाऽस्य वेदस्य नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः।।

वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।

संयुतोऽपीतरैः कर्णनासादिभाश्चक्षुषाऽङ्गेन हीनोन किञ्चित् करः।।

तस्मात् द्विजैरध्ययनीयमेतत् पुण्यं रहस्यं परमञ्च तत्वतम्।

यो ज्योतिषां वत्ति नरः स सम्यग् धर्मार्थकामान् लभते यशश्च।।[१]

तिस्त्रो द्यावः सवितुर्द्धा उपस्यों एका समयस्य भूवेन विराषाद।

आणि न रथ्यममृतादि तस्युरिह ब्रधीनु य तच्चिकेतन।।[२]

आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्य च हिरण्मेयन सविता रथेना देवो याति भुवनानि पश्यन्।[३]

सविता यन्त्रैः पृथिवीमरम्णादस्कम्भने सविता द्यामदृहत अश्वमिवाधृक्षद्धु-निमन्तरिक्षमर्तू ते बद्धं सविता समुद्रम्।[४]

अत्राह गोरमन्वतनाम त्वष्टुरपोच्यम् इत्था चन्द्रमसो ग्रहे।[१]

चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि। न वो हिरण्यनेमयः पदं विदन्ति विद्युतो वित्तं में अस्य रोदसी।[२]

चंद्रमा वै पंचदशः। एष हि पंचदश्यामपक्षीयते।। पंचदश्यामापूर्यते [३]

वेद मासो धृतव्रतो द्वादश प्रजावतः।। वेदा य उपजायते।।[४]

---

१. बृ.जा.-भास्कराचार्यः निर्दिष्ट।
२. ऋ. मं.सू. ३५. मं.ध.
३. (य.वे.अ.३३मं.४३)
४. (ऋ.मं.१० सं० १४९ म.१)
५. ऋ.मं.१ सू. ८४ मं१५
६. ऋ. मं. १ सू. १०५ मं १
७. तैतरीय ब्राह्मण १.५.१०
८. ऋ. सं. १.२५.८

मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वाहेस्वाय स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहांहस्पतये स्वाहा।। [१]

अरुणोरुणरजाः पुण्डरीको विश्वजिदभिजित्।

आर्द्रः पिन्वमानोन्नवान् रसवानिरावान्।

सर्वोषधः संभरो महस्वान्।।[२]

चतुर्भिः साकं नवति च नामभिश्चक्रं न वृतं व्यतीर्खींविपत्।

बृहच्छरीरो विमिमान ऋृक्कभिर्युं वाकुमारः प्रत्येत्याहवम्।।[३]

द्वादशारं नहि तज्जराय बर्वतिचक्रं परिद्यामृतस्य।

आपुत्रा अग्ने मिथुनासो अत्र सप्तशतानि विशतिस्य तस्थुः।।[४]

बंसतो ग्रीष्मो वर्षाः। ते देवा ऋतवः शरद्धेमंत : शिशिरस्ते पितरौ.. स (सूर्यः) यत्रो तगावर्तते देवेषु तर्हि भवति यत्र दक्षिणावर्तते पितृषु तर्हि भवति।। [५]

तस्मादादित्यः षण्मासो दक्षिणेनैति षड्त्तरेण। [६]

ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यञ्च गौरवम्।।

सौरं च सावनं चान्द्रमार्क्ष मानानि वै नव।।[७]

यां पर्यस्तमियादभ्युदियादिथि सातिथिः।।[८]

अपत्ये तायवो यथा नक्षत्रा यंत्यक्तुभिः सूराय विश्वचक्षसे।।[९]

अथो नक्षत्राणामेशामुपस्थे सोम आहित।।[१०]

---

१. वा.सं. २२.३१
२. तै. ब्रा. ३.१०.१
३. ऋ. म. १ सू. १५५ मं.६
४. ऋु. मं. सू. १६५ मे १६
५. शनपथ ब्राह्मण
६. ते. सं. ६.५.३
७. सू.सिद्धांत
८. ऐ. ब्रा. २३.१०
९. ऋ. सं. १.५०.२.२
१०.ऋ. सं. १७.८५.२ अथ सं. १४.१.२

ज्यौद्रागः खे रवे ही रोषा चिन्मूषकण्य सूमा धानः।

रेमृधास्वापोजः कृष्योहि ज्येष्ठा इत्यक्षालिंगैः यो।।[1]

क वर्गाक्षराणि वर्गेऽवर्गाक्षरणि कात् ङ् मौ यः

ख द्विनवकेस्वरा नव वर्गोऽवर्गे नवान्त्यवर्गे वा।।[2]

अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमगः यद्वत्।

अचलानि भानि तद्वत् समपश्चिमगानि लङ्कायाम्।।[3] :

आचार्य भटोदितं सुविषमं व्यमोकसां कर्म

यच्छिष्याणामभिधीयते तदधुना लल्लेन धीवृद्धिदम्।

विज्ञाय शास्त्रमलमार्यभटप्रणीतं तन्त्राणि यद्यपि कृतानि तदीयशिष्यैः

कर्मक्रमो न खलु सम्यगुदीरितस्तैः कर्मक्रमो न खलु सम्यगुदीरितस्तै

कर्म व्रवीम्यहमतः क्रमशस्तु सूक्तम्।[4]

कालवर्गीकरणदृष्टानुसारं अस्य शास्त्रस्यकालः निम्नयुगानां मध्ये विभक्तोऽस्ति।

अन्धकारकाल :- ई पू. १०००० वर्षाणां पूर्वे

उदयकाल :- ई.पू. १०००१ ई.पू. ५०० पर्यन्तम्

आदिकाल : ई.पू. ५०१ ई. १५०० पर्यन्तम्

पूर्वमध्यकाल :- ई. ५०१ ई. १००० पर्यन्तम्

उत्तरमध्यकाल :- ई. १०००१ ई. १६०० पर्यन्तम्

आधुनिक तथा अर्वाचीनकाल :- ई. १६०१ ई. इदानीं पर्यन्तम्

एतेषां कालानां वर्गीकरणं ज्यौतिषशास्त्रस्य विकासाधारेण निर्दिष्टं भवति।

**सिद्धान्तकालः ई.पू. १००० तः ई.वू. ५०० पर्यन्तम्**

सिद्धान्तस्कन्धः

(१) पितामह सिद्धान्तः ई. पू. १००० अनुमानम्

(२) वशिष्ठसिद्धान्त : ई.पू. ५०० अनुमानम्

(३) रोमकसिद्धान्त : ई.पू. १५० अनुमानम्

(४) पुलिश सिद्धान्त : (अनुपलब्ध)

---

१. वेदांग ज्यौतिष

२. आर्य भट्टीय अंक संकेत खगोलज्ञः

३. आर्यभट्ट खगोलज्ञ

४. बृ.जा.

(५) सूर्यसिद्धान्तः (४२० शक पू.)

(६) आर्यभटी (४२० शक)

(७) सिद्धान्त पंचचशिका (४२७ शक)

(८) ब्रह्मस्फुट सिद्धान्त : (५२० शक)

(९) श्रीवृद्धिद तन्त्रम् (५१० शक)

(१०) सिद्धान्त शेखरः (१९ शक)

(११) सिद्धान्त शिरोमणिः (१०३६ शक)

**ग्रहगणित सिद्धांत ज्यौतिषम् (खगोल विज्ञान ज्योतिष)**

लक्षं वेदाश्चत्वारो लक्षं भरत एव च।
लक्षं व्याकरणं प्रोक्तं चतुर्लक्षन्तु ज्यौतिषम्।।[१]
श्री वैष्णंवंत्रयोविशच्चतुर्विशति शैवकम्।।
दशाष्टौ श्री भागततं नारदं पञ्च विशतिः।।
मार्कण्ड॑ नव वाह्नं च दशपंचचतुः शतम्।
चतुर्दश भविष्यं स्यात्तथा दशपञ्चशतानिच।।
दशाष्टौ ब्रह्मवैवर्त लिङ्गमेकादशैवतु।।
चतुर्विशति वाराहमेकाशीति सहस्त्रकम्।
स्कान्दं शतं तथा चैकं वामनं दश कीर्तितम्।।
कौर्म सप्त दशाख्यातं मात्स्यं तत्तुचतुर्दश।
एकोनविंशति सौपर्ण ब्रह्माण्डं द्वादशैव तु।।
एवं पुराण सन्दोह श्चतुर्लक्ष उदाह्रत :।
तथाष्टादशसाहस्त्रं श्री भागवतमिष्यते।।
कृती जयति जिष्णुजो गणकचक्रचूडामाणि,
र्जयन्ति ललितोक्तयः प्रथिततंत्रसद्युक्तयः।
वराहमिहिरादयः समवलोक्य येषां कृतीः,
कृती भवति मादृशोऽप्यतनुतंत्रबंधेऽल्पधीः।।[२]

---

१. चरणब्यूह

२. बह्मस्फुटसिद्धान्त

त्रुट्यादि प्रलयान्तकालकलनामानप्रभेदः क्रमात्।
चारश्चद्युसदां द्विधाचगणितं प्रश्नास्तथा सोत्तराः।।
भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते।
सिद्धान्त स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः।।
जानन् जातक संहिता सगणितस्कन्धैकदेशा अपि।
ज्योतिश्शास्त्रविचारसारचतुरप्रश्नेस्वधिञ्चित्करः।।
यः सिद्धान्तमनन्तयुक्तिविततं नो वेत्ति भितौ यथा।
राजा चित्रमयोऽथवा सुघटितः काष्ठस्य कण्ठीरवः।।
गर्जत्कुञ्जरवर्जिता नृपचमूरप्यूजिताऽश्वादिकै
रुद्यानं च्युतचूतवृक्षमथवा पाथोविहोनं सरः।।
योषित्प्रोषितनूतनप्रियतमायद्धन्नभात्युच्चकै-
र्ज्योतिश्शास्त्रमिदं तथैव विबुधाः सिद्धान्तहीनं जगुः।।[१]

## खगोलशास्त्रेण ज्यौतिषशास्त्रस्य साम्यं, भेदश्च

### (Similarity and Distinction Between Astronomy and Astrology)

आचार्यबृहस्पतिमतेन प्रथमशास्त्रं सिद्धान्तः तथैव द्वितीयशास्त्रं जातकं तथा तृतीय शास्त्रं संहितानाम्नः ज्यौतिषशास्त्रस्य भेदत्रयमस्ति। (१) सिद्धान्तः (२) संहिता (३) होरा श्रीनारदानुसारं सिद्धान्तः-संहिता-होरा च ज्यौतिषशास्त्रस्य त्रयः विभागाः सन्ति। एते त्रिस्कन्धाः ज्यौतिषशास्त्रस्य भेदाः कथ्यन्ते। आचार्य बृहस्पतिः-

**स्कन्धत्रयात्मकं शास्त्रमाद्यं सिद्धान्तसंज्ञितम्।**
**द्वितीयं जातकं स्कन्धं, तृतीयं संहिताह्वयम्।।**

ज्यौतिषशास्त्र दिव्यविज्ञानमेवास्ति। भूत-भविष्य वर्तमानकालानां ज्ञानं तथा प्रकृत्याः विविधः गूढ रहस्यानां उद्घाटनं कर्तुं शास्त्रं एव ज्यौतिषशास्त्रमस्ति। श्रीनारदमतेन ज्यौतिक्षशास्त्रस्य मुख्यतया त्रयः विभागाः सन्ति।

**सिद्धान्तः संहिता होरारूपं स्कन्धत्रयात्मकम्।**
**वेदस्य निर्मलं चक्षुर्ज्योतिः शास्त्रमनुत्तमम्।**
**सिद्धान्तज्यौतिषे कतिपये ग्रन्थाः उपलभ्यन्ते।**

---

१. भास्कराचार्य तथा वराहचार्य

**प्राचीनपश्चसिद्धान्ताः**

**पोलिशरोमकवाशिष्ठसौर पैतामहास्तु पश्चसिद्धान्ताः।**

**पश्चभ्यो द्वावाधौ व्याख्यातौ लाटदेवेन।।**

**तानधिकृत्य वराहमिहिरेण एव उक्तं –**

**पोलिशकृतः स्फुटोऽसौ तस्यासन्नस्तु रोमकः प्रोक्तः।**

स्पष्टतरः सावित्रः परिशेषौ दूरविभ्रष्टौ।।

(१) पितामहसिद्धान्तः (२) वशिष्ठसिद्धान्तः (३) रोमकसिद्धान्तः (४) पौलिशसिद्धान्तः

(५) सूर्यसिद्धान्तः

(१) **सिद्धान्त** :- हलायुधकोषानुसारं-सिद्धः वादिप्रतिवादिभ्यां निर्णीतः अन्तः अर्थो यस्य अर्थात् वादि-प्रतिवादिद्वारा निर्णीतसत्यं एव सिद्धान्तः कथ्यते।

सिध् + क्त + अन्तः = सिद्धान्तः अमरकोषानुसारं यः विषयः अन्तःस्थ पर्यन्तं निश्चितरूपेण सिद्धो भवतिस विषयः सिद्धान्तनाम्नः श्रेणीमध्ये प्राप्तो भवति।

सिद्धान्ते-भूगोलः खगोलविद्या-ज्यौतिषस्य गणितसिद्धान्तः ग्रहाणांगत्याविवरणं-ऋतुत्वेन निर्णयं-अयनांशसाधनं-क्रान्तिसर-भगणकालः-सूर्यचन्द्रादिग्रहणसाधनं-श्रङ्गोन्नतिसाधनं-ग्रहाणांयुद्धः-ग्रहाणा उदयास्त-निर्णयं-भूगोलाध्याय-छेधकाधिकारः-पाताधिकारः-मानाध्यायश्च निर्णय च सिद्धान्तग्रन्थानां विषयोऽस्ति। केषांचित् विदुषां मतेन 'सिद्धान्त शब्दस्य परिवर्तनं शब्दः आंग्लभाषायां मध्ये 'ऐस्ट्रॉनोमी' कथ्यते। शब्दस्य अर्थः खगोलविद्या सम्बन्धः भवति। यः विषयज्ञाता 'एस्ट्रोनोमर' इति आग्लभाषायां कथ्यते। ब्रह्माण्डे ज्योतिर्मयपिण्डानां ज्ञानंग्रहाः-नक्षत्राणां तथा तारामण्डलंज्ञानं-ज्यौतिषशास्त्रस्य सिद्धान्तः माध्यमेन प्राप्तः भवति। ज्यौतिषशास्त्रस्य सिद्धान्तः विज्ञानस्य प्रथमश्रेणीमध्ये निर्देशः भवति। आचार्यवराहमिहिरः कथयति सिद्धान्ते सौरादिभेदाः अयन निर्णयं-सममण्डल-प्रवेशकालिकः उदित-अशांनांभेदाः-सूर्यः-चन्द्रस्य ग्रहणे स्पर्शः-मोक्षः- दिग्ज्ञानं-स्थिति-ग्रहसमागमम्-ग्रहयुद्धज्ञानं-कालविवरणं इत्यादिनां ज्ञानं आवश्यकमेवास्ति। तिथ्यादीनां तथा पंचाङ्गस्य अङ्गानां गणितगत स्पष्टीकरणं ज्ञानं सिद्धान्तज्यौतिषंक्षेत्रस्य विषयोऽस्ति यथोक्तम्-'व्यक्ताव्यक्तभगोलवासनमयः सिद्धान्तः' इति। यथा वा - यत्र कल्पादेर्ग्रहानयनं स सिद्धान्तः। यत्र युगवर्षायनर्तुमासपक्षाहोरात्रया-

तत्पश्चात् विविधाः ग्रन्थाः प्रसिद्धाः सन्ति।

(१) सिद्धान्तशिरोमणिः (२) ग्रहलाधवः (३) आर्यभटीय सिद्धान्तः (४) खण्डरवाधकः (५) चलनकलनः (६) वेदांगज्यौतिषम् (७) ज्योतिर्गणितम् (८) ब्राह्मस्फुटसिद्धान्तः (९) लीलावती (१०) सिद्धान्ततत्वविवेकः (११) ब्रह्मसिद्धान्तः (१२) सिद्धान्तदर्पणः (१३) सिद्धान्तशेखरः (१४) सुन्दरीसिद्धान्तः (१५) सूर्यसिद्धान्तः (१६) करणकुतूहलम् (१७) गणकतरंगिणी (१८) सौरसाम्राज्यम् (१९) सोमसिद्धान्तः (२०) आधुनिकवाशिष्ठसिद्धान्तः

**पितामहसिद्धान्तः-**

पितामहशास्त्रानुसारेण यथा पञ्च सिद्धान्तिकायामुक्तं रविशशिनोः पञ्च वर्षाणि युगं त्रिशद्भिमासेरधिमासः अह्नं त्रिषष्ठया अवमः (क्षयदिनम्) इति। पितामहसिद्धान्ते 'अधिमासस्त्रिद्भर्मासैः' इति यदुक्तं तच्चिन्त्यं प्राप्यते।

**सूर्यसिद्धान्तः-**

पञ्चसिद्धान्तिकायां सूर्यसिद्धान्तः स्पष्टतरसिद्धान्तत्वेन गृहीतः सूर्यप्रतिपादितसूर्यसिद्धान्तोऽपि त्रिविधः प्राप्तः भवति। यथा – प्रथमः पैतामहवाशिष्ठ समकालिको द्रितीयस्तु वराहमिहिरेण पञ्चसिद्धान्तिकायां वैशद्येन व्याख्यातः। तृतीयः अर्वाचीनश्च सूर्यसिद्धान्ताख्य ग्रन्थः प्राप्तो भवति। सूर्यसिद्धान्ते हि न केवलं चन्द्रसूर्ययोरेव यथा सिद्धान्ते अपितु सर्वेषामेव ग्रहाणां गत्यादिकं निरूपणमस्ति।

**आधुनिकसूर्यसिद्धान्तः-**

आधुनिकसूर्यसिद्धान्तं प्रायः आर्यभटः अनुसरति। अर्वाचीनसिद्धान्तः-पञ्चकमपि न ब्रह्मगुप्ततोऽर्वाचीनम् सूर्यसिद्धान्ते चतुर्दशाधिकाराः सन्ति।

मध्यम-स्पष्टः-दिग्देशकालः-छेधकः-चन्द्रग्रहण-सूर्यग्रहणम्-ग्रहयुति-भग्रहयुति-उदयास्तः-चन्द्रभृन्नति-पातः-भूगोलः-ज्यौतिषोपनिषदः-मानसंज्ञकाः। मध्यमाधिकारे युगमानं कल्पमानं वा भगण-भभ्रमचान्द्रमासाधिमासावम-सौरवर्षः-ग्रहध्रुव-परमशरांशादि विषयाः प्राप्यन्ते। वस्तुतः मध्यमाधिकारे ग्रहाणांमध्यमस्थितिर्वर्ण्यते। स्पष्टाधिकारे ग्रहाणां तात्कालिकी स्थितिर्वर्ण्यते। भगणभ्रमादिमानं लाटदेवतः शेषविषयश्च पञ्चसिद्धान्तकात् एवादाय सिद्धान्तोऽयं ख्यापित इत्यनुमीयते। भट्टोत्पलेन सूर्यसिद्धान्तः सम्बद्धत्वेनोद्धृताः कतिपये श्लोकाः अपि सूर्यसिद्धान्तग्रन्थे नोपलभ्यन्ते। तथैव मध्यमाधिकारे कतिपयः संस्करणः साम्प्रतिकसंस्करण-मुद्रितषष्ठसप्तमश्लोकर्योर्मध्येऽयो निर्दिष्टः श्लोको लभ्यते-

**तस्मात्त्वं स्वां पुरीं गच्छ तत्र ज्ञानं ददामि ते।**

**रोमके नगरे ब्रह्मशापान्म्लेच्छावतारधृक्।।**

एषा प्रसङ्गानुसारं सूर्यसिद्धान्तस्य रोमकसम्प्रदायसम्बद्धता निर्दिष्टा भवति।

**आधुनिकवाशिष्ठसिद्धान्तः-**

वशिष्ठसिद्धान्तग्रन्थौ स्वरूपभेदेन द्विविधौ प्राप्येते। एकस्मिन् ग्रन्थे पश्चाध्यायाः चतुर्णवतिः श्लोकाश्च सन्ति। अस्मिन् ग्रन्थे कमलाकरेणाऽपि स्मृतः वशिष्ठमाण्डव्यसंवादरूपः।

**वशिष्ठ सिद्धान्तः-**

बृहस्पतेः प्राप्तं ज्ञानं वशिष्ठः पराशराय यद् उक्तं तद् वाशिष्ठं गणितम्। आचार्यवराहमिहिरः अपि सिद्धान्तं दूरविभ्रष्टं निर्दिशति। वाशिष्ठसिद्धान्ते तिथिनक्षत्रानयन-पद्धतिः राश्यंशकलामानानि च आधुनिकपद्धतेः अपेक्षया विलक्षणानि। अत्रैव छायाविचारोऽ-धिकं निरूपितो दिनमास्य अपेक्षया। वशिष्ठसिद्धान्ते अपि प्राचीन-नवीनत्वेन द्विविधं प्राप्यते।

**पौलिशसिद्धान्तः-**

पाराशरं हि ज्ञानं पुलिशाख्येन मुनिना यद्गर्गादिभ्य उक्तं तदेव पौलिश गणितं इति प्रसिद्धम्। प्रश्नसिद्धान्तिकाकारः पौलिशसिद्धान्तं स्पष्टं मन्यते। अत्रैव रोमकपौलिश-सिद्धान्तयोरहर्गणे साम्यं प्राप्तये। अस्मिन्-सिद्धान्ते सूर्य-चन्द्रातरिक्तग्रहाणामपि वक्रत्वादि निर्दिष्टं प्रतिभाति। पौलिशसिद्धान्तः लाटदेवेन व्याख्यातः इति वराहमिहिर साक्ष्येण ज्ञायते।

**रोमकसिद्धान्तः-**

नारायणेन यत्सूर्याय उक्तं तदेव रहस्यं ब्रह्मणः सापाधवनजातिषु जातेन सूर्येण यद्रोमकाय उपदिष्टं यच्च रोमकेण रोमकनगरे विस्तारितं तदेव मौलिकं रोमकगणितं इति। रोमकसिद्धान्ते अपि प्राचीन-अर्वाचीन द्विविधः भेदाः। प्राचीनं यथा वराहमिहिरेण उक्तं तथा अर्वाचीन श्रीषेणसङ्गृहीतत्वेन ब्रह्मगुप्तेन स्मृतः (ब्रह्म. १९-४८-५०) वराहमिहिरे रोमकसिद्धान्तं हि पौलिशसिद्धान्तं समानमेव मन्यते।

**सोमसिद्धान्तः-**

चन्द्रमसा हि शौनकाय उपदिष्टं तच्छिष्यपरम्परासन्धारितः सिद्धान्तः सोमसिद्धान्तः शब्देन ज्ञायते। एतेषां ग्रन्थे दशाध्यायाः विभक्ताः सन्ति।

**आधुनिक रोमशसिद्धान्तः-**

यद्विष्णुर्हि यज्ज्ञानं वशिष्ठाय-रोमशाय च उपदिष्टवांस्तदेव रोमशेन व्याख्यातं रोमशसिद्धान्ताऽऽ-ख्यामिति। लोमशः ऋषि पुराणेषु प्रसिद्धः। रोमशसिद्धान्तग्रन्थे एकादशाध्यायाः सन्ति। अनुष्टुब्वृत्ते ३७४ श्लोकाः रचनाः प्राप्ताः भवन्ति। अत्र प्रयुक्तो नवार्थे नन्दशब्दः भौमार्थे आरशब्दाः च अस्य अर्वाचीनत्व निर्दिशति।

**आर्यसिद्धान्तः आर्यभटीयश्चः-**

आर्यभटो हि ज्यौतिषसिद्धान्तस्य प्रणेता प्रथमः पुरूषः अस्ति। आर्यभटस्य आर्यभटीयं ज्यौतिष ग्रन्थेषु पौरूषेयेषु प्रथमः। आर्यभटस्यार्यभटीये चत्वारः भागाः विभक्ताः सन्ति। गीतिकापादः- गणितपादः-कालक्रियापादः गोलपादश्च इति।

**पुराणेषु ज्यौतिषम्**

चत्वार्याहुः सहस्राणि वर्षाणां तु कृतं युगम्।
तस्य तावच्छती संध्या सन्ध्यांशश्च तथाविधः ।।[१]
सहस्राणां शतान्यत्र चतुर्दश तु सङ्ख्यया ।
चत्वारिंशत्सहस्राणि तथान्यानि कृतं युगम् ।।[२]
नियुतानि दश द्वे च पञ्च चैवात्र सङ्ख्यया ।
अष्टाविंशति सहस्राणि कृतं युगमथोच्यते ।।[३]
त्रेता त्रीणि सहस्राणि सङ्ख्यैव परिकीर्त्यते ।
तस्यापि त्रिशती संध्या संध्यांशश्च तथाविधः ।।[४]
प्रयुतं तु तथा पूर्णं द्वे चान्ये नियुते पुनः ।
षण्णवतिसहस्राणि सङ्ख्यातानि च सङ्ख्यया ।।[५]
द्वापरे द्वे सहस्रे तु युगमाहुर्मनीषिणः ।
तस्यापि द्विशती संध्या संध्यांशः संध्यया समः ।।[६]

---

१. वायुपुराणम् , ३२.५८
२. वायुपुराणम् , ५७.३०
३. मत्स्यपुराणम् , १४२.२४
४. वायुपुराणम् , ५७.२५
५. मत्स्यपुराणम् , १४२.२५
६. वायुपुराणम् , ५७.२६

अष्टौ शतसहस्राणि वर्षाणां मानुषाणि तु ।
चतुःषष्टिसहस्राणि वर्षाणां द्वापरं युगम् ।। [१]
कलिं वर्षसहस्रं तु युगमाहुर्मनीषिणः ।
तस्याप्येकशती संध्या संध्याशः संध्यया समः ।।[२]
चत्वारि नियुतानि स्युर्वर्षाणि तु कलिर्युगम् ।
द्वात्रिंशच्च तथान्यानि सहस्राणि तु सङ्ख्यया ।।[३]
एतद् द्वादशसाहस्रं चतुर्युगमिति स्मृतम् ।।[४]
चत्वारिंशत्त्रीणि चैव नियुतानि च सङ्ख्यया ।
विंशतिश्च सहस्राणि ससंध्याशश्चतुर्युगे ।।[५]
नियुतान्येकषड्विंशन्निरंशानि तु तानि वै ।।[६]
अष्टौ शत सहस्राणि दिव्यया सङ्ख्यया स्मृतम् ।
द्विपञ्चाशत्तथान्यानि सहस्राण्यधिकानि तु ।।[७]
मन्वन्तरस्य सङ्ख्या तु वर्षाग्रेण निबोधत ।
त्रिंशत्कोट्यस्तु वर्षाणां मानुषेण प्रकीर्तिता ः ।।
सप्तषष्टिस्तथान्यानि नियुतान्यधिकानि तु ।
विंशतिश्च सहस्राणि कालोऽयं सन्धिकं विना ।।[८]
मन्वन्तरस्य सङ्ख्या तु मानुषेण निबोधत ।
एकत्रिंशत्तथा कोट्यः सङ्ख्याताः सङ्ख्यया द्विजै ः ।।
तथा शतसहस्राणि दश चान्यानि भागशः ।
सहस्राणि तु द्वात्रिंशच्छतान्यष्टाधिकानि च ।।
अशीतिश्चैव वर्षाणि मासाश्चैवाधिकास्तु षट् ।

---

१. मत्स्यपुराणम् , १४२.२६
२. वायुपुराणम् , ५७.२७
३. मत्स्यपुराणम्, १४२.४७
४. वायुपुराणम् , ३२.६५
५. वायुपुराणम् , ५७.३२
६. वायुपुराणम् , ५७.३२
७. वायुपुराणम् , ६७.१४१
८. वायुपुराणम् , ५७.३४-३५

मन्वन्तरस्य सङ्ख्यैषा मानुषेण प्रकीर्तिता ।। [1]
एषा चतुर्युगाख्या तु साधिका ह्येकसप्ततिः ।
कृतत्रेतादियुक्ता सा मनोरन्तरमुच्यते ।। [2]
चतुर्युगानां सङ्ख्याताः साधिका ह्येकसप्ततिः ।
मन्वन्तरं मनोः कालः सुरादीनां च सत्तम ।।[3]
यावद्दिनं भगवतो मनून् भुञ्जंश्चतुर्दश ।
स्वं स्वं काले मनुर्भुङ्क्ते साधिका ह्येकसप्ततिम् ।।[4]
ततो मन्वन्तरे तस्मिन् प्रक्षीणा देवतास्तु ताः ।
सम्पूर्णे स्थितिकाले तु तिष्ठत्येकं कृतं युगम् ।। [5]
युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते ।
कृताब्दसङ्ख्या तस्यान्ते सन्धिः प्रोक्तो जलप्लवः ।।
ससन्धयस्ते मनवः कल्पे ज्ञेयाश्वतुर्दश ।
कृतप्रमाणः कल्पादौ सन्धिः पञ्चदश स्मृतः ।।[6]
यदहर्ब्रह्मणः प्रोक्तं दिव्या कोटी तु सा स्मृता ।
शतानां च सहस्राणि दश द्विगुणितानि च ।। [7]
कोटिशतानि चत्वारि वर्षाणिं मानुषाणि तु ।
द्वात्रिंशच्च तथा कोट्यः सङ्ख्याताः सङ्ख्यया द्विजै ः ।।[8]
एकं कल्पसहस्रं तु ब्रह्मणोऽब्दः प्रकीर्तितः ।
एतदष्टसहस्रं तु ब्रह्मणस्तु युगं स्मृतम् ।।
एकं युगसहस्रं तु सवनं तत्प्रजापते ः ।
सवनानां सहस्रं तु द्विगुणं त्रिवृतं तथा ।। [9]

---

१. त्स्यपुराणम् , १४२.३०-३२
२. वायुपुराणम् , १.३.१७
३. मत्स्यपुराणम् , १४२.२९
४. भागवतपुराण, ३.११.१४
५. वायुपुराणम् , ६१.१५२
६. सूर्यसिद्धान्त, १.१८.१९
७. वायुपुराणम् , १००.२२६
८. वायुपुराणम् ,१००.२३१
९. वायुपुराणम् , २२.४-५

काष्ठा निमेषा दश पञ्च चैव त्रिंशच्च काष्ठा गणयेत्कलास्ता ः ।

त्रिंशत्कलाश्चैव भवेन्मुहूर्तास्तास्त्रिंशता रात्र्यहनी समेते ।। [१]

निमेषतुल्यमात्रा हि कृता लघ्वक्षरेण तु ।।

मानुषाक्षिनिमेषास्तु काष्ठा पञ्चदश स्मृताः ।

नव क्षणास्तु पञ्चैव विंशत्काष्ठास्तु ते त्रयः ।।

प्रस्थः स्तोदकाश्चैव साधिकास्तु लवः स्मृतः ।

लवास्त्रिंशत्कला ज्ञेया मुहूर्तस्त्रिंशतः कला ः।।

मुहूर्तास्तु पुनस्त्रिंशदहोरात्रमिति स्थिति ः ।

अहोरात्रं कलानां तु द्व्यधिकानि शतानि षट् ।। [२]

गारूडे हि महापुराणे सर्वस्य सारत्वेन विषयः उल्लेखः प्राप्तः भवति। अत्र सामान्यतः सूर्यव्यूहवर्णनं-ज्यौतिष शास्त्रकथनं नक्षत्राणां कृत्तिकादि गणना-नक्षत्रदेवताकथनं योगिनीस्थितिनिर्णयः सिद्धियोगः ज्यौतिषशास्त्र वर्णनं दशाकथनं दशाफलं यात्राविचारः चन्द्रशुद्धि कथनं द्वादशराशि परिमाणं मेषादिलग्नेषु विवाहफलं चरादिलग्ने कर्तव्यं कार्यं च अत्र यथायोग्यं निर्दिशन्ति। (५१-६१ अध्यायाः)[३]

१. वायुपुराणम् ,५७.७

२. वायुपुराणम् , १००

३. गारूडे हि महापुराणे, ५१-६१ अध्यायाः

## वेदाङ्गानि,

वेदस्य षड, अङ्गानि, यथोक्तं पाणिनिना स्वशिक्षायाम् -

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठयते।

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।

शिक्षा घ्राणं तुं वेदस्य मुखं व्याकरणं स्मृतम्।

तस्मात् साङ्गमधीत्यैव ब्रह्मलोके, महीयते।। पा.शि. ४१-४२।।

पतञ्जलिनाऽप्युक्तम् -ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।

### शिक्षा

तच्छास्त्रं शिक्षा नाम येन वेदमन्त्राणामुच्चारणं शुद्धं स्पाद्येत। वेदे स्वरस्य प्राधान्यं सर्वविदितम्, स्वरज्ञानं च शिक्षाऽऽयत्तम्, अत एवेदं शिक्षाशास्त्रं वेदाङ्गम। शिक्षाशास्त्रप्रयोजनमुक्तं तैत्तिरोयोपनिषदारम्भे यथा-

अथ शीक्षां व्याख्यास्यामः- वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तान इत्युक्तः शीक्षाऽध्यायः। तत्र वर्णोऽकारादिः, स्वर उदात्तादिः, मात्रा ह्रस्वादिकः, बलं स्थानप्रयत्नौ , साम निषादादि, सन्तानो विकर्षणादिः। एतदवबोधनमेव शिक्षायाः प्रयोजनम्,। सम्प्रति त्रिशत्सङ्ख्याका शिक्षाग्रन्था उपलभ्यन्ते। तेषुयाज्ञवल्क्यशिक्षा, वाशिष्ठी शिक्ष, कात्यायनी शिक्षा, पाराशरी शिक्षा, अमोधानन्दिनी शिक्षा, नारदी शिक्षा, शौनकीयशिक्षा, गौतमी शिक्षा, माण्डूकी शिक्षा, पाणिनीया शिक्षा च मुख्याः। पाणिनीया शिक्षा तु सर्वतोऽधिकं प्रथते।

वेदभेदेन शिक्षाभेदो भवति, यथा- याज्ञवक्यशिक्षा शुक्लयजुर्वेदस्य, नारदीशिक्षा सामवेदस्येत्यादि।

### छन्दः

मन्त्राणां छन्दोवद्धतया छन्दसां ज्ञानं विना वेदमन्त्राः साधु उच्चारयितुं न शक्यन्तेऽतश्छन्दोऽीप वेदाङ्गमवश्यज्ञेयञ्ज।

शौनकविरचिते ऋक्प्रातिशाख्ये चरमभागे छन्दसां पर्याप्तं विवेचनं विद्यते। अस्य छन्दशास्त्रस्य पिङ्गलच्छन्दः सूत्रनामा ग्रन्थः सर्वाधिक प्रसिद्धः। अयं केनचित् पिङ्गलनामकेनाचार्येण विरचितः। अत्र वैदिकानि लौकिकानि च छन्दांसि विवेचितानि।

**कल्पः**

ब्राह्मणकाले यागस्य तावान् प्रचारो जातो यत्तेवां यथावज्ज्ञानाय पूर्णपरिचयप्रदायकग्रन्था-नामावश्यकताऽनुभूयते स्म, तामेवावश्यकतां स्वल्पैः शब्दैः पूरयितुं कल्पसूत्राणि विरचितानि।

कल्पसूत्राणि द्विविधानि श्रौतसूत्राणि स्मार्त्तसूत्राणि च श्रुत्युक्तयागविधिप्रकाशकानि श्रौतसूत्राणि। स्मार्त्तसूत्राण्यपि द्विधा- गृह्यसूत्राणि धर्मसूत्राणि च।

श्रौतसूत्रेषु अग्नियात्राधानम् अग्निहोत्रम्, दर्शपूर्णमासौ, पशुयोगः, नानाविधाः सोमयोगाश्चेति विषयाः समुपपादिताः।

गृह्यसूत्रेषु तेषामनुष्ठानाचारयागानां वर्णनं विद्यते येषां सम्पादनं त्रैर्वाणकैरवश्यं कर्त्तव्यम्। षोडशसंस्काराणां विशिष्टं वर्णनमपि गृह्यसूत्रेषु कृतं बोध्यम्।

धर्मसूत्रेषु धार्मिकनियमाः, प्रजानां राज्ञां च कर्त्तव्यचयाः, चत्वारो वर्णाः, चत्वार आश्रमाः, तेषां धर्माः, पूर्णतया निरूपिताः। एतानि धर्मसूत्राण्येव स्मृतीनां जन्मनेऽकल्पन्त।

शूल्बसूत्रमपि कल्पसूत्रमेव, तत् श्रौतसूत्रान्तर्गतम्। शुल्बं मापक्रिया। इदं सूत्रमेव भारतीय-ज्यामितिशास्त्रस्य प्रवर्त्तकम्। पाश्चात्यैः, पिथागोरस प्रभृतिभिरिदं ज्यामितिशास्त्रं प्रणीतमिति ये कल्पयन्ति, ते शुल्बसूत्रं दृष्टा दृडीकुर्वन्तु यदिदं ज्यामितिशास्त्रं भारतीयः पाश्चात्यज्यामितिशास्त्रो-त्पत्तेर्बहुदिवसपूर्वमेव प्रकटीकृतमिति।

**कल्पसूत्राणि तत्तद्वेदसम्बन्ध**निबन्धनभेदयुतानि। तत्र-

ऋग्वेदस्य कल्पसूत्रम- आश्वालायनं शाङ्खायनञ्च। अनयोरुभयोरपि कल्पसूत्रयोः श्रौतसूयं गृह्यसूत्रं च सम्मिलितं विद्यते। शुक्लयजुर्वेदस्य कल्पसूत्रम्, कात्यायनश्रौतसूत्रम्, पारस्करागृह्यसूत्रम्, कात्यायनशुल्बसूत्रञ्ज।

**कृष्णयजुर्वेदस्य कल्पसूत्रम्-** बौधायनसूत्रम् आपस्तम्बसूत्रञ्च। अनयोः कल्पसूत्रयोः श्रौतगृह्य-धर्मशुल्बसूत्राणिसर्वाण्यिपि सन्तीति ग्रन्थाविमौ पूर्णरूपौ।

**सामवेदस्य कल्पसूत्रम्।** लाटयायनश्रौतसूत्रम् द्राह्यायणञ्च। जैमिनीयशाखायाः श्रौतसूत्रं जैमिनि-गृह्यसूत्रम गोभिलगृह्यसूत्रम खादिगगृह्यसूत्रञ्च।

**सामवेदे** एव आर्षेयकल्पस्यापि गणना भवति, अयमेव कल्पो मशककल्प सूत्रनाम्नाऽपि प्रथते। सूत्रमिदं लाटयायनश्रौतसूत्रात्प्राचीनं मन्यते।

**अथर्ववेदस्य कल्पसूत्रम** – वैतानश्रौतसूत्रम्, कौशिकसूत्रञ्च। वैतानसूत्रं नातिप्राचीनम्, कल्पसूत्रम् –वैतान, कौशिकसूत्रञ्चाभिचारक्रिया-वर्णनपरम्।

## निरुक्तम्

निरुच्यते निःशेषेणोपदिश्यते निर्वचनविधया तत्तदर्थबोधनाय पदजातं यत्र तन्निरुक्तम्। निर्वचनमुखेन पदानामर्थावगमो यद्यपि व्याकरणेनापि सिद्धयति तथापि निरुक्तानुसारेणैव अर्था निर्वक्तव्या इति मुन्यनुशासनाद् व्याकरणसाध्यकतिपयकार्यविधायित्वाच्च शास्त्रमिदं पृथक् प्रणीतम्। तदुक्तं यास्केन-अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते। अर्थमप्रतियतो नात्यन्तं स्वरसंस्का-रोद्देशः, तदिदं विद्यास्थानं व्याकरणस्य कात्स्न्यं स्वार्थसाधकञ्च। नहि निरुक्तार्थावित् कश्चिन्मन्त्रं निर्वक्तुमर्हतीति बृद्धानुशासनम्। निरुक्तप्रक्रियानुरोधेनैव मन्त्रा निर्वक्तव्या नान्यथा।

अत्रेदमवगन्तव्यम्- शिक्षया वर्णोच्चारणप्रकारे व्याकरणेन च पदसाधुत्वे ज्ञाते मन्त्रघटकपदना-मार्थज्ञानाकाङ्क्षायां मन्त्रघटकार्थज्ञानाय भगवता यास्केन निरुक्तं प्रणीतम्। तच्च निरुक्तंपञ्चविधम्-

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।

धातोस्तदर्थाभिनयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्।।**भर्तृहरिः। सं.साहि.पृ-१८**

वेदागतकठिनशब्दसंग्रहरूपो निघण्टुग्रन्थश्चिरादगच्छति स्म, तत्रेव यास्केन तद्वयाख्याभूतं निरुक्तं विरचितम्। निघण्टवो वेदा एव न वेदाङ्गानि, तद्व्याख्याभूतं त्यास्कप्रणीतम्। निरुक्तमेव वेदाङ्गमिति सम्प्रदायः।

उपलभ्यमानो निरुक्तग्रन्थो यास्कस्य कृतिः। पाणिनेः प्राचीनोऽयं यास्कः ७०० ई. पू. कालिकः स्यादिति विदुषामभिप्रायः। यास्कात्प्रागपि बहवो निरुक्तकारा आसन्। येषु द्वादश यास्केन स्मृता- औपमन्यवः, औदुम्बरायणः वार्ष्यायणिः , गार्ग्यः, आग्रायणः, शाकपूणिः , और्णनाभः, तैटोकः, गालवः, स्थौलोष्ठी,क्रौष्टुकः, कात्थक्यश्चेति।

अत्र यास्कनिरुक्ते चतुर्दशाध्यायाः। बहवस्तु द्वादशाध्यायात्मकमेवेद् शास्त्रम् अन्तिमौ द्वावध्यायौ तु केनचित् पश्चाद्योजितावित्याहुः।

## व्याकरणम्

भाषा लोकव्यहारं चालयति, यदि भाषा न स्यात्, जगदिदमन्धे तमसि मज्जेत्, यथोक्तं दण्डिना-

इदमन्धं तमं कृतस्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।

भाषायाः शुद्धये व्याकरणापेक्षा भवत्येव। नहि व्याकरणज्ञानशून्यः साधून् शब्दान् प्रयोक्तुमीशः। वेदस्य रक्षार्थं व्याकरणध्ययनमत्यावश्यकम्, "रक्षार्थं वेदानामध्येयं व्याकरणम्, लोपागमवर्णविकारज्ञो हि पुरुषः सम्यग् वेदान् परिपालयिष्यति इति पतञ्जलिः। वेदरक्षाक्षमतयैव व्याकरणस्य वेदाङ्गत्वमपि समर्थ्यते। व्याकरणस्य सर्वाणि प्रयोजनान्युक्तानि महाभाष्ये, "रक्षोहागमलध्वसन्देहाः प्रयोजनम्। रक्षार्थं वेदानामध्येयं व्याकरणम्। ऊहः खल्वपि, न सर्वेलिङ्गैर्न सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः ते चावश्यं ज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः, तान्नावैपाकरणः शक्तोति यथायथं विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्। एवमन्यान्यपि प्रयोजनानि व्याख्यातानि भाष्ये।

पाणिनेरष्टाध्यायी, कात्यायनस्य वार्तिकं भाष्यकृतो भाष्यञ्चेति त्रिमुनिव्याकरण प्रसिद्धम्। व्याकरणान्यष्टो-

प्रथमं प्रोच्यते ब्राह्मं द्वितीयमैन्द्रमुच्यते।
याम्यं प्रोक्तं ततो रौद्रं वायव्यं वारुणं तथा।।
सावित्रं च तथा प्रोक्तमष्टमं वैष्णवं तथा।। **(भविष्यपुराणे ब्राह्मपर्व)**

लधुत्रिमुनिकल्पतरुकृतस्तु नव-व्याकरणानि स्मरन्ति-

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकलं पाणिनीयकम्।।

व्याकरणानामष्टविधत्वमेव प्रसिद्धम्-यथोक्त भास्करेण – अैष्टौ व्याकरणानि षट् च भिषजा व्याचष्टा ताः संहिताः इति भविष्यपुराणोक्तानि व्याकरणानि तु न प्रसिद्धानि। ऐन्द्रादीन्येव प्रसिद्धानि।

सर्वेष्वपि व्याकरणेषु लौकिकवैदिकोभयविधशब्दसाधकतया पाणिनीयव्याकरणस्य प्राधान्यम्। अत एव पाणिन्युपज्ञं व्याकरणं प्रसिद्धम्।

पाणिनेः कालादिकं जाम्बवतीजयपरिचयप्रकरेण द्रष्टव्यम्।

## ज्यौतिषम्

इदं कालविज्ञापकं शास्त्रम्। मुहूर्त शोधयित्वा क्रियमाणा यज्ञादिक्रियाविशेषाः फलाय कल्पन्ते, नान्यथा, तन्मुहूर्तज्ञानञ्च ज्योतिषायत्तमतोऽस्य ज्यौतिषशास्त्रस्य वेदाङ्गत्वं स्वीकृतम्। उक्तञ्चायमर्थं आर्चज्योतिष यथा-

वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।

तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्।। **(आर्चज्यौतिषम् ३६)**

चतुर्णामपि वेदानां पृथक् पृथक् ज्यौतिषशास्त्रमासीत्, तेषु सामवेदस्य ज्यौतिषशास्त्रं नोपलभ्यते, त्रयाणामितरेषां वेदानां ज्यौतिषाण्यवाप्यन्ते।

(१) **ऋग्वेदस्य ज्यौतिषस्य**- आर्चज्यौतिषम्, षट्त्रिंशत्पद्यात्मकम्।

(२) **यजुर्वेदस्य ज्यौतिषम्** – याजुषज्यौतिषम्, ऊनचत्वारिंशत्पद्यात्मकम्।

(३) **अथर्ववेदस्य ज्यौतिषम्**- आथर्वणज्यौतिषम्, द्विषष्ट्युत्तरशतपद्यात्मकम्।

एतेषा त्रायाणामपि ज्यौतिषाणां प्रणेता लगधो नामाचार्यः। तत्र याजुषज्यौतिषस्य प्रामाणिकं भाष्यद्वयमपि प्राप्यते, एकं सोमाकरविरचितं प्राचीनम्, द्वितीयं सुधाकरद्विवेदिकृतं नवीनम्। एतस्य ज्यौतिषशास्त्रस्य त्रीणि वर्त्मानि, तदिदं शास्त्रं त्रिस्कन्धमुच्यते। तदुक्तम-

"सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम्।

वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमनुत्तमम्।।" **सुधाकरद्विव्दीकृत**

एतत्प्रवर्त्तका अष्टादश महर्षय ते च-

"सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः।

कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः।।

लोमशः पुलिशश्चैव च्यवनो यवनो भृगुः।

शौनकोऽष्टादशश्चैति ज्योतिः शास्त्रप्रवर्त्तकाः।।"

**प्रसिद्धाः कतिचन ज्यौतिषग्रन्थकाराः**

| | **नामानि** | **कालाः** | **ग्रन्थाः** |
|---|---|---|---|
| १. | आर्यभटः | ५०० ई. | आर्यभटीयम् |
| २. | वराहमिहिरः | ६०० ई. | पञ्चसिद्धान्तिका, बृहज्जातकं लघुजातकञ्च |
| ३. | ब्रह्मगुप्तः | ७०० ई. | ब्रह्मस्फुटसिद्धान्त, खण्डखाद्यं, ध्यानग्रहश्च। |
| ४. | लल्लः | ७०० ई. | रत्नकोशः, धीवृद्धियन्त्रञ्च। |

| | नामानि | कालाः | ग्रन्थाः |
|---|---|---|---|
| ५. | उत्पलाचार्यः | १००० ई. | वाराहमिहिरग्रन्थानां टीकाः। |
| ६. | श्रीपतिः | ११०० ई. | सिद्धान्तशेखर-धीकोटिकरण- रत्नमाला- जातकमपद्धतयः। |
| ७. | भोजदेवः | ११००ई. | राजमृगाङ्ककरणम् |
| ८. | भास्कराचार्यः | १११४-<br>११४० ई. | सिद्धान्तशिरोमणिः , करणकृतूहलश्च। |
| ९. | केशवः | १५०० ई. | ग्रहकौतुक-मुहूर्ततत्त्व- जातकपद्धतयः। |
| १०. | गणेशः | १५५० ई. | ग्रहलाघवम्। |
| ११. | कमलाकरः | १६५० ई. | सिद्धान्ततत्त्वविवेकः। **संस्कृतसाहित्येतिहास पृ.२०** |

एतदतिरिक्ता अपि- लघुपाराशरी, बृहत्पाराशरी, जैमिनिसूत्रम्, भृगुसंहिता, मीनराजजातक-प्रभृतय आर्षग्रन्थाः, लघुजातकम्, बृहज्जातकम् , सारावलिः, जातकाभरणम्, जातकपद्धतिः, जातकसारः, जातकालङ्कारः, पद्मजातकम्, होरारत्नम्, होराकौस्तुभम् इत्यादयः, पुरुषप्रणीतग्रन्थाश्च शास्त्रमिदसमृद्धं कुर्वन्ति।

केरलमतप्रतिपादका ग्रन्थाः प्रश्नग्रन्थान्तराणि, रमलग्रन्थाः, ताजिकग्रन्थाश्च अस्य शास्त्रस्य पोषका एव।

## वेदाङ्ग ज्यौतिषम् (३००० ई.पू. १००० ई.पू.)

(१) ऋग्ज्यौतिषम् (२) यजुर्वेदज्यौतिषम् (३) अथर्ववेदज्यौतिषम् (४) कल्पसूत्रम् (५) निरूक्तम् (६) पाणिनीयव्याकरणम् (संवत्सर-अयन-घटी-पल-मुहूर्तानि-ऋतु-पक्ष-नक्षत्राणां गणना-संवत्सराधिप-सूर्यनक्षत्रम् गणना-मेषादिराशीनां विचारः कालस्यत्रुटयादि सूक्ष्मविभागाः अधिमासः-क्षयमासनिर्णयः-लगमासनिर्णयः-लग्नम्-छायागणितम्-अंकगणितम् तथा कुण्डोपयोगि रेखागणितम् च)

स्वयमेव नाम यत्कृतमार्यभटेन स्फुटं स्वगणितस्य।
सिद्धं तदस्फुटलं ग्रहणादीनां विसंवदति।।
जानात्येक मपि यतो नार्यभटो गणितकालगोलानाम्।
न मया प्रोक्तानि ततः पृथक् पृथग्दूषणान्येषाम्।।

आर्यभटदूषणानां संख्या वक्तुं न शक्यते ....।[1]

"कालन्तरेण दोषा येऽन्यैः प्रोक्ता न ते मयाभिर्हिताः।[2]

क्षितिरवियोगाद्दिनकृद्रवीन्दुयोगात् प्रसाधितश्चन्द्रः।

शशिताराग्रहयोगात्तथैव ताराग्रहाः सर्वे।।

सदसज्ज्ञानसमुद्रात् समुद्धृतं देवताप्रसादेन।

सज्ज्ञानोत्तमरत्नं मया निमग्नं स्वमतिना वा।।[3]

## वेदाङ्गज्यौतिषम्

वैदिकसाहित्ये विविधानि शास्त्राणि प्राप्तानि भवन्ति। तन्मध्ये ज्यौतिषशास्त्रम् एकमेवास्ति। वेदानां सर्वोत्तमाङ्गं नेत्रसंज्ञकं निर्मलं ज्यौतिषशास्त्रमेवास्ति। वेदाङ्गज्यौतिषे ऋग्वेदं-यजुर्वेदो-अथर्ववेदः-सामवेदंश्च ज्यौतिषस्य चत्वारः भेदाः सन्ति। ऋग्वेदस्य प्रथमसंग्रहकर्ता लगधनामा ऋषिः अस्ति। ऋग्वेदस्य २६ कारिकाः प्राप्ताः भवन्ति। यजुर्वेदज्यौतिषे ४१ कारिकाः तथा अथर्वज्यौतिषं १६२ मन्त्राः सन्ति : एतेषां त्रयाणां ग्रन्थानां मध्ये ज्यौतिषफलितदृष्टयनुसारम् अथर्वज्यौतिषं महत्त्वपूर्णम् अस्ति। वेदाङ्ग ज्यौतिष युगाब्दः पञ्चवर्षाणि इति मन्यन्ते। तेषां नामानि सन्ति।

संवत्सर-परित्सर-इदावत्सर-अनुवत्सर इद्वत्सराणि च एतानि नामानि वेदाङ्गज्यौतिषे मध्ये नास्ति किन्तु वेदानां मध्ये ज्ञातं भवति गर्गादिकादि ऋषीणां विविध संवत्सरनामानि एवमेव लिखितानि।

**द्वादशारं नहि तज्जराय वर्णर्त्ति चक्रं परिधामृतस्य।**
**आपुत्रो अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः।।**[4]

एतन्मन्त्रानुसारं 'द्वादशार' शब्द अर्थात् द्वादशराशीनां चक्रं नामानि ज्ञातानि भवन्ति यजुर्वेद ज्यौतिषमपि ऋग्वेदज्यौतिषं संवाधेव। ग्रन्थेस्मिन् ४१ श्लोकाः प्राप्ताः भवन्ति। किन्तु तेषु ३० श्लोकाः किञ्चित्पाठान्तरेण सह ऋग्वेद् ज्यौतिषादेव गृहीताः सन्ति तेऽपि शब्दरचनादिदृष्ट्या भिन्ना इव प्रतिभान्ति। ऋग्वेद ज्यौतिषस्येव याजुषज्यौतिषस्यापि प्रयोजनं तु पर्वज्ञानमेव।

---

१. ब्रह्मगुप्तसिद्धान्त, अध्याय ११
२. " ब्रह्मगुप्त आर्यभट
३. स्पष्टाधिकार पंञ्चसिद्धान्तिका
४. शत. ब्रा. -२

उक्तं यथा आर्चेयुगश्च पश्चवर्षाणि कालज्ञानं प्रचक्षते। युगनिरूपणं यथा-

**त्रिंशत्यह्य सषट् षष्टिरब्दः षड् ऋतवोऽयने।**
**मासा द्वादश स्युरेतत्पञ्चगुणं युगम्।**[1]

वर्षे हि ३६६ दिनानि षड्ऋतवः अयनद्वयं द्वादश सौरमासाः भवन्ति। वेदाङ्गज्यौतिषीये पञ्चाङ्गे चान्द्रमासापेक्षया सौरवर्षमाने अधिकतमाः अशुद्धयः सन्ति। वस्तुतः इयं स्थूलपद्धतिरेव। ऋग्वेदे अयन शब्दाः प्राप्ताः भवन्ति। किन्तु निश्चितरूपेणन वक्तुं कामये। एते अयनशब्दस्य अर्थ सूर्ये दक्षिणायनं वा उत्तरायणं भवति। शतपथब्राह्मणग्रन्थाधारेण निम्न पद्यानुसारं 'अयनं' ज्ञातं भवति। वसन्तो ग्रीष्मो वर्षाः। ते देवा ऋतवः शरद्धेमन्तः शिशिरस्ते स (सूर्यः) यत्रोदगावर्तते देवेषु तर्हि भवति यत्र दक्षिणा वर्तते पितृषु तर्हि भवति।।

एतद्मन्त्रनुसारं शिशिरऋतुमारभ्य ग्रीष्मऋतुपर्यन्तम् उत्तरायणं तथा वर्षर्तुतुमारभ्य हेमन्तर्तु- पर्यन्तं दक्षिणायनं भवति। कल्प-सूत्र-निरूक्त तथा व्याकरण-आश्वलायनसूत्र-पारस्करसूत्र-हिरण्यकेशीसूत्र इत्यादि ग्रन्थानां मध्ये विशेषतः ज्यौतिषविषये शब्दाः प्राप्ताः भवन्ति।

आश्वलायनसूत्रे "श्रावण्यां पौर्णमास्यां" "सीमन्तोन्नयनं यदा पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यात् इत्यादि बहवः शब्दाः विविधानांमुहूर्तानां कार्यहेतवः प्राप्ताः भवन्ति पारस्कर सूत्रे विवाहादि नक्षत्राणिविषये वर्णनं प्राप्तं भवति।
(ज्ये) ष्ठा इत्यृक्षा लिङ्गैः'

अत्रैव जौ-द्रा-ग-खे-रवे-हि-रो-षा-चित्-मू-ष-ष्य-सू-मा-धा-न-रे-मृ-घा-स्वा-प-ज-कृ-ष्य-ह-ज्ये-ष्ठावर्णैः क्रमेव अश्विनी-आर्दा-पूर्वाफाल्गुनी-विशाखा-उत्तराषाढा-उत्तराभाद्रपदा-रोहिणी-आश्लेषा-चित्रा-मूल-शतभिषा-भरणी-पुनर्वसु-उत्तरफाल्गुनी-अनुराधा-श्रवण-रेवती-मृगशीर्ष-मघा-स्वाती-पूर्वाषाढा-पूर्वाभाद्रपद-कृत्तिका-पुष्य-हस्त-ज्येष्ठा-धनिष्ठाश्च नक्षत्राणि।

यथा- "त्रिषु त्रिषु उत्तरादिषु स्वातिमृगशिरसि रोहिण्यात्। एतद् सूत्रानुसारम् उत्तराफाल्गुनी हस्त-चित्रा-उत्तराषाढा-श्रवण-धनिष्ठा-उत्तराभाद्रपद रेवती तथा अश्विनी च विवाह नक्षत्राणि निर्दिष्टानि भवन्ति।

बोधायनसूत्रे "मीनमेषयोर्मेषवृषभयोर्वसन्तः" प्राप्तः भवति। एतद्ग्रन्थानां समये द्वादश राशीनां प्रचारः भारते प्रचलितः।

---

१. शत. ब्रा. -३

पाणिनीयव्याकरणे संवत्सर-हायन-चैत्रादिमासाः दिनेविभागात्मक मुहूर्तानि शब्दाः पुष्प-श्रवण-विशाखादि नक्षत्राणां व्युत्पत्तिः प्राप्ता भवति।

"विभाषग्रहः" (३/०१/१४३) ग्रहशब्दानुसारं नवग्रहाणां संज्ञा ज्ञातुं शक्यन्ते।

यजुर्वेदे नक्षत्राणां नामानि एवमेवप्रकारेण प्राप्तानि भवन्ति।

जौद्राधः खेश्वेहीरोषाचिन्मूषाज्यः सो (सू) माधानः। 'रेमृध्रा (घा) जो (पो) जः तृ (कृ, ष्यो हय्रे (ज्ये) ष्ठा इत्यृक्षा लिङ्गैः'

याज्ञवक्ल्योस्मृतौ तथा धर्मशास्त्रग्रन्थानां मध्ये ज्यौतिषसम्बद्धा अनेके विषयाः प्रसङ्गा उपयोगिनः सन्तिः। अत्रैव ग्रहनक्षत्राणां शुभाशुभफलं च निर्दिष्टम्। शुभफल परिहारोपायश्च। याज्ञवल्क्यस्मृतावपि मेषादिराशिनामानि नैव गृहीतानि सन्ति। एवमेव स्मृतिग्रन्थेषु अपि प्रसङ्गोपयोगित्वेन ज्यौतिषविषयनिर्देशः अस्ति। रामायणे महाभारते अपि बहवो ज्यौतिषसम्बद्धाः प्रसङ्गाः प्राप्यन्ते। रामायणे मुहूर्तादिकमधिकृत्य प्रासङ्गिकं वर्णनं लभ्यते।

**"सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः।**
**शुक्रः शनैश्चरो राहुः केतुश्चैते ग्रहाः स्मृताः।।**[1]

वेदाः लोकस्य प्रथमसाहित्यमिति कारणात् वेदकालादराम्भः इति चिन्तितम्। वेदस्य निर्दिष्ट कालः नास्ति। अतः प्राग्वैदिकम् इति कालगणनापि वैदिककालेऽस्मिन् योज्यते। वेदेषु ध्यान- यागादि विवरणमपि दृश्यते इत्यनेन कृतयुगं, त्रेतायुगस्य आरम्भकालोऽपि अस्मिन्नेव योज्यते। प्रमाणरूपेण भागवतस्य श्लोकः

**कृते यत् ध्यायतो विष्णुं त्रेतायां यजतो मखैः।**
**द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात्।।**[2]

**तथैव मेल्पुत्तुरु नारायणभट्टपादेन उक्तमपि चिन्तनीयम्।**

**श्वेतच्छायां कृते त्वां मुनिवरवपु प्रीणयन्ते तपोभि-**[3]
**स्त्रेतायां स्त्रुकस्त्रुवाद्याङ्कितमरुणतनुं यज्ञरूपं यजन्ते।**
**सेवन्ते तन्त्रमार्गैर्विलसदरिगदं द्वापरे श्यामलाङ्गं**
**नीलं संकीर्तनाद्यैरिह कलिसमये मानुषास्त्वां भजन्ते।।**

१. याज्ञवल्कयस्मृतिः
२. भागवत पु. १०-२२,२९-३८
३. नारायणीयम्

अरविन्दमहर्षिः आध्यात्मिक- धार्मिक- पौराणिककालविभागं कृतवान्। सिम्बोलिक एज, टिपिकल एज, क्लासिकल एज एवं क्रमेण कालः तेन विभक्तः कृतः। अध्ययनदृष्ट्या भारतीयवनस्पति- विज्ञानस्येतिहासः चतुर्धा विभज्यते। ज्यौतिषशास्त्रस्य १) प्रथमे भागे भवति वैदिककालः - इत्युक्ते वेदानामाविर्भावः प्रचुरप्रचारः च यदा आसीत् सः - उपनिषदः सर्वाः तस्मिन्नवे योज्यन्ते। २) द्वितीये भागे भवति पौराणिककालः - तन्नाम पुराणानामाविर्भावः विकासश्च यदा जातः सः कालः। ३) तृतीयस्तु इतिहासकालः सतु विशिष्य रामायण-महाभारतयोः सम्बन्धे चिन्त्यते। ४) चतुर्थस्तु आधुनिको भवति यस्मिन् बृहत्संहितादयः ग्रंन्थाः, काव्यनाटकादीनि च यदा प्रवृद्धानि सः कालः। किन्तु एतेषां कालः इदमित्थमिति बी.सी.ए.डी. क्रमेण निर्देष्टुं क्लिश्यते , तत्र कारणं मुख्यतया एषः संस्कृतवाङ्मये न क्वापि दृश्यत इति। तथाऽपि किञ्जिन्मात्रया चिन्तनार्थं निर्दिश्यतेऽत्र।

एतेषु पुराणानि, न्यायशास्त्रं, मीमांसाशास्त्रं, धर्मशास्त्रम् - एते मिलित्वा चतुर्दश विद्यास्थानानि धर्मस्थानानि च भवन्ति। आयुर्वेदः धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रम् - इति चतुर्णामुपवेदानां समावेशन विद्यानामष्टादशत्वं प्रतिपाद्यते। यथा-

आयुर्वेदो गान्धर्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव ताः।। [१]

जगतः पितामहः ब्रह्मा हि यज्ञसाधननिमित्तं चतुर्भ्यः मुखेभ्यश्चतुर्णांवेदानां निर्माणं कृतवान् ते च यज्ञाः कालाश्रयेणैव सिद्धयन्ति इति तत्सिध्यर्थंकालबोधकज्यौतिषशास्त्रंनिर्माणं भवति। नारदश्च अस्य शास्त्रस्य महत्त्वं अङ्गीकृत्य लोके प्रवर्तयामासेदम्। मतमतान्तरानुसारे शास्त्रं प्रथमं सूर्यस्य मुखेन उक्तम् ततश्च जगति प्रवर्तितम् इति। ज्यौतिषशास्त्रं वेदानां शाखा एव विद्यते।

कश्यपसंहितानुसारेण ज्यौतिषशास्त्रस्य प्रवर्तका अष्टादश मुख्याचार्याः सन्ति। ते च यथा-

सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः।
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः।
रोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।
शौनकोऽष्टादशश्चैते ज्योतिशास्त्रप्रवर्तकाः।।[२]

१. विष्णुपुराणम् -३.६.२५,२६.

२. कश्यपसंहिता

**नारदस्त्वथ तानित्थमाह**

तं विलोक्याथ तत्सूनुर्नारदो मुनिसत्तमः।

उक्ता स्कन्धद्वयं पूर्व संहितास्कन्ध मृत्तमम्।।

जातकानां शुभाशुभफल ज्ञातुं शक्यते तदानुसारं।

होरास्कन्धशास्त्र व्यवहारे प्रसिद्धं ज्ञायते।।

पराशरस्तु एवमेव मुख्याचार्यः सन्ति

विश्वसृड् नारदो व्यासो वशिष्ठोऽत्रिः पराशरः।

लोमशो यवनः सूर्यश्च्यवनः कश्यपो भृगुः।।

पुलस्त्यो मनुराचार्यः पौलिशः शौनकोऽङ्गिराः

गर्गो मरीचिरित्येते ज्ञेया ज्योतिः प्रवर्तकाः।।

ब्रह्माचार्यो वशिष्ठोऽत्रिर्मनुः पौलस्त्यरोमशौ।

मरीचिरङ्गिरा व्यासो नारदः शौनको भृगुः।।

च्यवनो यवनो गर्गः कश्यपश्च पराशरः।

अष्टादशैते गम्भीरा ज्योतिशास्त्रप्रवर्तकाः।।इति।[१]

यज्ञ-अध्ययनसङ्क्रान्ति ग्रह-षोडश कर्मणाम् प्रयोजनस्य सिद्ध्यर्थे तत्कालनिर्णयात्। एभिः विहीनः श्रोतं-स्मार्त कर्म न सिद्धयति ते दृष्टवा जगद्धितायेदं ब्रह्मणा रचितं पुरा।।

ब्रह्मणा उक्तं शास्त्रं हि ब्रह्म नारदाय सोमः शौनकाय नारायणो वशिष्ठाय रामेशाय च वशिष्ठो माण्डव्यवामदेवाभ्यां व्यासः स्वशिष्याय सूर्योमयाय पुलस्त्यः आचार्यः गर्ग-अत्रिः रोमकाय स्वस्वशिष्येम्यः पराशरो मैत्रेयाय च उक्तवन्तः इति।

अस्य शास्त्रस्य प्रथमं ब्रह्मणाद्वारायज्ञप्रवर्तनाय रचना कृता। तत्पश्चात् शिष्यपरम्पराभाध्यायेन एतस्य शास्त्रस्य विस्तरः अभवत्। तदेव आर्यभटेन प्रकाशितं वराहमिहिरेण विवेचनं कृतम्। अथ च वराहमिहिरः उकवान्- बृ.सं.

**प्रथममुनि कथितमवितथमवलोक्य ग्रन्थविस्तरस्यर्थम्**

**नातिलधुविपुलरचनाभिरूद्यतः स्पष्टमभिधातुम्।।**

---

१. नारदसंहिता :

# वैदिककालः

**विश्वोत्पत्तिः**

देवानां नुं वयं जाना प्रवोचाम विपन्यया।
उक्थेषु शस्यमानेषु ं यः पश्यादुत्तरे युगे।।१ ।।
ब्रह्मणस्पतिरेतासं कर्मार ईवाघमत।
देवानां पूर्व्ये युगे सतः सदजायते।।२ ।।
देवानां युगे प्रथमे सतः सदजायत।
तदाशा अन्वजायन्त तदुत्तानपदस्परि।।३ ।।
भुर्जज्ञ उत्तानपदो भुव आशा अजायन्त।
अदितेर्दक्षो अजायत दक्षाद्वदितिः परि।।४ ।।
अतिदिर्ह्यनिष्ट दक्षया दुहिता तव।
तान्देवा अन्वजायन्त भद्रा अमृतबन्धवः।।५ ।।[1]
ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत।
ततो रात्र्यजायत ततः समुद्रो अर्णवः।।१ ।।
समुद्रादर्णवादधिसंवत्सरो अजायत।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी।।२ ।।
सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्।
दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वाहाः।।३ ।।[2]
आपो वा इदमग्रे सलिलमासीत्। तेन प्रजापतिश्राम्यत।
कथमिद् स्यादिति। सोऽपश्यत्पुष्करपर्णं तिष्ठत्।सोमन्यत। अस्ति वै तत्।
यस्मिन्निदमधितिष्ठती।स वराहतेरूपं कृत्वोपन्यमज्जत्।
स पृथिवीमध आर्च्छत्। तस्या उपहत्यदमज्जत्। तत्पुष्करपर्णेऽप्रथयत्।
यदप्रथयत्। तत्पृथिव्यै पृथिवित्वम्।।[3]
आपो वा इदमग्रे सलिलमासीत् तस्मिन् प्रजापतिर्वायुर्भूत्वा
चरत् स इमामपश्यत् तां वराहो भूत्वाऽहरत् तां विश्वकर्मा
भूत्वा व्यमार्त् सा प्रथत सा पृथिव्यभवत्। तत् पृथिव्यै पृथिवित्वम्।[4]

---

१. ऋ.सं. १०/७२
२. ऋ.सं. १०/१९०
३. अष्टक -१ अध्याय २ अनुवादक ३
४. अष्टक ७ अध्याय १ अनुवाक ५

तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः।
वायोरग्निः। अग्नेरापः।अद्भ्यः पृथ्वी। पृथिव्या ओषधयः
औषधीभ्योऽन्नम्। अन्नात् पुरुषः।[1]
को अद्धा वेद क इह प्रवोचत्।कुत आजाता कुत इयं विसृष्टिः।
अर्वाग्देवा अस्य विसर्जनाय।अथोको वेद यत आबभूव।
इयं विसूष्टिर्यत आबभूव। यदि वा दधे यदि वा न। यो
अस्याध्यक्षः परमे व्योमन्। सो अङ्ग वेद यदि वा न वेद।
किँ स्विद्वनं क उ स वृक्ष आसीत्।यतो द्यावापृथिवी निष्टतक्षुः।[2]
तिस्त्रो द्यावः सवितुर्द्वा उपस्थां एका यमस्य भुवने
विराषाट्।आणिं न रथ्यममृताधितस्थुः।।[3]
नाभ्या आसीदन्तरिक्षं शीर्ष्णोद्यौः समवर्तत पद्भ्यां भूमिः।
यः पृथिवी व्यथमानमदंहद्यः पर्वतान् प्रकुपिता अरम्णात्।
यो अन्तरिक्षं विममे वरीयो यो द्यामस्तम्नात् सजनास इन्द्रः।।[4]
त्रिर्नो अश्विना दिव्यानि भेषजा त्रिः पार्थवानि त्रिरुदत्तमद्भ्यः।।[5]
ये महीं रजसो विदुर्विश्वेदेवासो अद्रुहः। मरुद्भिरग्न आगहि।।[6]
वेदा योवीनाम्पदमन्तरिक्षेण पतताम्।[7]
द्यौरन्तरिक्षे प्रतिष्ठितान्तरिक्ष पृथिव्याम्।[8]
उद्यन्नद्य मित्रमह आरोहन्नुत्तरं दिवम्।
हृद्रोगं मम सूर्य हरिमाणं च नाशय।[9]
ऐ अनुकूलतेज सूर्य तु.......... परम उच्च द्युलोक
यथाग्नि.... पृथिव्या समनमदेवं मह्यं भद्राः। सन्नतयः सन्नमन्तु

१. तैत्तिरीयोपनिषद् २/1 (ब्रह्मवल्ली प्रथमखण्ड)
२. तै. ब्रा. २/८/९
३. ऋ. सं. १/३५/६
४. ऋ.सं. २/१२/१ अथ. सं. २०/३४/२
५. ऋ. सं. १/३४/६
६. ऋ.सं.१/१९/३
७. ऋ.सं. १/२५/७
८. ऐ. ब्रा. ११/६
९. ऋ.सं.१/५०/१९

वायवे समनमदन्तरिक्षाय समनमद् यथा वायुरत्नरिक्षेण सूर्याय
समनमद् दिवे समनपद् यथा सूर्यो दिवा चन्द्रमसे समनमन्नक्षत्रेभ्यः
समनमद् यथा चन्द्रमा नक्षत्रैर्वरुणाय समनमत्।[1]
मासानां प्रतिष्ठा युष्मासु।.......। मासा स्थर्तुषु
श्रिताः। अर्धमासानां प्रतिष्ठा युष्मासु।......।
अर्धमासाः स्थ मासु श्रिताः। अहोरात्रयोः प्रतिष्ठा युष्मासु।
......। अहोरात्रे स्थोर्धमासेषु श्रिते।भूतस्य प्रतिष्ठे
भव्यस्य प्रतिष्ठे।पौर्णमास्यष्टकामावास्या। अन्नादाः
स्थान्नदुधो युष्मासु। राडसि बुहति श्रीरसीन्द्रपत्नी
धर्मपत्नी ओजोसि सहोसि बलमसि भ्राजोसि।
देवानां धामामृतम्। अमन्यैस्तेपोजाः।....।[2]

**पृथ्वी, अन्तरिक्षं तथा द्यौः**

सुपर्णा एत आसते मध्य आरोधने दिवः।
ते सेधन्ति पथो वृकंत तरन्तं यह्वतीरपो वित्तं में अस्य रोद्रसी।।[3]
यदिन्दिन्द्र पृथिवी दशभुजिरहानि विश्वा ततनन्त कृष्टयः।
अत्राह ते मघवन् विश्रुतं सहोद्यामनुं शवसा बर्हणा भुवत्।।[4]
सप्त युञ्जन्ति रथमेकचत्रमेको अश्वो वहति सप्तनाम।
त्रिनाभिचक्रमजरमनर्व यत्रेमा विश्वा भुवनानि तस्थुः।।[5]
सनेमि चक्रमजरं विवावृ तउत्तानायां दशयुक्ता वहन्ति।
सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पितं भुवनानि विश्वा।।[6]
मित्रो जनान् यातयति प्रजानन् मित्रो दाधार पृथिवीमुत द्याम्।
मित्रः कृष्टीरनिमिषाभिचष्टे .........................।।[7]

१. तै. सं. ७/५/२३
२. तै. ब्रा. ३/११/१
३. ऋ. सं. १/१०५/११
४. ऋ. सं. १/५२/११
५. ऋ.सं. १/१६४/२
६. ऋ. सं. १/१६४/१४
७. तै. सं. ३/४/११

**ऋतूनां कारणं सूर्यः**

पूर्वान् नुप्रदिशं पाथिवानामृतून् प्रशासाद्विद्वधावनुष्ठु।[1]

**वायोः कारणं सूर्यः**

सवितारं यजति यत्सवितारं यजति तस्मादुत्तरतः पश्चादतं
भूयिष्ठं पवमानः पवते सवितृप्रसूतो ह्येष एतत्पवते।।[2]
अनश्वो आतो अनभीशुरर्वा कनिकदत् पतयदूर्ध्वसानुः।।[3]
एक एवाग्निर्बहुधा सभिद्ध एकः सूर्यो विश्वमनु प्रभुतः।
एकैवोषा सर्वमदिं विभाति .....।[4]

**पृथिव्याः गोलत्वं, निराधारत्वं तथा अहोरात्रः**

स वा एष न कदाचनास्तमेति नोदेति तं यदस्तमेतीति
मान्यन्तेह्न एव तदन्तमित्वास्थात्मानं विपर्यस्यते रात्रिमेवावस्तात्
कुरुतेहः परस्तादथ यदेनं प्रातरुदेतीति मन्यन्ते रात्रेरेव
तदन्तमित्वाथात्मानं विपर्यस्तेऽहरेवावस्तात् कुरुते
रात्रीं परस्तात् स वा एष न कदाचन निम्नोचित्।[5]
चक्राणासः परीणहं पृथिव्या हिरण्येन मणिना शुम्भमानाः।
न हिन्वानासस्तितिरुस्त इन्द्रं परिस्पशो अदधात् सूर्येण।।[6]
आप्रा रजांसि दिव्यानि पार्थिवा श्लोकं देवः कृणुते स्वाय धर्मणे।
प्रबाहू अस्त्राक् सविता सवीमनि निवेशयन प्रसुवन्नक्तुभिर्जगत्।।[7]
देवानां पूर्व्ये युगे सतः सदजायत्।[8]
तदूचषे मानुषेमा युगानि कीर्तेन्यं मघवा नाम बिभ्रत्।
उपप्रयन्दस्युहत्यास बज्त्री यद्धसूनुः श्रवसे नाम दधे।।[9]
विश्वे ये मानुषा युगा पान्ति मर्त्यं रिषः।[10]

---

१. ऋ. सं. १/९५/३
२. ऐ. ब्रा. २/७
३. ऋ. सं. १/१५२/५
४. ऋ. सं. ८/५८/२
५. ऐ. ब्रा. १४/६
६. ऋ.सं. १/३३/८
७. ऋ. सं. ४/५३/३
८. ऋ.सं. १०/७२/२
९. ऋ.सं. १/१०३/४
१०.ऋ. सं. ५/५२/४

ईर्मान्यद्वपुषे वपुश्चक्रं रथस्य ये मथुः।

पर्यन्या नाहुषा युगा मह्ना रजांसि दीयथः।।[1]

युगे युगे विदधयं गुणद्भ्योग्नेरथि यशसं धेहि नव्यसीम्।[2]

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा।[3]

श्रुत्कणं ८० सप्रथस्तमं त्वगिरा दैव्यं मानुषा युगा।।[4]

खाकाशाष्टकृतद्विद्विव्योमेष्वद्रीषुवह्नयः ३५७५०२२४८०० ।युगं बुधादिपातानां ...।।

रव्युच्चस्य रसैकांकगिर्यष्टिनवशंकराः सहस्त्रध्ना ११९१६७९१६००० युगं प्रोक्तं...।।

## कृतादि शब्दाः

प्राची दिशां वसन्त ऋतूनामग्निर्देवता, ब्रह्म द्रविणं त्रिवृत्सोमः।

स उ पञ्चदश वर्तनिस्त्र्यविर्वयः कृतमयानां.... त्रेतायानं

द्वापरोयानां.... आस्कन्दोयानां.... अभिभूरयानां पितरः।[5]

पितामहाः परेवरे ते नः पान्तु तेनोवन्त्वस्मिन् ब्रह्मन्नस्मिन्क्षत्रस्यामाशिष्यस्या पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्याम्।[6]

कृतयादिनवदर्श त्रेतायै कल्पिनं द्वापरायाधिकल्पिनमास्कन्दाय सभास्थाणुम्।[7]

कृताय सभाविन। त्रेताया आदिनवदर्शम्। द्वापराय बहिः सदम्।[8]

कलिः शयानो भवति संजिहानस्तु द्वापरः।

उत्तिष्ठंस्त्रेता भदति कृतं सम्पद्यते चरँश्चरैवेति चरैवेति।।[9]

ये वै चत्वारः स्तोमाः। कृतं तत् ।अथ ये पञ्चं कलिः सः। तस्माच्चतुष्टोमः।[10]

---

१. ऋ. सं. ५/७३/३
२. ऋ. सं. ६/८/५
३. ऋ. सं. १०/९७/१
४. वा. सं. १२/१११
५. परमादीश्वकृत् भटदीपिका टीका, गीतिकापाद
६. तै.सं.४/३/३
७. वा.सं.३०/१८
८. तै.ब्रा. ३/४/१
९. ऐ.ब्रा.३३/१५
१०. तै. ब्रा. १/५/११

## पञ्चसंवत्सरात्मकं युगम्

संवत्सरस्य तदहः परिषष्ठयन्मण्डूकाः प्रावृषीणं बभूव।

ब्राह्मणासः सोमिनो वाचमक्त्रत ब्रह्मकृण्वन्तः परिवत्सरीणम्।।[1]

संवत्सरोसि परिवत्सरोसीदावत्सरोसीद्वत्सरोसि वत्सरोसि।[2]

संवत्सराय पर्यायिणीं परिवत्सरायाविजातामिदावत्सरायातीत्वरीमि-

द्वत्सरायातिष्कद्दरीं वत्सराय विजर्जरा संवत्सराय पलिकजोम्।।[3]

अग्निर्वा संवत्सरः। आदित्यः परिवत्सरः। चन्द्रमा इदावत्सरः। वायुरनुवत्सरः।[4]

संवत्सराय पर्यायिणी। परिवत्सरायाविजाता।इदावत्सरायापस्कद्दरीं।

इद्वत्सरायातीत्वरी। वत्सराय विजर्जरा। संवत्सराय पलिक्नीम्।[5]

संवत्सरोसि परिवत्सरोसि। इदावत्सरोसीदुवत्सरोसि। इद्वत्सरोसि वत्सरोसि।[6]

तेषा श्रीर्मयिकल्प्यतामस्मिन् लोके शतँ समाः।[7]

कुर्वन्नवेहकर्माणि जिजीविषेत् शतँ समाः।[8]

वेदमासो धृतव्रतो द्वादश प्रजावतः। वेदा य उपजायते। [9]

द्वादशारं न हि तज्जराय वर्वति चक्रं परिद्यामृतस्य।

आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विशतिश्च तस्थुः।।[10]

द्वादश प्रधयश्पक्रमेक त्रीणि तभ्यानि क उ तच्चिकेत्।

तस्मिन्त्साकं त्रिशता न शंकवोऽर्पिताः षष्टिर्न चलाचलासः।।[11]

मधुश्चं माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च

---

१. ऋ. सं. ७/१०३/७
२. वा. सं. २६/४५
३. वा.सं.३०/१६
४. तै. ब्रा. १/४/१०
५. तै. ब्रा.३/४/१
६. तै. ब्रा. ३/१०/४
७. वा.सं. ११/४६
८. वा.सं. ४०/२
९. ऋ. स.१/२५/८
१०. ऋ. सं. १/१६४/११
११. ऋ. सं. १/१६४/४८

तपश्च तपस्यश्चोपयामगृहीतोसि स सर्पोस्य हूस्पत्याय त्वा।।[1]

षड्रात्रीर्दीक्षितः स्यात् षड् वा ऋतवः संवत्सरः.........

द्वादशरात्रीर्दीक्षितः स्यात् द्वादश मासाः संवत्सरः.....

त्रयोदशरात्रीर्दीक्षितः स्यात् त्रयोदशमासाः संवत्सरः .........

पञ्चदशरात्रीर्दीक्षितः स्यात्पञ्चदश वा अर्धमासस्य रात्रयोर्धमासशः संवत्सर आप्यते .... चतुर्वि शति, रात्रिर्दीक्षितः स्याच्चतुर्वि शतिरर्धमासाः संवत्सरः त्रि शत रात्रीर्दीक्षितः स्यात् त्रिं शदक्षराविराट्... मासं दीक्षितः स्याद्यो मासः स संवत्सरः।।[2]

तस्य त्रीणि च शतानि षष्टिश्च स्तोत्रीयास्तावतीः संवत्सरस्य रात्रयः।[3]

उपमायगृहीतोसि।मधवे त्वोपयामगृहीतोसि माधवाय त्वोपयामगृहीतोसि शुक्राय त्वोपयामगृहीतोसि शुचये... नभसे.... नभस्याय .... इवे .... सहसे.... सहस्याय....तपसे तपस्याय.... हसस्पतये त्वा।।[4]

सर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवापतये स्वाहा।।[5]

मधवे स्वाहा माधवाय स्वाहा शुक्त्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वाहे षाय स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहा हसस्पतये स्वाहा।।[6]

तं त्रयोदशान्मासादक्रीणँस्तस्मात् त्रयोदशोमासो नानुविद्यते।[7]

त्रीणिच वैशतानि षष्टिश्च संवत्सरस्याहानि... सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रयः।।[8]

द्वादशरत्नी रशना कर्तव्या ३ त्रयोदशरत्नी ३ रिति।ऋषभो वा एष ऋतूनां। यत्संवत्सरः। तस्य त्रयोदशो मासो विष्टपं। ऋषभं एष यज्ञानां।

---

१. तै. सं. १/४/१४
२. तै. सं. ५/६/७
३. तै.सं. ७/५/१
४. वा.सं. ७/३०
५. वा. सं.२२/३०
६. वा. सं.२२/३१
७. ऐ. ब्रा. ३/१
८. ऐ. ब्रा. ७/१७

यदश्वमेधः।यथा वा ऋषभस्य विष्टपं।एवमतस्य विष्टपम्।।[1]

रविणां लंधितो मासश्चान्द्रः ख्यातो मलिम्बुलचः।[2]

मासद्वये यदाप्येकराशिं संक्रमेतादित्यस्तत्राद्यो मलिम्लुचः शुद्धोन्यः।[3]

असंक्रान्तिद्विसंक्रांन्ती संसर्पांहस्पती समौ।[4]

**सावनचान्द्रसौरमासाः**

तस्मादित्यः षण्मासो दक्षिणेनैति षडुत्तरेण।[5]

य..... उदगयने प्रमीयते देवानामेव महिमानं गत्वा-

दित्यस्य सायुज्यं गच्छत्यथयो दक्षिणे प्रमीयते पितृणामेव

महिमानं गत्वा चन्द्रमसः सायुज्य सलोकतामाप्नोति।[6]

पञ्च शारदीयने यजेत।..... पञ्च वा ऋतवः संवत्सरः।[7]

द्वादशमासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेन।[8]

मुखं वा एतदृतूनां।यद्वसन्तः।[9]

तस्य ते (संवत्सरस्य) वसन्तः शिरः। ग्रीष्मो दक्षिणः पक्षः।

वर्षाः पुच्छं।शरदुत्तरः पक्षः। हेमन्तो मध्यम्।[10]

उमयतो मुखमृतुपात्र भवति की हि तद्वद यदृतूनां मुखम्।[11]

प्रजापतेर्ह वै प्रजाः ससृजानस्य पर्वाणि विसस्त्र सुः स वै संवत्सर

एव प्रजापतिस्तस्यैतानि पर्वाण्यहोरात्रयोः सन्धी पौर्णमासी

चामावास्या चतुर्मुखानि।।३५।। स विस्त्रस्तैः पर्वभिः।

न शशाक हातुँ तमेतैर्हविर्यज्ञैर्देवा अभिष- ज्यन्नग्निहोत्रेणै

---

१. तै. ब्रा. ३/८/३

२. व्यासः

३. मैत्रेयसूत्र

४. ना.सं. मु.चि.

५. तै. सं. ६/५/३

६. नारायण उपनि. अनु. ८

७. तै. ब्रा. २/७/१०

८. ऐ. ब्रा. १/१

९. तै. ब्रा. १/१/२/६, ७

१०. तै. ब्रा. ३/१०/४/१

११. तै. सं. ६/५/३

वाहोरात्रयोः सन्धी तत्पर्वाभिषज्यँस्तत्समदधुः पौर्णमासेन

चैवामास्येन च पौर्णमासी चामावास्याच तत्पव भियज्यंस्त त्समदध

श्चातुर्मास्यैरेवर्तुमुखानि तत्पर्वाभिषज्येंस्तत्समदधुः।।३ ६ ।।[1]

अथ यदाह। पवित्रन् पवयिष्यत्त्सहरवात्सहीयानरूणो-

रुणरजा इति। एषं एव तत् ।एष ह्येव तेर्धमासाः।

एष मासाः। अथ यदाह। अग्निष्टोम उक्थ्योग्निर्ऋतुः

प्रजापतिः संवत्सर इति। एष एव तत् ।एषह्येव ते यज्ञ-

ऋतवः। एष ऋृतवः। एष संवत्सरः।[2]

पवित्रन् पवयिष्यन् पूतो मेध्यः। यशो यशस्वानायुरमृतः।

जीवो जीविष्यन्त्स्वर्गो लोकः। सहस्वान् सहीयानोजस्वान्

सहमानः। जयन्नभिजयन्त्सुद्रविणो द्रविणोदाः। आर्द्रपवित्रो

हरिकेशो मोदः प्रमोदः।। [3]

अरूणोरुणरजाः पुण्डरीको विश्वजिदभिजित्। आर्द्रः

पिन्वमानोन्नवान् रसवानिरावान्। सर्वोषधः सम्भरो महस्वान्।।[4]

अग्निर्ऋतुः सूर्यऋतुश्चन्द्रमा ऋुतुः। प्रजापतिः संवत्सरो महान्कः।[5]

## मध्वादिचैत्रादिनामानि

संवत्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्नेषा वे

संवत्सस्य पत्नी यदैकाष्टकैतस्यां वा एष एता

रात्रि वसति साक्षादेव संवत्सरमारभ्य दीक्षन्त आर्त

वा एते संवत्सरस्याभिदीक्षन्ते य एकाष्टकायां

दीक्षन्तेन्तनामानावृतू भवनो व्यस्त व एते संवत्सरस्या-

भिदीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतः

फल्गुनीपूर्णमासे दीक्षेरन् मुखं वा एतत्।।१ ।।

---

१. शतपथब्राह्मण १/६/३

२. तै. ब्रा. ३/१०/६

३. तै. ब्रा. ३/१०/१

४. तै. ब्रा. ३/१०/१

५. तै. ब्रा.३/१०/१

संवत्सरस्य यत्फल्गुनीपूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षन्ते तस्यैकैव निर्या यत्सामेध्ये विषूवांत्सम्पद्यते चित्रापूर्णमासे दीक्षेरन्मुखं वा एतत्संवत्सरस्य यच्चित्रापूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षन्ते तस्य न काचन निर्या भवति चतुरहे पुरस्तात् पौर्णमार्स्य दीक्षेरन् तेषामेकाष्टकायां क्रयः सम्पद्यते तेनैकाष्टकां न छंबट् कुर्वन्ति तेषाम्।।२।। पूर्वपक्षे सुत्या सम्पद्यते पूर्वपक्षं मासा अभिसम्पद्यन्ते ते पूर्वपक्षे उत्तिष्ठन्ति तानुतिष्ठत् ओषधयो वनस्पतयोनूत्तिष्ठन्ति तान् कल्याणी कीर्तिरनूत्तिष्ठत्यरात्सुरिमे यजमाना इति तदनु सर्वे राध्नवन्ति।।[१]

न पूर्वयोः फल्गुन्योरग्निमादधीत। एषा वै जघन्या रात्रिः संवत्सरस्य। यत्पूर्वे फल्गुनी। पृष्टितएव संवत्सरस्याग्निमाधाय। पापीयान् भवति। उत्तरयोरादधीत। एषा वै प्रथमा रात्रिः संवत्सरस्य।यदुत्तरे फल्गुनी। मुखत एव संवत्सरस्याग्निमाधाय। वसीयान् भवति।[२]

एषाह संवत्सरस्य प्रथमा रात्रिर्या फाल्गुनीपूर्णमासी।[३]

फाल्गुन्यां पौर्णमास्यां चातुर्मास्यानि प्रयुञ्जीत।
मुखं वा एतत्संवत्सरस्य यत्फाल्गुनीपौर्णमासी।।[४]

बर्हिषा पूर्णमासे व्रतमुपैति वत्सैरमावास्यायाम्।
अमावास्यया मासान्सम्पाद्यहरुत्सृजन्ति अमावास्यया हि मासान् सम्पश्यन्ति पौर्णमास्या मासान्सम्पाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान्सम्पश्यन्ति।।[५]

यो वै पूर्ण आसिञ्चति सरा स सञ्चिति यः पूर्णादुदचति प्राणमस्मित्सदधाति यत्पौर्णमास्या भासांत्सम्पाद्याहरुत्सृजन्ति संवत्सरायैव तत्प्राणं दधति तदनु सत्रिणः प्राणन्ति यदहर्नो-त्सृजेयुर्यथा दृतिरुपनद्धो विपतत्येव संवत्सरो विपतेदाति मार्छेयुर्यत्पौर्णमास्या मासान्सम्पाद्याहरुत्सृजन्ति संवत्सरायैव तदुदानं दधति तदनु सत्रिण उदनन्ति नार्तिमार्छति पूर्णमासे वै देवाना सुतो यत्पौर्णमास्या। मासान्त्सम्पाद्याहरुत्सृजन्ति देवानामेव तद्यज्ञेन यज्ञं प्रत्यवरोहन्ति।।[६]

---

१. तै.सं.७/४/८
२. तै. ब्रा. १/१/२/८
३. शतपथब्राह्मण।६/२/२/१८
४. गोपथब्राह्मण ६/११
५. तै. सं. ७/५/६/१
६. तै. सं. ७/५/६

## पूर्वापरपक्षः

पूर्वपक्षं देवान्वसृज्यन्ते। अपरपक्षमन्वसुराः। ततो देवा अभवन्। परासुराः।।[1]

पूर्वपक्षाश्चितयः। अपरपक्षाः पुरीषम्।।[2]

नवो नवो भवति जायमान इति पूर्वपक्षादिमभिप्रत्याह्नां

केतुरुषसामेत्यग्रमित्यपरपक्षान्तमभप्रेत्य.....।।

संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत्। संकल्पमानं

प्रकल्पमानमुपकल्पमानमुपक्कूप्तं क्लृप्तं। श्रेयोवसीय

आयत् सम्भूतं भूतम्।।[3]

दर्शा दृष्टा दर्शता विश्वरूपा सुदर्शना।अप्यायमाना प्यायमाना

प्यायासूतृतेरा। आपूर्यमाणा पूर्यमाणा पूरयन्ति पूर्णा पौर्णमासी।।[4]

प्रस्तुतं विष्टुत स्तुतं कल्याणं विश्वरूपं। शुक्रममृतं

तेजस्वि तेजः समृद्धं।अरुणं भानुमन् मरीचिमदभितपत् तपस्वत्।।[5]

सुता सुन्वती प्रसुता सूयनामाऽभिषूयमाणा।पीति प्रया सम्पा

तृप्तिस्तर्पयन्ती। कान्ता काम्या कामजाताऽयुष्मती कामदुघा।।[6]

चन्द्रमा वै पञ्चदशः। एष हि पञ्चदश्यामपक्षीयते। पञ्चदश्यामापूर्यते।।[7]

द्वादश पौर्णमास्यः। द्वादशाष्टकाः। द्वादशामावास्याः।[8]

पौर्णमास्यां पूर्यगहर्भवति।व्यष्टकायामुत्तरं.... अमावास्यायां

पूर्वमहर्भवति। उदृष्ट उत्तरम्।।[9]

यत्वा देन प्रपितन्ति तत आप्यायरो पुनः।

वायुः सोमस्य रक्षिता समानां मासा आकृतिः।।[10]

यमादित्या शुमाप्याययन्ति यमक्षितमक्षितयः पिबन्ति।[11]

---

१. तै. ब्रा. २/२/३/१
२. तै.ब्रा. ३/१०/४/१
३. तै. ब्रा. ३/१०/१/१
४. तै. ब्रा. ३/१०/१/१
५. तै. ब्रा. ३/१०/१/२
६. तै. ब्रा. ३/१०/१,२,३
७. त.ब्रा.१/५/१०
८. तै.ब्रा. १/५/१२
९. तै. ब्रा. १/८/१०/२
१०. ऋ. सं. १०/८५/५
११. तै. सं. २/४/१४

**चन्द्रप्रकाशः**

सूर्यरश्मिश्चन्द्रमा गन्धर्वः।[१]

सोमावास्यायां रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनु प्रविश्य ततः प्रातर्जायते।।[२]

वस्वन्न ह्येषां तद्यदेष एता रात्रिमिहामावसति तस्मादमावास्या नाम।।[३]

चन्द्रमा अमावास्यायामादित्यमनुप्रविशति.... आदित्याद्वै चन्द्रमा जायते।[४]

आदिप्रत्नस्य रेतसो ज्योतिषश्यन्ति वासरम्।परो यदिध्यते दिवा।।[५]

आश्रित्यताममावास्यां पश्यतः सुसमागतौ।

अन्योन्यं चन्द्रसूर्यौ तौ यदा तद्दर्श उच्यते।।

सोमराजन् प्रण आयूषि तारीरहानीव सूर्यो वासराणि।।[६]

एकविंशमेतदहरूपयन्ति विषुवन्ते मध्ये संवत्सरस्यैतेन वै देवा एकविंशेनादित्यं स्वर्गाय लोकायोदयच्छन्त्स एष इत एकविंशस्तस्य दशावस्तादहानि दिवाकीर्त्यस भवन्ति दश परस्तान्मध्य एष एकविंश उभयतो विराजि प्रतिष्ठितस्तस्मा-देषोन्तरेमां लोकान्यन् न व्यथते तस्य वे देवा आदित्यस्य स्वर्गाल्लोकादयपाताद-बिभयुस्तं त्रिभिः स्वर्गलोकैरवस्तात्प्रत्युत्तभ्नुवन् स्तोमा वै त्रयः स्वर्गा लोकास्तस्य पराचोतिपाताद विभयुस्तं त्रिभिः स्वर्गैर्लोकैः परस्तात्प्रत्यस्तभ्नुवंस्तोमा त्रयः स्वर्गा लोका स्तत्र योऽवस्तात्सप्तदशा भवन्ति त्रयः परस्तान्मध्यं एष एकविंशः।।[७]

यथा वै पुरुष एवं विषुवास्तस्य यथा दक्षिणोर्ध एवं पूर्वार्धो विषुवतो यथोत्तरोर्ध एवमुत्तरोर्धो विषवतस्तस्मादुत्तर इत्याचक्षते प्रबाहुक्सतः शिर एव विषुवान्।।[८]

सन्ततिर्वा एते गंहाः। यत्परः सामानः। विषुवान् दिवा कीर्त्य। यथा शालायै पक्षसी। एव संवत्सरस्य पक्षसी।।[९]

---

१. तै.सं. ३/४/७/१
२. बृहदा. शत. ब्रा. १४/४/३/२२
३. शत. ब्रा. १/६/४/५
४. ऐ. ब्रा.४०/५
५. ऋ.सं. ८/६/३०
६. ऋ. सं. ८/४४/७
७. ऐ. ब्रा. १८/१८
८. ऐ. ब्रा. १८/२२
९. तै. ब्रा. १/२/३

ऋग्भिः पूर्वाहणे दिवि देव ईयते।यजुर्वेदे तिष्ठति मध्ये अह्नः। सामवेदेनास्तमये महीयते।वेदैरशून्यस्त्रिभिरेति सूर्यः।।[1]

पूर्वाहूणे देवानां मध्यन्दिनो मनुष्याणामपराहणः पितृणाम्।।[2]

उतायातं संगवे प्रातरह्नो मध्यन्दिन उदिता सूर्यस्य। दिवानक्तमवसा शन्तमेन नेदानी पीतिरश्विना ततान।।[3]

देवस्य सवितुः प्रातः प्रसवः प्राणः। वरुणस्य सायमासवोपानः। यत्प्रतीचीनं प्रातस्नात्। प्राचीन संगवात्।ततो देवा अग्निष्टोमं निरमिमत्। तत्तदातवीर्यं निर्मार्ग। मित्रस्य संगवः। तत्पुण्यं तेजस्व्यहः।तस्मात्तर्हि पशवः समायन्ति।पत्प्रतीचीन संगवात्।प्राचीनं मध्यन्दिनात्। ततो देवा उक्थ्यं निरमिमत। तत्।बृहस्पतेर्मध्यन्दिनः। तत्पु। तस्मात्तर्हि तेक्ष्णिष्ठ तपति। यत्प्रतीचीनं मध्यन्दिनात्।प्राचीनमपराह्णात्।ततो देवाः षोडशिनं निरमिमत। ततदा। भगस्यपराहणः। तत्पु। तस्मादपराहण कुमार्यो भगमिच्छमानाश्चरन्ति।

यत्प्रतीचीनमपराहणातं। प्राचीन सायात्। ततो देवा अतिरात्रं निरमिमत। ततदा। वरुणस्य सायं। तत्पु। तस्मातर्हि नानृतं वदेत्।।[4]

आदित्यस्वेव सर्व ऋतवः। यदैवादेत्यथ वसन्तो यदा संगवोथ ग्रीष्मो यदा मध्यन्दिनोथ वर्षा यदापरहाणोथ शरद्यशैवास्तमेत्यथ हेमन्तः।।[5]

तस्मा उद्यन्त्सूर्यो हिकृणोति संगवः प्रस्तौति मध्यन्दिन उदंगायत्यपराह्नः प्रतिहरत्यस्तं यन्निधनम्।।[6]

## मुहूर्तम्

अथ यदाह। चित्रः केतुर्दाता प्रदाता सविता प्रसविताभिशास्तानुमन्तेति।एष एव तत्।एष ह्येव ते ह्नो मुहूर्ताः। एष रात्रेः।[7]

---

१. तै. ब्रा. ३/१२/९/१
२. शत. ब्रा. २/४/२/८
३. तै.ब्रा. १/५/३
४. शत. ब्रा. २/२/३/९
५. अथ. सं. ९/३/४६
६. तै. ब्रा. ३/१०/९
७. तै. ब्रा. ३/१०/१

चित्रः केतुः प्रभानाभान्त्संभान्। ज्योतिष्मा स्तेजस्वानातप स्तपन्निभितपन्। रोचनो रोचमानः शोभनः शोभमानः कल्याणः।।[१]

दाता प्रदाताऽनन्दोगोदः प्रमोदः।आवेशन्निवेशयन् संवेशनः स शान्तः शान्तः। आभवन् प्रभवन् सम्भवन् सम्भूतो भूतः।।[२]

सविता प्रसविता दीप्तो दीपयन् दीप्यमानः। ज्वलन् ज्वलिता तपन् वितपन् सन्तपन्। रोचनो रोचमानः शुंभूः शुभमानो वामः।।[३]

अभिशास्तानुमन्तानन्दो मोदः प्रमोदः। आसादयन् निषादयन् सँ सादनः सन्नः सन्नः। आभूर्विभूः प्रभूः शंभूर्भुवः।।[४]

## प्रतिमुहूर्तम्

अथ यदाह। इदानी तदानीमिति। एष एव तत्। एषह्येत ते मुहूर्तानां मुहूर्ताः।[५]

इदानी तदानीमेतहि क्षिप्रमजिरं। आशुर्निमेष फणोद्रवन्नतिद्रवन्। त्वर स्त्वरमाण आशुरशीयान् जवः।।[६]

## कलाकाष्ठा

सर्वे निकेषा जज्ञिरे विद्युतः पुरुषादधि। कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः।।[७]

## नक्षत्राणि

अप त्ये तावयो यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसेः।।[८]

अभि श्यावं न कृशनेमिरश्वं नक्षत्रेभिः पितरो द्यामपिंशन्।।[९]

अथो नक्षत्राणामेषामुपस्थे सोम आहितः।।[१०] सूर्याया वहतुः प्रागात् सविताय-मवासृजत्। अद्यासु हन्यन्ते गावोर्जुन्योः पर्युह्यते।।[११]

---

१. तै. ब्रा. ३/१०/१/१, २

२. तै.ब्रा. ३/१०/१/२

३. तै.ब्रा. ३/१०/१/३

४. ऋ. सं. ५/७६/३

५. तै.ब्रा. ३/१०/९/९

६. तै.ब्रा. ३/१०/१/४

७. नारायण उपनिषद् अनु. १

८. अथ.सं. १३/२/१७, २०/४७/१४

९. ऋ. सं. १०/६८/११

१०. ऋ. सं. १०/८५/२ अथ.सं. १४/१/२

११. ऋ.सं. १०/८५/१३

सूर्याया वहतुः प्रागत् सवितायमवासृजत्।

मघासु हन्यन्ते गावः फल्गुनीषु व्युह्यते।।

एता वा इन्द्रनक्षत्रं यत्फल्गुन्योप्यस्य प्रतिनाम्न्योर्जुनो हवै

नामेन्द्रो यदस्य गृह्यं नामार्जुन्यो वै नामैतास्ताः।।[1]

कृत्तिकानक्षत्रमग्र्दिवताग्नेरुचस्थ प्रजापतेर्धातुः सोमस्यर्चे त्वा रुचे तथा भासे त्वा ज्योतिषे त्वा रोहिणी नक्षत्रं प्रजापतिर्देवता मृगशोर्ष नक्षत्र सोमो देवतार्द्रानक्षत्र रुद्रो देवता पुनर्वसूनक्षमदितिदेवता तिष्यो नक्षत्रं बृहस्पतिर्देवताश्रेषा नक्षत्र सर्पा देवता मघा नक्षत्रं पितरो देवता फल्गुनी नक्षत्रमर्यमा देवता फल्गुनी नक्षत्रं भगो देवता हस्तो नक्षत्र सवितादेवता चित्रानक्षमिन्द्रो देवता स्वाती नक्षत्रं वायुर्देवता विशाखे नक्षत्रमिन्द्राग्नीदेवतान्राधा नक्षत्रं मित्रो देवता रोहिणी नक्षत्रमिन्द्रो देवता विचुत्तौ नक्षत्रं पितरो देवताषाढनक्षत्रमापो देवताषाढा नक्षत्रं विश्वेदेवा देवता श्रोणा नक्षत्रं विष्णुर्देवता श्रविष्ठा नक्षत्रं वसवो देवता शतभिषङ्नक्षत्रमिन्द्रो देवता प्रोष्ठपदनक्षत्रमजएकपाद्देवता प्रोष्ठपदा नक्षत्रमहिर्बुध्नियो देवता रेवती नक्षत्रं पूषा देवताऽश्वयुजौ नक्षत्रमश्विनौ देवतापभरणीर्नक्षत्रं यमो देवता पूर्णाश्चाद्यत्ते देवा अदधुः।।[2]

अग्नेः कृत्तिकाः। शुक्रं परस्ताज्ज्योतिरवस्तातढ। प्रजापते रोहिणी। आपः परस्तादोषध-योवस्तात्। सोमस्येन्वका विततानि। परस्तात् वयन्तोवस्तात्। रुद्रस्य बाहू। मृगयवः परस्ताद्विक्षरोऽवस्तात्। अदित्यै पुनर्वसू। वातः परदार्द्रमवस्तात्। बृहस्पतेस्तिष्यः। जुह्वतः परस्ताद्यजमाना अवस्तात्। सर्पाणामाश्रेषाः। अभ्यागच्छतः परस्तादभ्यातृत्यन्तोवस्तात्। पितृणां मघाः। रुदन्तः परस्तादपभ्रंशोवस्तात्। अर्यम्णः पूर्वेफल्गुनी। जाया परस्तादृषभोवस्तात्। भगस्योत्तरे। वहतवः परस्ताद्वहमाना अवस्तात्। देवस्य सवितुर्हस्तः। प्रसवः परस्तात्सनिर-वस्तात्। इन्द्रस्य चित्रा। ऋतं परस्तात्सत्यमवस्तात्। वायोनिर्दष्टया व्रततिः। परस्तादसिद्धिर-वस्तात्। इन्द्रागिनयो-र्विशाखे। युगानि परस्तात् कृषपाणां अवस्तात्। मित्रस्यानूराधा। अभ्यारोहत्परस्ताद्द-भ्यारूढमवस्तात्। इन्द्रस्य रोहिणी। श्रृणत्परस्तात्प्रतिश्रृणदवस्तात्। निर्ऋत्यै मूलबर्हणी। प्रतिभञ्जन्तः परस्तात्प्रति-श्रृणन्तोवस्तात्। अपां पूर्वा अषाढाः। वर्चः परस्ता-त्समितिरवस्तात्। विश्वेषां देवानामुत्तराः। अभिजयत्परस्तादभिजितमवस्तात्। विष्णौः श्रोणा। पृच्छमानाः परस्तात्पन्था अवस्तात्। वसूना श्रविष्ठाः।

१. शत. ब्रा. २/१/२/११

२. तै. सं. ४/४/१०

भूतं परस्ताद्भूतिरवस्तात्। इन्द्रस्य शतभिषक्। विश्वव्यचाः परस्ताद्विश्वक्षितिरवस्तात्। अजस्यैकपदः पूर्वे प्रोष्ठपदाः। वैश्वानरं परस्ताद्वैश्वाव-समवस्तात्। अहेर्बुध्नियस्योत्तरे। अभिषिञ्चन्तः परस्तादभि-श्रृण्वन्तोवस्तात्। पूष्णो रेवती गावः परस्तात् वत्सा अवस्तात्। अश्विनोर-श्वयुजौ। ग्रामः परस्तात्सेना-वस्तात्। यमस्यापभरणीः। अपकर्षन्तः परस्तादपवहन्तोव-स्तात्। पूर्णा पश्चाद्यते देवा अदधुः।।[१]

चित्राणि साकं दिवि रोचनानि सरीसृपाणि भुवने जवानि।

अष्टविंशं सुमतिमिच्छमानो अहानि गीर्भिः सपर्यामि नाकम्।।१।।

सुहवं मे कृत्तिका रोहिणी चास्तु भद्रं मृगशिरः शमार्द्रा।

पुनर्वसू सूनृता चारु पुष्पयो भानुराश्लेषा अयनं मघा मे।।२।।

पुण्यं पूर्वाफल्गुन्यौ चात्र हस्तश्चित्रा शिवा स्वातिः सुखो मे अस्तु।

राधो विशाखे सुहवानुराधा ज्येष्ठा सुनक्षत्रमरिष्टं मूलम्।।३।।

अन्नं पूर्वा रासन्तां मे अषाढा ऊर्ज ये द्युत्तर आ वहन्तु।

अभिजिन्मे रासतां पुण्यमेव श्रवणः श्रविष्ठाः कुर्वता सुपुष्टिम्।।४।।

आ मे महच्छतभिषग्वरीय आ मे द्वया प्रोष्ठपदा सुशर्म।

आ रेवती चाश्वयुजौ भगं म आ में रयि भरण्य आ वहन्तु।।५।।[२]

प्रबाहुर्वा अग्रे क्षत्राण्यातेषुः। तेषामिन्द्रः क्षत्राण्यादते।

न वा इमानि क्षत्राण्यभूवन्निति। तन्नक्षत्राणां नक्षत्रत्वम्।।[३]

सलिलं वा इदमन्तरासीत्। यदतरन्। तत्तारकाणां

तारकत्वम्। यो वा इह यजते। अमु सलोकं नक्षत्रे।

तन्नक्षत्राणां नक्षत्रत्वम्। देवगृहा वै नक्षत्राणि। य एवं

वेद। गृह्येव भवति। यानि वा इमानि पृथिव्याश्चित्राणि।

तानि नक्षत्राणि। तस्मादश्लीलनाम श्चित्रे नावस्येन्न

यजेत। यथा पापाहे कुरुते। तादृगेव तत्।।[४]

---

१. तै. ब्रा. १/५/१

२. अथ. सं. १९/७

३. तै. ब्रा. २/७/१८/३

४. तै.ब्रा. १/५/३

अग्नीषोमा पुनर्वसू। अस्म धारयतं रोयम्।[1]

वाजिनीवती सूर्यस्य योषा चित्रामधा राय इशे वसूनाम्।।[2]

उषा अदर्शि रश्मिभिर्व्यक्ता चित्रामघा विश्वमनुप्रभूता।।[3]

मधमिति धननामधेयं महतेर्दानकर्मणः।[4]

स्वस्ति पथ्ये रेवती।[5]

उपमास्वबृहती रेवतीरिषोधि स्तोवस्य पवमान नोगहि।[6]

प्रजापतिर्वे स्वां दुहितरमभ्यध्यायद्दिवमित्यन्य आहुरुषस-
मित्यन्ये तामृश्यो भूत्वा रोहितं भूतामभ्यैत् तं देवा अपश्यन्न-
कृतं वै प्रजापतिः करोतीति ते तमैछन्य एनमारिष्यत्येतमन्योन्य
स्मिन्नविदंस्तेषां या एव घोरतामास्तन्व आसंस्ता एकधा
समभरंस्ता संभृता एष देवो भवत्तदस्यै तद्भतवन्नम भवति
वै स योस्यैतदेवन्नम वेद तं देवा अप्रुपन्नयं यै प्रजापतिरकृत
मकरिमं विध्येति स तथेत्यब्रवीत्स वै वो वरं वृणा इति वृणीष्वेति स
एतमेव वरमवृणीत् पशूनामाधिपत्यं तदस्यैतत्पशुभन्नम
पशुमान्यभवति योस्यै तदेवं नाम वेद तमभ्यायत्याविध्यत्स
विद्ध उर्ध्वउदप्रपत तमेतं मृगइत्याचक्षत्रे पर उ एव मृगव्याधः
स उ एव स या रोहित् सा रोहिणी यो एवेषु स्त्रिकाण्डासो एवेषु
त्रिकाणडा तद्वा इदं प्रजापतेरेतत् सिक्तमधावत्तत् सरोभवत्।।[7]

सा तत ऊर्ध्वारोहत्। सा रोहिण्यभवत्। तद्रोहिण्यै रोहिणित्वम्।
रोहिण्यामग्निमादधीत। स्व एवैनं योनी प्रतिष्ठितमाधत्ते।
ऋध्नोत्येतेन।।[8]

---

१. ऋृ. सं. १०/१९/१
२. ऋृ. सं. ७/७५/५
३. ऋ. सं. ७/७७/३
४. निरुक्त १/७
५. ऋ. सं. ५/५१/१४
६. ऋृ. सं. ९/७२/९
७. ऐ. ब्रा. १३/९
८. तै. ब्रा. १/१/१०/६

प्रजापति रोहिण्यामग्निमसृजत। तं देवा रोहिण्यामादवत्।
ततो वै ते सर्वान् रोहानरोहन्। तद्रोहिण्यै रोहिणित्वम्।
रोहिण्यामग्निमाधत्ते। ऋध्नोत्येव। सर्वान् रोहान् रोहति।।[1]
देवा वै भद्राः सन्तोग्निमाधित्संग। तेषामनाहितोग्निरासीत्।
अथैम्यो वामं वस्वामाक्रामत्। ते पुनर्वस्वोरादधत। ततो वै तान्
वामं वसुपावर्तत। यः पुरा भद्रः सन् पापीयान्त्स्यात्।
सपुनर्वस्वोरग्निमादधीत्। पुनरैवैनं वामं वसुपावर्तते।
भद्रो भवति।।[2]
अन्वेषामरात्स्मेति। तदनूराधाः। ज्येष्ठमेषामवधिष्मेति।
तत् ज्येष्ठध्नी। मूलमेषामवृक्षामेति। तन्मूलबर्हणी।
यन्नासहन्त। तदषाढाः। यदश्रोणत्। तच्छोणा। यदश्रृणोत्
तच्छ्र्विष्ठाः। यच्छतमभिषज्यन्। तच्छतभिषकः। प्रोष्ठ-
पदेषूदयच्छन्त। रेवत्यामरवन्ते। अश्वयुजोरयुञ्जत्।
अपभरणीष्वपावहन्।।[3]
यौ वै नक्षत्रियं प्रजापति वेद। उभयोरेनं लोकयोर्विदुः। हस्त
एवारय हस्त। चित्रा शिरः। निष्ठया ह्रद्रयं। ऊरू विशाखे।
प्रतिष्ठानूराधाः। एष वै नक्षत्रियः प्रजापतिः।।[4]
अम्बायै स्वाहा दुलायै स्वाहा। नितत्न्यै स्वाहा भ्रयन्त्यै स्वाहा।
मेघयन्त्यै स्वाहा वर्षयन्त्यै स्वाहा। चुपुणीकार्य स्वाहा।।[5]
चतस्त्रो देवीरजराः श्रविष्ठाः।।[6]
प्रोष्ठपदासो अभिरक्षति सर्वे। चत्वार एकमभि कर्म देवाः।
प्रोष्ठादास इति यान् यदन्ति। ते बुध्नियं परिषर्द्यूस्तुवन्तः।
अहि रक्षन्ति नमसापसद्य।।[7]

---

१. तै.ब्रा. १/१/२
२. तै. ब्रा. १/१/२
३. तै. ब्रा. १/५/२
४. तै. ब्रा. १/५/२/२
५. तै. ब्रा. ३/१/४
६. तै. ब्रा. ३/१/२
७. तै. ब्रा. ३/१/२

एकं द्वे त्रीणि चत्वारीति वा अन्यानि नक्षत्राण्यथैता एव भूयिष्ठा यत्कृत्तिकाः।[1]

अमीं य ऋक्षा निहितास उच्चा नक्तन्ददृशे कुहचिद्दिवेयुः।।[2]

यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नुचक्षसौ।।[3]

ऊर्ध्व सप्तऋषीनुपतिष्ठस्व।

कालकञ्जा वै नामासुरा आसन्। ते सुवर्गीय लोकायाग्नि-

मचिन्वत्। पुरुष इष्टाकामुपादधात् पुरुष इष्टकाम्।

स इन्द्रो ब्राह्मणो ब्रुवाण इष्टकामुपाधत्त। एषा मे चित्रानामेति।

ते सुवर्गं लोकमाप्प्रारोहन्। स इन्द्र इष्टकामावृहत्।

ते वाकीर्यन्त। ये वाकीर्यन्त। त ऊर्णविभयोभवन् द्वावृदपतताम्।

तौ दिव्यौ श्वानावभवताम्।।[1]

दैवीं नावं स्वरित्रामनागमस्त्रवन्तीमारूहेमा स्वस्तये।।[2]

हिरण्मयी नौचरद्धिरण्यबन्धना दिवि। तत्रामूतस्य पुष्यं देवाः कुष्टमवन्वत।।[3]

यत्वा सूर्य स्वर्भानुस्तमसा विध्यदासुरः। अक्षेत्रविद्यथामुग्धो भुवनान्यदीधयुः।।

स्वर्भानोरधीयन्दद्र मायाऽअवो दिवो वर्तमाना अवाहन्।

गुळ्हं सूर्य तमसापव्रतेन तुरीयेण ब्रह्मणाऽविन्ददत्रिः।।

मामामिमं तव सन्तमत्र इरस्या द्रुग्धो भियसा निगारित्। त्वं मित्रो असि सत्य-

राधास्तौ मेहावतं वरुणश्च राजा।। ग्राव्णो ब्रह्मा युयुजानः सपर्यन् कीरिणा

देवान्नमसोपशिक्षन्। अत्रिः सूर्यस्य दिवि चक्षुराधात् स्वर्भानोरपमाया अधुक्षता।।

यं वै सूर्यं स्वर्भानुस्तमासा विन्ध्यदासुरः। अत्रयस्तमन्वविन्दन्नह्यन्ये अशक्नुवन्।।[4]

ईमान्यद्वपुषे वपुश्चक्रं रथस्य येमथुः।

पर्यन्या नाहुषा युगा मह्ना रजांसि दीयथः।।[5]

बृहस्पतिः प्रथमञ्जायमानो महो ज्योतिष : परमे व्योमन्।[6]

---

१. शत. ब्रा. २/१/२/२
२. ऋ. सं. १/२४/१०
३. ऋ. सं. १०/१४/११
४. तै. ब्रा. १/१/२
५. ऋ. सं. १०/६३/१०
६. अथ. सं. ५/४/४, ६/९५/२
७. ऋ. सं. ५/४०
८. ऋ. सं. ५/७३/१
९. ऋ. सं. ४/५०/४ अथ. सं. २०/८८/४

वस्व्यसि रुद्रास्यदित्यस्यादित्यासि शुक्रासि चन्द्रासि बृहस्पतिस्त्वा सुम्ने रण्वतु।।[1]
उत्पाताः पार्थिवान्तरिक्षाछं तो दिविचरा ग्रहाः।। शन्नो भूमिर्वेपमाना
शभुल्कानिर्हत्वञ्च यत्।। नक्षत्रमुल्काभिहतं शमस्तु।। शन्नो ग्रहाश्चान्द्रमसाः
शमादित्याश्च राहुणा।। शन्नो मृत्युर्धूमकेतुः शं रुद्रास्तिग्म तेजसः।।[2]
तैत्तिरीयश्रुति में अग्न्याधान प्रभृति कमोपयोगी नक्षत्र सूचक अनेकों वचन है,
उदितेषु नक्षत्रेषु वंतं कृणुतेति वाचं विसृजति।[3]
यः कामयेत दानकामा मे प्रजा : स्युरिति। स पूर्वयोः फल्गुन्योरग्निमादधीत्।
अर्यम्णो वा एतन्नक्षत्रम्। यत्पूर्वे फल्गुनी। अर्यमेति तमाहुर्यो ददाति। दानकामा
अस्मै प्रजा भवन्ति।।[4]
यान्येव देवनक्षत्राणि। तेषु कुर्वीत यत्कारी स्यात्।
पुण्याह एव कुरुते।।[5] यां कामयेत दुहितरं प्रिया स्यादिति। तां निष्ट्यायां दद्यात्।
प्रियैव भवति।।[6] पोष्णेन व्यवस्यन्ति। मैत्रेण कृषन्ते। वारुणेन विधृतां आसते।
क्षैत्रपत्येन पाचयन्ते। आदित्येनादधते।।[7] प्रज्ञानाय नक्षत्रदर्शनम्।[8]
यादसे गणकम्।[9]
जनको ह वैदेहः। अहोरात्रैः समाजगाम। त होचुः। यो वा अस्मान वेद।
विजरुत्पाप्मानमेति।। ... अभिस्वर्ग लोकं जयति।..... अहीनाहाश्वत्थयः।
सावित्रं विदाञ्चकार।। स ह हँ सो.... भृत्वा। स्वर्गं लोकमियाय।...
देवभागो ह श्रौतर्षः। सावित्रं विदाञ्चकार।।....
शूषो ह वार्ष्णेयः आदित्येन समाजगाम।।[10]
एकं वा एतद्देवानामहः। यत्संवत्सरः।।[11]

१. तै. सं. १/२/५
२. अथ. सं. १९/१
३. तै. सं. ६/१/४/४
४. तै. ब्रा. १/१/२
५. तै. ब्रा. १/५/२
६. तै. ब्रा. १/५/२
७. तै. ब्रा. १/८/४
८. वा. सं. ३०/१०, तै. ब्रा. .३/४/२
९. वा. सं. ३०/२०
१०.तै.ब्रा. ३/१०/९
११.तै.ब्रा. ३/९/२२

# वेदाङ्गकालः

## ऋग्वेदज्यौतिषम्

पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम्।

दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः।।१ ।।

प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम्।

कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः।।२ ।। [१]

| संवत्सरनाम | स्वामी | | |
|---|---|---|---|
| | (तै. ब्रा.) | (गर्गः) | (वराहः) |
| १. संवत्सरः | अग्निः | अग्निः | अग्निः |
| २. परिवत्सरः | आदित्यः | आदित्यः | आदित्यः |
| ३. इदावत्सरः | चन्द्रमाः | वायुः | चन्द्रमा |
| ४. अनुवत्सरंः | वायुः | चन्द्रमाः | प्रजापतिः |
| ५. इद्वत्सरः | - | मृत्युः | रुद्रः |

निरेकं द्वादशार्धाब्दं द्विगुणं गतसंज्ञिकम्।

षष्टया षटया युतं द्वाभ्यां पर्वणां राशिरुच्यते।।४।। [२]

कला दश च विशा स्याद् द्विमुहूर्तस्तु नाडिके।

द्वित्रिशस्तत् कलानां तु षट्शती त्र्यधिकं भवेत्।।१६।।[३]

नाडिके द्वे मुहूर्तस्तु पञ्चाशत्पलमाषकम्।

माषकात् कुम्भको द्रोणः कुटपैर्वर्धते त्रिभिः।।१७।।[४]

पञ्चाशत्पलमाढकमनेन मिनुयाज्जलं पतितम्।[५]

यत उक्तं पञ्चाशत्पलमाढकं चतुर्भिराढकैर्द्रोणः[६]

द्रोणस्तु खार्याः खलु षोडशांशः स्यादाढको द्रोणचतुर्थभागः।

---

१. ऋग्वेदज्योतिषम्, श्लोक-१,२

२. ऋक्पाठोक्त "द्वादश्यार्धाब्दं, संज्ञिक , श्लोक-४

३. भा.ज्यो, श्लोक-१६

४. नाडी ज्यो., श्लोक-१७

५. बृहत्संहिता २३/२

६. बृ.सं.

प्रस्थश्चतुर्थांश इहाढकस्य प्रस्थाङ्ि घ्रराधैकुडवः प्रदिष्टः।।८।। [१]

ससप्तकुम्भयुक्स्योन सूर्याघोनि त्रयोदश।

नवमानि च पञ्चाह्नः काष्ठाः पञ्चाक्षराः स्मृता।।१८।।

यजुः पाठ ससप्तमं भयुक् सोमः सूर्यो धूनि त्रयोदश।[२]

श्रविष्ठाभ्यां गुणाभ्यस्तान्प्राग्विलग्नान् विनिर्दिशेत्।

सूर्यान् मासान् षळभ्यस्तानं विद्याच्चान्द्रमसानृतूत्।।१९।। [३]

यदुत्तरस्यायनतोयनं स्याच्छेषं तु यद्दक्षिणतोयनस्य।

तदेव षष्टया द्विगुणं विभक्तं सद्वादशं स्याद्दिवसप्रमाणम्।।२२।।[४]

यदुत्तरस्यायनतो गतं स्याच्छेव तथा दक्षिणतोयनस्य।

तदेव षष्टया द्विगुणं विभक्तं सद्वादशं स्याद्दिवसप्रमाणम्।।

तदर्धं दिनभागानां सदा पर्वणि पर्वणि।

ऋतुशेषं तु तद्विद्यात् संख्याय सह पर्वणाम्।।२३।।[५]

माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः।

युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते।।३२।।[६]

तृतीयां नवमीञ्चैव पौर्णमासीं त्रयोदशीम्।

षठीञ्च विषुवान् प्रोक्ताद्द्वादश्या च समं भवेत्।।३३।।[७]

चतुर्दशीमुपवसथः तस्तथा भवेद्यथोदितो दिनमुपैति चन्द्रमाः।

माघशुक्लाह्निको युंक्ते श्रविष्ठायाञ्च वार्षिकीम्।।३४।।[८]

---

१. लीलावती

२. ऋक्पाठ पूर्वाधे

३. वेदाङ्गज्यौतिषम्

४. यजुःपाठः, श्लोक-२२

५. "यदर्धं पाठः", श्लोक-२३

६. यजुःपाठः , श्लोक-३२

७. यजुः पाठः, श्लोक-३३

८. यजुः पाठः, श्लोक-३४

**यजुर्वेदज्योातिषम्**

एकादशभिरभ्यस्य पर्वाणि नवभिस्तिथिम्।

युगलब्धं सपर्व स्यात् वर्तमानार्कभं क्रमात्।।२५।।[1]

त्रिशत्यह्नां सषट् षष्ठिरब्दः षड् ऋतवोऽयने।

मासा द्वादश सूर्याः स्युरेतत्पञ्चगुणं युगम्।।२७।।[2]

उदया वासवस्य स्युर्दिनराशिः स्वपञ्चकः।

ऋषेद्विषष्टिहीनं स्यात् विशत्या चैकया स्तृणाम्।।२९।।[3]

**ऋग्यजुर्वदाङ्गज्योषिविचारः**

आश्लेषार्धाद्दक्षिणमुत्तरयमनं रवेर्धनिष्ठाद्यम्।

नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु।।१।।

साम्प्रतमयनं सवितुः कर्कटकाद्यं मृगादितश्चान्यत्।

उक्ताभावो विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः।।२।।[4]

आश्लेषार्धादासीद्यदा निवृत्तिः किलोष्णकिरणस्य।

युक्तमयनं तदासीत् साम्प्रतमयनं पुनर्वसुतः।।[5]

ब्रह्मोक्तं ग्रहगणितं महता कालेन यत् खिलीभूतम्।।[6]

श्रविष्ठाद्यात् पौष्णार्ध चरतः शिशिरो वसन्तः।[7]

यदा निवर्ततेऽप्राप्तः श्रविष्ठामुत्तरायणे।

आश्लेषां दक्षिणेऽप्राप्तस्तदा विन्द्यान्महद्भयम्।।[8]

युगमाहुः पञ्चाब्दं रविशशिनोः संहिता ङ्कारा्ये।

अधिमासावमरात्रस्फुटतिथ्यज्ञानतस्यदसत्।।२।।[9]

---

१. यजुर्वेदज्योतिषम्-२५

२. यजुर्वेदज्योतिषम्

३. यजुर्वेदज्योतिषम्-२९

४. बृहत्संहिता ३ अध्याय , श्लोक-१,२

५. पञ्चसिद्धान्तिका।

६. ब्रह्मसिद्धान्त, १ अध्याय-२ आर्या

७. बृहत्संहिता ३.१ भट्टोत्पलटीका।

८. पराशरः वचनम्

९. ब्र. सि. अ. ११, श्लोक- २

युगस्य पञ्चमस्येह कालज्ञानं निबोधत्।।[1]

चतुर्भिः कारयेत्कर्म सिद्धिहेतोर्विचक्षणः।

तिथिनक्षत्रकरणमुहूर्तैरिति नित्यशः।।[2]

ग्रहोल्काशनिनिर्घातैः कम्पैर्दाहैश्च पीडयते।

यद्यद्भयं भवति तत् तत्प्रवक्ष्याम्यशेषतः।।१२२।।[3]

आत्मज्योतिषमित्युक्तं स्वयमुक्तं स्वयंभुवा।

तत्वतः पृच्छमानस्य काश्यपस्प महात्मनः।।१६१।।

य इदं पठते विप्रो विधिवच्च समाहितः।

यथोक्तं लभते सर्वमाम्नायविधिदर्शनात्।।१६२।।[4]

## स्मृति महाभारत इत्यादि

### युगपद्धतिः

ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः।

एकैकशो युगानां तु क्रमशस्तन्निबोधत।।६८।।

चत्वार्याहुः सहस्त्राणि वर्षाणां तत्कृतं युगम्।

तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः।।६९।।

इतरेषु ससन्ध्येषु ससन्धयांशेषु च त्रिषु।

एकापापेन वर्तन्ते सहस्त्राणि शतानि च।।७०।।

यदेतत् परिसंख्यातमादावेवं चतुर्युगम्।

एतद्वादशसाहस्त्रं देवानां युगमुच्यते।।७१।।

दैविकानां युगानान्तु सहस्त्रपरिसंख्यया।

ब्राह्ममेकमहर्ज्ञेयं तावतीं रात्रिमेव च।।७२।।

तद्वैः युगसहस्त्रान्तं ब्राह्मं पुण्यमहर्विदुः।

रात्रिञ्च तावतीमेव तेऽहोरात्रविदोजनाः।।७३।।

---

१. भट्टोत्पल

२. अथर्वज्यौतिषम्

३. अथर्वज्यौतिषम् , श्लोक-१२२

४. अथर्वज्योतिष ,श्लोक-१६१, १६२, २०

तस्य सोऽहर्निशस्यान्ते प्रसुप्तः प्रतिबुध्यते।

प्रतिबुद्धश्च सृजति मनस्सदसदात्मकम्।।७४।।

मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया।

आकाशं जायते तस्मात्तस्यं शब्दं गुणं विदुः।।७५।।

आकाशात्तु विकुर्वाणात् सर्वगन्धवहः शुचिः।

बलवाञ्जायते वायुः स वै स्पर्शगुणो मतः।।७६।।

वायोरपि विकुर्वाणात् विरोचिष्णु तमोनुदम्।

ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणमुच्यते।।७७।।

ज्योतिषश्च विकुर्वाणादापो रसगुणाः स्मृताः।

अद्भ्योगन्धगुणा भूमिरित्येषा सृष्टिरादितः।।७८।।

यत्प्राक् द्वादशसाहस्त्रमुदितं दैविकं युगम्।

तदेक सप्ततिगुणं मन्वन्तरमिहोच्यते।।७९।।

मन्वन्तराण्यसंख्यानि सर्गः संहार एव च।

क्रोडन्निवैतत् कुरुते परमेष्ठी पुनः पुनः।।८०।।

चतुष्पात् सकलो धर्मः सत्यञ्चैव कृते युगे।

नाधर्मेणागमः कश्चित् मनुष्यान्प्रतिवर्तते।।८१।।

इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः।

चौरिकानृतमायाभिर्धर्मश्चापैति पादशः।।८२।।

अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः।

कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः।।८३।।

वेदोक्तमायुर्मर्त्योनामाशिषश्चैव कार्मणाम्।

फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम्।।८४।।

अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे परे।

अन्ये कलियुगे नृणां युगह्रासानुरूपतः।।८५।।

तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते।

द्वापरे यज्ञमेवाहुदनिमेकं कलो युगे।।८६।।[1]

सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः।

शुक्रः शनैश्चरो राहुः केतुश्चैते ग्रहाः स्मृताः।।२९५।।[2]

अमावास्याष्टाका वृद्धिः कृष्णपक्षोऽयनद्वयम्।

द्रव्यं ब्राह्मणसम्पत्तिषुिवत्सूर्यसंक्रमः।।२१७।।

व्यतीपातो गजच्छाया ग्रहणं चन्द्रसूर्ययोः।[3]

पितृयानो ऽजवीथ्याश्च यदगस्त्यस्य चान्तरम्।

तेनाग्निहोत्रिणो यान्ति स्वर्गकामा दिवं प्रति।।१८४।।

तत्राष्टाशीतिसाहस्त्रा मुनयो गृहमेधिनः।

सप्तर्षिनागवीथ्यन्तदेवलोकं समाश्रिताः।।१८७।।[4]

वार्षिकाँश्चतुरो मासान् व्रतं किञ्चित् समाचरेत्।।

श्रसम्भवे तुलार्के दु कत्यायास्तु विशेषतः।।[5]

यावच्च कन्या तुलयोः क्रमादास्ते दिवाकरः।

शून्यं प्रेतपुरं तावद्वृश्चिकं यावदागतः।।

अनुसंवत्सरं जाता अपि ते कुरुसत्तमाः।

पाण्डुपुत्रा व्यराजन्त पञ्चसंवत्सरा इव।।२२।।[6]

तेषां कालातिरेकेण ज्योतिषाञ्च व्यतिक्रमात्।

पञ्चमे पञ्चमे वर्षे द्वौ मासानुपजायतः।।३।।

एषामभ्यधिकाः मासाः पऽच च द्वादशक्षपाः।

त्रयोदशानां वर्षाणामिति मे वर्तते मतिः।।४।।[7]

अभिजित् स्पर्धमाना तु रोहिण्या कन्यसीस्वसा।

इच्छन्ती ज्येष्ठतां देवी तपस्तप्तुं वनं गता।।८।।

तत्र मूढोऽस्मि भद्रं ते नक्षत्रं गगनात् च्युतम्।

---

१. पु. ज्यौतिषम्, श्लोक-६८ -८६

२. आचाराध्यायः ,श्लोक-२९५

३. आचाराध्यायः, श्लोक-२१७

४. याज्ञवल्क्यस्मृतिः श्लोक, १८४, १८७

५. निर्णयामृतं नामकः धर्मशास्त्र प्रसिद्धग्रंथः

६. आदिपर्व अध्याय १२४। महाभारतम् , श्लोक-२२

७. विराटपर्व अध्याय ५२। म.भा. , श्लोक-३,४

कालं त्विमं परं स्कन्द ब्रह्मणा सह चिन्तय।।९।।

धनिष्ठदिस्तदा कालो ब्रह्मणा परिकल्पितः।

रोहिणी ह्यभवत्पूर्वमेवं संख्या समाभवत्।।१०।।

एवमुक्ते तु शक्रेण कृत्तिकास्त्रिदिवं गताः।

नक्षत्रं सप्तशीर्षाभं भाति तद्वह्निदैवतम्।।११।।[१]

चकारान्यञ्च लोकं वै क्रुद्धो नक्षत्रसम्पदा।

प्रतिश्रवणपूर्वाणि नक्षत्राणि चकार यः।।३४।।[२]

अहः पूर्वं ततो रात्रिर्मासाः शुक्लादयः स्मृताः।

श्रवणादीनि ऋृक्षाणि ऋृतवः शिशिरादयः।।२।।[३]

कौमुदे मासि रेवत्यां शरदन्ते हिमागमे।

स्फीतसस्यसुखे काले।।७।।[४]

तेषां पुण्यतमा रात्रिः पर्वसन्धी स्म शारदी।

तत्रैव वसमतामासीत् कार्तिकी जनमेजय।।१६।।[५]

कृष्णशुक्लावुभौ पक्षौ गयायां यो वसेन्नरः।।९६।।[६]

काष्ठा कला मुहूर्ताश्च दिवा रात्रिस्तथा लवाः।।२१।।[७]

संवत्सरान् ऋतून् मासान् पक्षानथ लवान् क्षणान्।।१४।।[८]

स भवान् पुष्ययोगेन मुहूर्तेन जयेन च।।१७।।

कौरवेयान् प्रयात्वाशु.... [९]

ऐन्द्रे चन्द्रसमायुक्ते मुहूर्तेभिजितेष्ठमे।

दिवा मध्यगते सूर्ये तिथौ पूर्णेतिपूजिते।।६।।

समृद्धयशसं कुन्ती सुषाव प्रवरं सुतम्।[१०]

---

१. वनपर्व अध्याय २३०। म.भारतम्, श्लोक, ८-११
२. आदिपर्व अध्याय ७१। म.भारतम्, श्लोक-३४
३. अश्वमेधपर्व, अध्याय ४४। , श्लोक-२
४. उद्योगपर्व, अध्याय ८३। महाभारतम् , श्लोक-७
५. वनपर्व, अध्याय १८२। महाभारतम् ,श्लोक-१६
६. वनपर्व, अध्याय ८४। महाभारतम्
७. शान्तिपर्व, आपद्ध, अध्याय ७।
८. शान्तिपर्व, आप, अध्याय १६।।, श्लोक-१४
९. उद्योगपर्व, अध्याय ६। महाभारतम् , श्लोक-१७
१०.आदिपर्व, अध्याय १२३। महाभारतम् , श्लोक-६

एकैकश्चापि पुरुषस्तत्प्रयच्छति भोजनम्।

स वारो बहुभिर्वर्षैर्भवत्यसुकरो नरैः।।७।।[1]

अन्वधावन्मृग रामो रुद्रस्तारामृगं यथा।।२०।।[2]

ततो दैवयुयेऽतीते  देवा है समकल्यन्।

यज्ञं वेदप्रमाणेन विविद्यष्टुमीप्सवः।।१।।[3]

महाभारतकाले ग्रहगतिज्ञानं समृद्धमासीत्।

यथोक्तं शान्तिपर्वणि- अथ संवत्सराणाश्च मासानाश्च क्षयं तथा।

पक्षक्षयं तथा दृष्टवा दिवसानाश्च सङ्क्षयम्।।

महाभारते ऋत्वयनमासतिथ्यादीनामनेक अत्र उल्लेखः लभ्यते।

यथा-उक्तम्- कौमुदे मासि रेवत्यां शरदन्ते हिमागमे।

स्फीतसस्यमुखे काले कल्पः सत्यवतां वरः

ततो दैवयुगेऽतीते देवा वै सप्रकल्पयन्।

यज्ञं वेदप्रमाणेन विधिवद्यष्टुमीप्सवः।।

ततः स यज्ञं विव्याध रौद्रेण हृदि पत्रिणा।
अपक्रान्तस्ततो यज्ञो भृगो भूत्वा सपावकः।।१३।।

स तु तेनैव रूपेण दिवं प्राप्य व्यराजत।

अन्वीयमानो रुद्रेण युधिष्ठिर नभः स्थले।।१४।।[4]

तावुभौधर्मराजस्य प्रवीरौ परिवार्श्वतः।

रथाभ्यासे चकाशेते चन्द्रस्येव पुनर्वसू।।२८।।[5]

पञ्चभिर्भ्रातृभिः पार्थैर्द्रोणः परिवृत्तो बभौ।

पञ्चतारेण संयुक्तः सावित्रेणेव चन्द्रमाः।।३०।।[6]

क्षितावपि भ्राजति तत् (कस्यचिद्राज्ञो मुखं) सकुण्डलं

विशाखयोर्मध्यगतः शशी यथा।।४८।।[7]

---

१. आदिपर्व , अध्याय १६०। महाभारतम् , श्लोक-७
२. वनपर्व, अध्याय २७८। महाभारतम् , श्लोक-२०
३. रुद्र मग, महाभारतम्, श्लोक-१
४. शान्ति पर्व अध्याय १८।,श्लोक-१३-१४
५. कर्णपर्व , अध्याय ४९।, श्लोक-२८
६. आदिपर्व अध्याय १३५।, श्लोक-३०
७. कर्णपर्व, अध्याय २१।, श्लोक-४८

सप्तर्षीन्, पृष्ठतः कृत्वा युद्धयेपुरचला इव।।१९।।[1]

अत्र ते ऋषयः सप्त देवी,चारुन्धती तथा।।१४।।[2]

अगस्त्यशास्तां च दिशं प्रयाताः स्म जनदिन।।४४।।[3]

पर्वसु द्विगुणं दानमृतौ दशगुणं भवेत्।।२४।।

अयने विषुवे चैव षडशीतिमुखेषु च।

चन्द्रसूर्योपरागे च दत्तमक्षयमुच्यते।।२५।।[4]

राहुग्रसदादित्यमपर्वणि विशांपते।।१९।।[5]

अलक्ष्यः प्रभया हीनः पौर्णमासीञ्च कार्तिकीम्।

चन्द्रोभूदग्निवर्णश्च पद्मवर्णे नभस्तले।।[6]

महाभारतयुद्धवर्षे कार्तिकपौर्णमास्यां चन्द्रगहणं मार्गकृष्ण अमावस्यायां सूर्यग्रहणं घटितमासीत् मार्गशीर्षकृष्णपक्षश्च त्रयोदशदिनात्मक एव।

चतुर्दशीं पञ्चदशी भूतपूर्वां तु षोडशीम्।

इमां तु नाभिजानेहममावास्यां त्रयोदशीम्।

चन्द्रसूर्यावुभौ ग्रस्तौ एकमासी त्रयोदशीम्।।३२।।[7]

राहुश्चाग्रसदादित्यमपर्वणि विशापते।।१०।।[8]

कौमुदे कार्तिके। रेवत्यामिति शुक्लद्वादश्यां शरदः समाप्ति र्हेमन्तस्यास्य आरम्भ। एतेन तदा वसन्तो हि चैत्र वैशाख वैशाखयोरेवति सिध्यति।

सोमोवृहस्पतिः शुक्रोबुधोङ्गारक एव च।।

इन्द्रो विवस्वान् दीप्तांशुः शुचिः शौरिः शनैश्चरः।।१७।।[9]

ते तु क्रुद्धा महेष्वासा द्रौपदैयाः प्रहारिणः।

राक्षसं दुद्रुवुः संख्ये ग्रहाः पञ्च रविं यथा।।३७।।[10]

---

१. शान्तिपर्व, राजधर्म, अध्याय १००। , श्लोक-१९
२. उद्योगपर्व, अध्याय १११।, श्लोक-१४
३. उद्योगपर्व, अध्याय १४३।, श्लोक-४
४. वनपर्व, अध्याय २००।, श्लोक-२४-२५
५. सभापर्व , अध्याय ७९।, श्लोक-१९
६. भीष्मपर्व, अध्याय।
७. भीष्मपर्व, अध्याय ३।
८. गदापर्व, अध्यायः २७।, श्लोक-१०
९. वनपर्व, अध्यायः ३। , श्लोक-१७
१०.भीष्मपर्व, अध्यायः १००।,श्लोक-३७

प्रजासंहरणे राजन् सोमं सप्तग्रहा इव।।१००।।[1]

निःसरन्तो व्यदृश्यन्त सूर्यात्सप्त महाग्रहाः।।४।।[2]

लोकत्रासकरावास्तां (द्रोण्यर्जनौ) विमार्गस्थौ ग्रहाविव।।२।।[3]

प्रत्यागत्य पुर्निजष्णुर्जध्ने संसप्तकान् बहून्।

वक्रातिवक्रगमनादंगारक इव ग्रहः।।१।।[4]

त्रेता द्वापरयोः सन्धौ तदा दैवविधिक्रमात्।। १३।।

न ववर्ष सहस्त्राक्षः प्रतिलोमोभवदगुरुः।।१५।।[5]

ततः समभवद्युद्वं शुक्रांगिरसवर्चसौः (द्रौण्यर्जुनयोः)।

नक्षत्रमभितो व्योम्नि शुक्रांगिरसयोरिव।।१।।[6]

भृगुसूनुधरापुत्रौ शशिजेन समन्वितौ।।१८।।[7]

प्राजापत्यं हि नक्षत्रं ग्रहस्तीक्ष्णो महाद्युतिः।

शनैश्चरः पीडयति पीडयन् प्राणिनोऽधिकम्।।८।।

कृत्वा चांगारको वक्रं ज्येष्ठायां मधुसूदन।

अनुराधां प्रार्थयते मैत्रं संगमयन्निव।।९।।

विशेषेण हि वार्ष्णेय चित्रां पीडयते ग्रहः।

सोमस्य लक्ष्म व्यावृतं राहुरर्कमुपैति च।।१०।।[8]

श्वेतोग्रहस्तथा चित्रा समतिक्रम्य तिष्ठति।।१२।।

धूमकेतुर्महाधोरः पुष्यं चाक्रम्य तिष्ठति।।१३।।

मघास्वंगारको वक्रः श्रवणे च बृहस्पतिः।

भगं नक्षत्रमाक्रम्य सूर्यपुत्रेण पीडयते।।१४।।

शुक्रः प्रोष्ठपदे पूर्वे समारुह्य विरोचते।।१५।।

---

१. द्रोणपर्व, अध्यायः ३७।, श्लोक-१००
२. कर्णपर्व, अध्यायः ३७।, श्लोक-४
३. कर्णपर्व, अध्यायः १८।, श्लोक-२
४. कर्णपर्व, अध्यायः २०।
५. शान्तिपर्व, आपद्वर्म, अध्यायः ११।, शलोक-१३-१५
६. कर्णपर्व, अध्यायः १८ श्लोक-१
७. शल्यपर्व, अध्यायः ११।, श्लोक-१८
८. उद्योगपर्व, अध्यायः १४३। श्लोक-८-१०

रोहिणी पीडयत्येवमुभौ च शशिभास्करौ।
चित्रास्वात्यन्तरे चैव विष्टितः परुषोग्रहः।।१७।।
वक्रानुवशं कृत्वा च श्रवणं पावकप्रभः।
ब्रह्मराशि समावृत्य लोहितांगो व्यवस्थितः।।१८।।
संवत्सरस्थायिनौ च ग्रहौ प्रज्वलितावुभौ।
विशाखायाः समीपस्थौ बृहस्पतिशनैश्चरौ।।२७।।[१]
अन्तरे चैव सम्प्राप्ते कलिद्वापरयोरभूत।
स्यमन्तपञ्चके युद्धं कुरुपाण्डवसेनयोः।।१३।।[२]
एतत्कलियुगं नाम अचिराद्यत्प्रवर्तते।।३८।।[३]
अस्मिन् कलियुगे त्वस्ति पुनः कौतूहलं मम।
यदा सूर्यश्च चन्द्रश्च तथा तिष्यबृहस्पती।।९०।।
एकराशौ समेष्यन्ति प्रपत्स्यति तदा कृतम्।।९१।।[४]
प्राप्तं कलियुगं विद्धि प्रतिज्ञां पाण्डवस्य च।
आनृण्यं तातु वैरस्य प्रतिज्ञायाश्च पाण्डवः।।२३।।[५]
आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतो।
षड्द्विकपञ्चद्धि २५२६ युतः शककालस्तस्य राज्ञश्च।।[६]
मघाविषयगः सोमस्तद्दिन प्रत्यपद्यत।।२।।[७]
चत्वारिंशदहान्यद्य द्वे च मे निःसृतस्य वै।
पुष्येण सम्प्रयातोऽस्मि श्रवणे पुनरागतः।।६।।[८]

---

१. भीष्मपर्व, अध्यायः ३।, श्लोक-१२, १३, १४,१५,१७, १८,२७
२. आदिपर्व, अध्यायः २।, श्लोक-१३
३. वनपर्व, अध्यायः १४९।, श्लोक-३८
४. वनपर्व, अध्यायः १९०।, श्लोक-९०-९१
५. गदापर्व, अध्यायः ३१।, श्लोक-२३
६. बृहत्संहिता, सप्तर्षिचार
७. भीष्मपर्व अध्यायः १७।, श्लोक-२
८. गदापर्व, अध्यायः ५।, श्लोक-६

| | रा. | अं. | क. | सायन-नक्षत्र | निरयण- नक्षत्र |
|---|---|---|---|---|---|
| सूर्यः | ७ | ३ | १६ | विशाखा | शतभिषक् |
| चन्द्रमाः | ७ | ३ | २७ | अनुराधा | शतभिषक् |
| बुधः | ७ | १ | ८ | विशाखा | धनिष्ठा |
| शुक्रः | ७ | २१ | १ | ज्येष्ठा | पूर्वाभाद्रपदा |
| मंगलः | ४ | ६ | ३४ | मघा | अनुराधा |
| गुरुः | ६ | १७ | ४७ | स्वाती | श्रवण |
| शनिः | ६ | १ | ८ | चित्रा | उत्तराभाद्रपदा |
| राहुः | ७ | १० | ४३ | अनुराधा | शतभिषक् |

बृहस्पतिः संपरिवार्य रोहिणीं बभूव चन्द्रार्कसमो विंशापते।।६।।[1]

भृगुसूनुधरापुत्रौ शशिजेन समन्वितौ।।१८।।[2]

महानन्दिसुतः शुद्रागर्भोद्भवोऽतिलुब्धो महापद्मो नन्दः परशुराम इवापरोऽखिल-क्षत्रियान्तकारी भविता।। तस्याप्यष्टो सुताः सुमाल्याद्या भवितारस्तस्य च महापद्म-स्यानुं पृथ्वीं भोक्ष्यन्ति। महापद्मस्तु पुत्राश्च एकं वर्षशतमवनीपतयो भविष्यन्ति। नवैतान्नन्दान कौटिल्यो ब्राह्मणः समुद्धरिष्यति।। तेषामभावे मौर्व्याश्च पृथ्वीं भोक्ष्यन्ति। कौटिल्य एवं चन्द्रगुप्तं राज्येऽभिषेक्ष्यति।।

यावत्परीक्षितो जन्म यावन्नन्दाभिषेचनम्।

एतद्वर्षसहस्त्रं तु ज्ञेयं पञ्चदशोत्तरम्।।३२।।[3]

क्षयं संवत्सराणाञ्च मासानाञ्च क्षयं तथा।।४६।।

पक्षक्षयं तथा दृष्ट्वा दिवसानाञ्च संक्षयम्।।[4]

त्वमादायांशुभिस्तेजो निदाधे सर्वदेहिनाम्।

सर्वौषधिरसानाञ्च पुनर्वर्षासु मुञ्चसि।।४९।।[5]

यथा हिमवतः पार्श्व पृष्ठं चन्द्रमसो यथा।

---

१. बृहस्पति रोहिणी

२. शल्यपर्व अध्याय ११।

३. विष्णुपुराणम्, अंश ४, अध्याय २४।

४. शान्तिपर्व, अध्यायः ३०१, मोक्षधर्म।

५. वनपर्व, अध्यायः ३।

न दृष्टपूर्व मनुजैः .......।।[1]

यतो वायुर्यतः सूर्यो यतः शुक्रस्ततो जयः।।२०।।

एवं संचिन्त्य यो याति तिथिनक्षत्रपूजितः।।२५।।

विजयं लभते नित्यं सेनां सम्पक् प्रयोजयन्।।[2]

अद्य पौष्यं योगमुपैति चन्द्रमाः पाणिं कृष्णा-

यास्त्वं (धर्मराज) गृहाणाद्य पूर्वम्।।५।।[3]

एक द्वे त्रीणि चत्वारिति वा अन्यानि नक्षत्राण्यथैता एव भूयिष्ठा यत्कुत्तिकास्तद्भू-माननमेवैतदुपैति तस्मात् कृत्तिकास्वादधीति।।२।। एता ह वै प्राच्यै दिशो न च्यवन्ते सर्वाणि हवा अन्यानि नक्षत्राणि प्राच्यै दिशश्चयवन्ते तत्प्राच्यामेवास्यै तद्दिश्याहितौ भवतस्तस्मात् कृतिकास्वादधीत।।३।।[4]

योऽसौ वैशाखस्यामावास्या तस्यामादधीत...

आत्मन्यैवैतत् प्रजायां पशुषु प्रतितिष्ठिति [5]

तैषस्यामावास्याया एकाह उपरिष्टाद्दीक्षेरन् माघस्य वेत्याहु[6]

वसन्ते ब्राह्मणोऽग्निमादधीत। वसन्तो वै ब्राह्मस्यर्तुः। मुख वा एतदृ तुनाम्।।६६।। यद्वसन्तः। यो वसन्तेऽग्निमाघत्ते। मुख्य एवं भवति।....

न पूर्वयोः फल्गुन्योराग्निमादधीत। एषा वै जघन्या रात्रिः संवत्सरस्य। यत् पूर्वे फल्गुनी।... उत्तरयोरादधीत। एषा वै प्रथमा रात्रिः संवत्सरस्य। यदुत्तरे फल्गुनी। मुखत एव संवत्सरस्याग्तिमाधाय। वसीयान् भवति।... ।।८।।[7]

अत ऊर्ध्वमिष्टययनानि सांवत्सरिकाणि तेषां।

फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा प्रयोगः।[8]

मन्दादघः क्रमेण स्युश्चतुर्था दिवसाधिपाः।। ७८।।

होरेशाः सूर्यतनयादधोऽघः क्रमशस्तथा।।७९।।[9]

ऋतुभिर्हि संवत्सरः शक्नोति स्थातुम्।[10]

---

१. शान्तिपर्व, अध्यायः २०३, मोक्षधर्म।
२. शान्तिपर्व, अध्यायः १००।
३. आदिपर्व, अध्यायः १९८।
४. शतपथब्राह्मणम् २।१।२
५. शतपथब्राह्मणम् ११/१/१/७
६. कौ. ब्रा. १९/२/३
७. तै. ब्रा. १/१/२
८. आश्वलयान श्रौतसूत्रम् ( १/२/१४/३)
९. भूगोलाध्यायः।
१०.श.ब्रा. ६/७/१/१८

**कृत्तिकादिगणना**

कृत्तिकाः प्रथमम्। विशाखे उत्तमम्।

तानि देवनक्षत्राणि। अनूराधाः प्रथमम्।

अपभरणीरुत्तमम्। तानि यमनक्षत्राणि।

यानि देवनक्षत्राणि। तानि दक्षिणेन परियन्ति।

यानि यमनक्षत्राणि।।७।।[१]

## सिद्धान्तकालीन ज्योतिष

**गणितस्कन्ध मध्यमविधकार**

**प्राचीन सिद्धान्तपञ्चकम्**

पौलिशरोमकवासिष्ठसौरपैतामहास्तु पञ्चसिद्धान्ताः।[२]

पौलशति विस्फुटोऽसौ तस्यासन्नस्तु रोमकः प्रोक्तः।

स्पष्टतरः सावित्रः परिशेषो दूरविभ्रष्टौ।।[३]

**पितामहसिद्धान्तः**

रविशशिनोः पञ्चयुगं वर्षाणि पितामहोपदिष्टानि।

अधिमासस्त्रिंशद्भिर्मासैरवमस्त्रिषष्टयाह्नाम्।।१।।[४]

ब्रह्मोक्तं ग्रहगणितं महता कालेन यत् खिलीभूतम्।

अभिधीयते स्फुटं तत् जिष्णुसुतब्रह्मगुप्तेन।।२।।[५]

पौलिशरोमक वासिष्ठसौरपैतामहेषु यत्प्रोक्तम्।

तन्नक्षत्रानयनं नार्यभटोक्तं तदुक्तिरतः।।४६।।[६]

अयमेव कृतः सूर्येन्दुपुलिशरोमकवष्ठियवनाद्यैः।[७]

युगमन्वन्तरकल्पाः कालपरिच्छेदकाः स्मृतावृक्ताः।

यस्मान्न रोमके ते स्मृतिबाह्यो रोमकस्तस्मात्।।१३।।[८]

---

१. तान्युत्तरेण तैत्तिरीयब्राह्मण १/५/२

२. वरामिहिरचार्थे कृत

३. पञ्चसिद्धान्तिका

४. पञ्चसिद्धान्तका , श्लोक-१

५. ब्रह्मगुप्त (शके ५५०) , अध्याय-१

६. ब्रह्मगुप्त , श्लोक-४६

७. युगारम्भः

८. प्रथमाध्यायः

लाटात्सूर्यशशांकौ मध्यविन्दुच्चचन्द्रपातौ च।

कुजबुघशीध्रबृहस्पतिसितशीघ्रशनैश्चरान् मध्यान्।।४८।।

युगयातवर्षभगणान् वासिष्ठान विजयनन्दिकृतपादान्।

मन्दोच्चपरिधिपातस्पष्टकीरणाद्यमार्यभटात्।।४९।।

श्रीषेणेन गृहीत्वा रत्नोच्चरोमकः कृतः कन्था।

एतान्येव गृहीत्वा वासिष्ठो विष्णुचन्द्रेण।। ५०।।[1]

तद्युगवधो महायुगमुक्तं श्रीषेणविष्णुचन्द्राधैः।[2]

मेषादितः प्रवृत्ता नार्यभटस्य स्फुटा युगस्यादौ।

श्रीषेणस्य कुजाद्याः।[3]

## रोमकसिद्धान्तः

सप्ताश्विवेद ४२७ संख्यः शककालमपास्य चैत्रशुक्लादौ।

अर्धास्तमिते भानौ यवनपुरे भौमदिवसाद्यः।।८।।[4]

रोमकसूर्यो द्युगणात् खतिथिध्नात् १५० पञ्चकर्तु ६५ परिहीनात्।

सप्ताष्टकसप्तकृतेन्द्रियोद्धृतात् ५४७८७ मध्यमार्कः सः।।[5]

रोमकयुगमर्केन्दोर्वर्षाण्याकाशपञ्चवसुपक्षः २८५०।[6]

रवेन्द्रियदिशो १०५० ऽधिमासाः स्वरकृतविषयाष्टयः १६५४७ प्रलयाः।।[7]

शून्यैकैकाम्यस्तान्नवशून्यरसा ६०९ न्वितादिनसमूहात्।

रूपत्रिखगुण ३०३१ भक्तात् केन्द्रं शशिनोस्तगमवन्त्याम्।।५।।

त्र्यष्टक २४ गुणिते दद्याद्रसर्तुयमषट्कपञ्चकान् ५६२६६ राहोः।

भवरूपाग्न्यष्टि १६३१११ ह्रते...... ।।८।।[8]

ग्रहलाधवम्, सूर्यसिद्धान्त, अध्याय-८।

---

१. एकादशाध्यायः, श्लोक-४८-५०

२. अध्यायः ११ आर्या ५५।

३. अध्यायः २ आर्या ४६।

४. रो.सि., अध्याय १।, श्लोक-८

५. रोमकसिद्धान्तानुसार सूर्यसाधन

६. पञ्चसिद्धान्तिका

७. प्रथमाध्यायः।

८. पुलिशसिद्धान्तोक्तः, श्लोक-१४,४१,४२

खार्क १२० ध्नेऽग्निहुताशन ३३ मपास्य रूपाग्निवसु –
हुताशकृतैः ४३८३१ l हृत्वा क्रमाद्दिनेशो मध्य....।।१४।।
अष्टगुणे दिनराशौ रूपेन्द्रियशीतरश्मि १५१ भिर्भक्ते।
लब्धा राहोरशा भगणसमाश्च क्षिपेल्लिप्ता।।४१।।
वृश्चिकभागा राहोः षड्विंशतिरेकलिप्तिकालुप्ताः।।४२।।[1]
यवनाच्चरजा नाडयः सप्तावन्त्यास्त्रिभागसंयुक्ता :।
वाराणस्यां त्रिकृतिः ९ साधनमन्यत्र वक्ष्यामि।।
अष्टाचत्वारिशत्पादविहीनाः क्रमात् कृतादीनाम्।
अंशास्ते शतगुणिता ग्रहतुल्ययुगं तदेकत्वम्।। साव-
नमकृतं १५५५२०००० चान्द्रं सूर्येन्दुसंगमान् दिनीकृत्य
१६०३०००८०। सौरं भूदिनराशिः १५७७९१७८००
शशिभगणदिनानि १७३२६०००८० नाक्षत्रम्। परिवर्तैर-
युतगुणैर्द्विनिकृतै ४३२०००० भस्किरोयुगं भुङ्क्ते। रसदहन-
हुतवहानलशरमुन्यद्रीषवश्चन्द्रः।। ५७७५३३३६।।
अधिमासकाः षडग्नित्रिकदहनछिद्रशररूपाः १५९३३३६। भगणा-
न्तरशेषं यत् समागमास्ते द्वयोर्ग्रहयोः।। तिथिलोपाः
खवसुद्विकदस्त्राष्टकशून्यशरपक्षाः २५०८२२८०। दस्त्रार्थबा-
णतिथयो लक्षहताः १५५५२०००० सावनेन ते दिवसाः।।
विषया (?) ष्टौ- खचतुष्कं विश्व.... षोडशचान्द्रमानेन।
वसुसप्त रूपनवमुनिनगतिथयः १५७७९१७८०० शत-
गुणाश्च सौरेण। आर्क्षेण खाष्टरवत्रयरसदस्त्रगुणानिल
(?) शशांकाः।। १७३२६०००८०।। षट् प्राणास्तु
विनाडी, तत्षष्टया नाडिका, दिनं षष्टया। एतासा तु
त्रिशन्मासस्तैर्द्वादशभिरब्दः।। षष्टया, तु तत्पराणां विकला,
तत्षष्टिरपि कला, तासाम्। षष्टयांशस्ते त्रिशद्राशिस्ते
द्वादश भचक्रम्। चान्द्रैः सावनवियुतैः प्र ४७८०००८०

१. सिद्धान्तिकोक्त पुलिशचरखण्डः

चयस्तैरपचयोर्कदिनैः २५०८२२८०।। युगवत्सरैः प्रयच्छति
यदि मानचतुष्टयं किमेकेन। यदवाप्तं ते दिवसाः
विज्ञेयाः सावनादीनाम्।। वेदाश्विवसुरसान्तरलोचनदस्त्रेः
२२९६८२४ रवनिसूनुः।। अम्बरगगनवियन्मुनिगुण-
विवरनगेन्दुभिः १७९३७००० शशिसुतस्य।। आकाश-
लोचनेक्षणसमुद्रषट्कानलै ३६४२२० र्जीवः।। अष्टवसु-
हुतवहानल(?) यमखनगै ७०२२३८८ र्भार्गवस्यापि।।
कृतरसशरर्तुमनुभिः १४६५६४ सौरो बुधभार्गवौ दिवाकरवत्।।[1]
नक्षत्रभ्रम १५८२२३७८००। रविभगण४३२००००।
सावन दिन १५७७९१७८००। चन्द्रभगण ५७७५३३३६।
चन्द्रोच्च ४८८२१९। राहु २३२२२६। मंगल २२९६८२४।
बुधशीध्र १७९३७०००। गुरु ३६४२२०। शुक्रशीध्र
७०२२३८८। शनि १४६५६४। सौरमास ५१८४००००।
अधिमास १५९३३३६। चान्द्रमास ५३४३३३३६।
तिथि १६०३०००००८०। क्षयाह २५०८२२८०। वर्षमान
२६५ दिन १५ घटी ३१ पल ३० विपल।[2]
पञ्चभ्यो द्वावद्यौ (पौलिशरोमकसिद्धान्तौ)
व्याख्यातौ लाटदेवेन।।३।।[3]
प्रद्युम्नो भूतनये जीवो सौरे च विजयनन्दी।[4]
श्रीषेणविष्णुचन्द्रप्रद्युम्नार्यभटलाटसिंहानाम्।
ग्रहणादि विसंवादात् प्रतिदिवसं सिद्धमकृतत्वम्।।४६।।
अङ्कचिति विजयनन्दि प्रद्युम्नादीनि पादकरणानि।
यस्मात्तस्मातेषां न दूषणान्यत्र लिखितानि।।५८।।[5]

---

१. पंञ्चसिद्धान्तिका
२. पंञ्चसिद्धान्तिका
३. पंचसिद्धान्तिका, अध्याय-१,श्लोक-३
४. सिंहाचार्य, अंतिम अध्यायः
५. आर्यभट्ट अध्यायः ११ , श्लोक-४६, ५८

# वर्तमानसिद्धान्तपञ्चक

**सूर्यसिद्धन्त, सोमसिद्धान्त, वसिष्ठसिद्धान्त, रोमशसिद्धान्त तथा शाकल्यसंहितोक्त ब्रह्मसिद्धान्त**

नृपेषुसप्तवह्नय शिव (?) यमेभेषुधरोन्मिताः १५८२२३७५१६।
भभ्रमाः पश्चिमायाञ्च दिशि स्युर्वै महायुगे।।१७।।[1]
अयमेव कृतः सूर्येन्दुपुलिशरोमकवसिष्ठयवनाद्यैः।।३।।[2]
इत्थं माण्डव्य संक्षेपादुक्तं शास्त्रं मयोदितम्।
विस्तृतिर्विष्णुचन्द्राद्यैर्भविष्यति युगे युगे।।८०।।[3]
दिवसकरेणास्तमयः समागमः शीतरश्मिसहितानाम्।
कुसुतादीनां युद्धं निगद्यतेऽन्योन्ययुक्तानाम्।।[4]
अथ प्रवक्ष्ये, मिहिरोपदेशात् तत्सूर्यसिद्धान्तसमं समासात्।।३।।[5]
अदृश्यरुपाः कालस्य मूर्तयो भगणाश्रिताः।
शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः।।१।।
तद्वातरश्मिभिर्बद्धास्तैः सव्येतरपाणिभिः।
प्राक्पश्चादपकृष्यन्ते यथासन्नं स्वदिङ्मुखम्।।२।।[6]
ब्रह्मा प्राह च नारादाय हिमयुर्गच्छौनकायामलम्।
माण्डव्याय वस्ष्ठिसंज्ञकमुनिः सूर्यो मयायाह यत्।।६५।।[7]
अथ माहेश्वरायुष्ये.... ब्रह्मणोऽधुना।
सप्तमस्य मनोर्याता द्वापरान्ते गजाश्विनः।।२८।।
खचतुष्केभनागार्थशररन्ध्रनिशाकाराः १९५५८८००००।
सृष्टेरतीताः सूर्याब्दा वर्तमानात्कलेरथ।।[8]

---

१. हस्तलिपिः , श्लोक-१७
२. बेटली युरोपियन , श्लोक-३
३. वसिष्ठसिद्धान्तः , श्लोक-८०
४. सूर्यसिद्धान्तः
५. सू.सि. अधिकार १
६. सिद्धान्तशिरोमणिः , श्लोक-१,२
७. भगणमानाध्याय।
८. मध्यमाधिकार

मन्दोच्चपातभगणानुपपत्यानयेद्युगे।

यत्र मन्दफलं शून्यं मन्दोच्चस्थानमुच्यते।। ३१।।

याम्यकेन्द्रफलं शून्यं पातस्तत्र विनिर्दिशेत्।।[1]

एतच्चम मत्तः शीतांशोः पुलस्त्याच्च विवस्वतः।

रोमकाच्च वसिष्ठाच्च गर्गादपि बृहस्पते ः।।९।।

अष्टधा निर्गतं शास्त्रं......।[2]

तस्मात्पञ्चसु सिद्धान्तेषूक्तमार्गोवधार्यताम्।।९०।।[3]

युगरविभगणाः रव्युघृशशिचयगियिङुशुछ्लृकुङिशिबुण्लुरूषृप्राक् - दशगीतिक

"काहो मनवो ढ १४ मनुयुगश्ख ७२ गतास्तेच ६

मनुयुगछ्ना २७ च। कल्पादेर्युगपादा ग ३ च गुरु -

दिवसाच्च भारतात्पूर्वम्।।[4] "

(१) स्मृतिशास्त्रम् (२) रामायणम् (३) महाभारतम् (युगादि व्यवस्था-योगानां-नक्षत्राणां विचारः-ग्रहणः-ग्रहवक्रगति-ग्रहयुद्धः-विविध योगनां फलं-फलितज्यौतिषश्च)

न समा युगमनुकल्पाः कल्पादिगतं कृतादि यातञ्च।

स्मृत्युक्तैरार्यभटो नातो जानाति मध्यगतिम्।।१०।।[5]

षष्ट्यब्दानां षष्टिर्यदा व्यतीतास्त्रयश्च युगपादाः।

त्र्यधिना विशतिरब्दास्तदेह मम जन्मनोऽतीताः।।[6]

आर्यभटस्त्विह निगदति कुसुमपुरेऽभ्यचितं ज्ञानम्।

चतुरधिकं शतमष्टगुणं द्वाषष्टिस्तथा सहस्त्राणाम्।

अयुद्वयविष्कम्भस्यासन्नो वृत्तपरिणाहः।।१०।।[7]

अनुलोमगतिर्नोस्थः पश्यत्यचलं विलोमगं यद्वत्।

अचलानि भानि तद्वत् समपश्चिमगानि लङ्कायाम्।।[8]

---

१. मध्यमाधिकारः।, श्लोक-३१

२. बृह्म सि. प्रथम . अ. , श्लोक-९

३. पौलिश सिद्धान्त , श्लोक-९०

४. दशगीतिका आर्यभट्टलिखित

५. ब्रह्मगुप्त- सिद्धान्त , अ.११।१०

६. कालक्रियापादा।

७. गणितपाद। –श्लोक-१०

८. सूर्यसिद्धान्त

प्राणेनैति कलां भूर्यदि तर्हि कुतो व्रजेत् कमध्वानम्।
आवर्तनमुर्व्यश्चिेन्न पतन्ति समुच्छ्र्याः कस्मात्।।[1]
उदयास्तमयनिमित्तं नित्यं प्रवहेण वायुना क्षिप्तः।
लङ्कासमपश्चिमगो भपञ्चरः सग्रहो भ्रमति।।[2]

**शाकल्योक्तब्रह्मसिद्धान्तः-**

शाकल्योक्ते ब्रह्मसिद्धान्तग्रन्थे षडध्यायाः ७६४ श्लोकाश्च सन्ति। ब्रह्मा-नारदाय-यज्ञानं उपदिष्टवान् तदेवायं सिद्धान्तः। अस्यापि भगणभभ्रमादिमानानि सूर्यसिद्धान्तः संवाधैव। अत्रैव गणितातिरिक्तमपि तिथिविशेषनिर्णयादिविषया अपि सन्ति।

नारदसंहिता-सूर्यसंहिता-अरूणसंहिता-भृगुसंहिता-बादरायणसंहिता-बार्हस्पत्यसंहिता गर्गसंहिता-गुरूसंहिता- महासंहिता-नारदीयसंहिता-वाराहीसंहिता-रावण संहिता-बुद्धवशिष्ठ संहिता-लोमशसंहितावृद्धगर्गसंहिता-गौतमसंहिता-विश्वकसेनसंहिता-काश्यपसंहिता रत्नकोशः-रत्नमाला-राजमा-र्तण्डअदभुतसागरः-व्यवहारप्रदीपः ज्योतिर्विदा-भरणम्-विवाहवृन्दावनम्-विवाहपटलः-मुहूर्ततत्वम्-ज्योति-र्निबन्धः-ज्यौतिषदर्पणः-मुहूर्तमार्तण्डः-मुहूर्तचिन्तामणिः मुहूर्तचूडामणिः मुहूर्तकल्पद्रुमः-मुहूर्तमाला-मुहूर्तदीपकः-कल्पलता-मुहूर्त-गणपति-मुहूर्तसिन्धु-नरपतिजयचर्यास्वरोदयः समरसारः-बृहद्वास्तुमाला-गृह-रत्नविभूषणम् च इत्यादिनां ग्रन्थाः संहितायाः स्कन्धः प्राप्ता भवन्ति।

महाभारते कतिपयेषां संहिताशास्त्राणां विशेषतः व्याससंहिताया वस्थितिसंसूचक वचनान्युप-लभ्यन्ते-

**'तत इष्टेऽहनि प्राप्ते मुहूर्ते साधुसम्मते।**
**जग्राह विधिवत्पाणिं माद्रयाः पाण्डुर्नराधिपः।। (१/११३/१६)**
**'ऐन्द्रे चन्द्रसमायुक्ते मुहूर्तेऽभिजिदष्टमे।**
**दिवा मध्यगते सूर्ये तिथौ पूर्णेऽतिपूजिते।। (१/१२३/६)**

**मुहूर्तचिन्तामणिः-**

मुहूर्तचिन्तामणिः अनन्तदैवज्ञात्मजेन रामाख्येन दैवज्ञेन प्रणीतः १५२२ मितशकाब्दे। अतीवलोकप्रिये ग्रन्थेऽस्मिन् सन्ति बह्व्यष्टीकाः यासु ग्रन्थकृत एव प्रमिताक्षरा, गोविन्दस्य पीयूषधारा च प्रसिद्धा। अस्य ग्रन्थे शुभाशुभ-नक्षत्र-सङ्क्रान्ति-गोचर-संस्कार-विवाह-वधूप्रवेश-द्विरागमन-अग्न्याधान-राजाभिषेक यात्रा-वास्तु-गृहप्रवेश प्रभृतिप्रकरणानि सन्ति।

---

१. ब्रह्मसिद्धान्त , अध्याय ११।
२. गोलपाद।

**बृहद्वास्तुमाला-**

रामनिहोरद्विवेदेन सम्पादिता बृहद्वास्तु मालाऽपि प्रकरणेऽस्मिन् स्मर्तव्यो ग्रन्थः। अत्र हि वास्तु पुरुषस्वरूपं वर्गज्ञानं दिग्दिशाज्ञानं भूमिलक्षणं भूशोधनप्रकारः निषिद्धग्राह्यकाष्टानि मानादि दिक्साधनानि मुहूर्तविचार इति प्रभृतयो विषयाः सप्रपश्चं निरूपिताः। अन्ते च वास्तुशान्तिः।

**मुहूर्तमार्तण्डः-**

ग्रन्थोऽमयनन्ताऽऽख्यसुतेन नारायणेन १४१३ मितशकाब्दमभितो प्रणीतः। ग्रन्थोऽमयतीव लोकप्रियः सर्वत्र सुलभश्च। अत्रैव त्याज्यप्रकरणं संस्कारप्रकरणं मिश्रप्रकरणं गोचरप्रकरणं सङ्क्रान्ति प्रकरणं अग्न्याधान प्रकरणश्चेति सन्ति दशप्रकरणानि ग्रन्थान्ते कथयन्ति –

**श्री मत्कौशिकपावनो हरिपदद्वन्द्वार्पितात्मा हरि-**
**स्तज्जोऽनन्त इलासुरार्चितगुणो नारायणस्तत्सुतः।**
**ख्यातं देवगिरेः शिवालय मुदक्तस्मादुदक् टापर-**
**ग्रामस्तद्वसति र्मुहूर्तभवनं मार्तण्डमत्राकरोत्।।**

**मुहूर्ततत्त्वम्-**

मुहूर्ततत्त्वं केशवस्य कमलाकरसुतस्य १४०० मितशकाब्दमभितः स्थितिमतः कृतिः। अस्य टीका गणेश दैवज्ञेन प्रणीतास्ति। विषयान्तरातिरिक्तं ग्रहचार युद्धादिविषया अपि संक्षेपेण निरूपिताः। अस्य नौकाप्रकरणं वैशिष्टयं मौलिकश्च, यत्र नौकानिर्माणजलावतारण-जलयात्राविषयकमूहूर्ता निरूपिताः। अस्मिन् ग्रन्थे वसन्तराजभूपालनृसिंहादयः स्मृताः आचार्यत्वेन। अत्रैव पूर्वखण्डे गर्भाधानादि संस्कार मुहूर्ता उत्तरखण्डे ग्रहचारादिविषयाः। अस्यैव जातकपद्धतिस्ताजिक पद्धतिश्च परां प्रसिद्धिं प्राप्ताः।

**मुहूर्तसिन्धुः-**

ग्रन्थोऽयं गङ्गाधरशास्त्रिणा १८०५ मितशकाब्दे प्रणीतः। ग्रन्थेस्मिन् प्राचीनग्रन्थाधारेण विषया निरुपिताः सन्ति। अस्य ग्रन्थे मुहूर्तसम्बन्धे विषयाः सन्ति।

**मुहूर्तदीपकः-**

ग्रन्थोऽयं महादेवाऽऽख्येन विदुषा १५८३ मितशकाब्दे प्रणीतः। अस्य प्रणीता टीकाऽस्तीति श्रूयते।

**मुहूर्तमाला-**

ग्रन्थोऽयं १५८२ मितशकाब्दे रधुनाथदैवज्ञेन प्रणीतः। रधुनाथो हि शाण्डिल्यगोत्रियो महाराष्ट्रब्राह्मणः। ग्रन्थोऽयमपि ग्रन्थान्तरवन्मुहूर्तविषयकः।

**राजमार्तण्डः-**

अद्भुतसागरः-मिथिलायाः-राज्ञः लक्ष्मणसेनपुत्र महाराजाधिराजबल्लालसेनद्वारा अस्य ग्रन्थस्य निर्माणम् जातम्। ग्रन्थोऽयं १०८९ मितशकाब्दे पूरितः। अत्रैव वाराह्यमिवा विषयाः। बहवो नवीना विषया अपि सन्ति। ये खलु अन्तरिक्षभूमीराश्रित्य बहवोऽदभुतरूपा उत्पातास्तेऽप्यत्र विवेचिता येषां खलु वाराह्यां चर्चाऽपि नास्ति। अस्य ग्रन्थे दिव्याश्रया-अन्तरिक्षाया भौमाश्रयाश्च विविधोत्पाताः सोपत्तिकां वर्णिताः कथिश्च तेषां शान्त्युपायोऽपि। अत्र दिव्याश्रये सूर्यचन्द्रराहुभौमबुधगुरूराहुकेतु ध्रुवादीनामद्भुतावर्ताः। ग्रह युद्धादभुतावर्ताः आकृत्या दियोगादभुतावर्ताः ख्यादिवर्षादभुतावर्ताः ग्रहयुद्दाद्भुतावर्ताः आकृत्यादि योगाद्भुतावर्ता संवत्सराद् भुतावर्ताः ऋक्षाधद्बुतावर्ताश्च सप्रपञ्चं निरुपिताः। अन्तरिक्षाश्रयाद्-भुतप्रसङ्गः प्रतिसूर्य – परिवेषन्द्रधनू-रश्िंमदण्ड - गन्धर्वनगर-निर्यात-सन्ध्या-सन्ध्याकालिकरविकिरण-दिग्दाह-छाया- तमोधूमनीहारोल्का-विधुद्- वात-मेध-मेधगर्भ-प्रवर्षणातिवृष्टि-कबन्धाद्भुतावर्ताः साङ्गोपाङ्गं प्रपश्चिताः। भौमाश्रये तु भूकम्प-जलाशयाग्नि-दीप-देवप्रतिमा- शक्रध्वज-वृक्ष-गृह-वातजोपस्करवस्त्रोपानहासनशस्त्रपुरादीव्यस्त्रीपुरुषदर्शन-मानुषपिटकस्वप्नकायरिष्टदन्तजन्मप्रसव- सर्वशाकुननाना-मृगविहग-गजाश्व-वृषमहिषबिडाल-शकुनश्रृगाल- गृहगोधिका-पिपीलिकापतङ्गमशक-मक्षिकलूताभ्रम-रमेकखज्जरीटदर्शन पोतकी-कृष्णपेचिका-वायसादभुतावर्ताः मिश्रकाद्भुता भुतावर्ताः अद्भुतशान्त्यद् भुतावर्ताः सधोवर्ष-निमित्ताद्भुतावर्ताः अविरूद्धाद्भुतवर्षाः पाकसमयाद्भुतावर्ताश्च निरुपिताः।

राजमार्तण्डो राजभङ्गाङ्कर्तुरेव ग्रन्थान्रत्वेन गृह्यते ९६४ मितशकाब्दमभितः प्रणीत इत्यपि। विद्धज्जन वद्गभाख्य एतद्विषयक एव ग्रन्थ अन्येऽपि भोजकृतत्वेन स्वीक्रियते तद्विद्धिः। अस्यग्रन्थे १८ प्रकरणानि तथा १८५ श्लोकाः सन्ति प्रकरणस्य नामानि एवमेवक्रमेणास्िंत। यथा-लाभालाभः-शत्रुगमागमः-गमागमः- प्रेषितागमः-यात्रा-जयपराजयः-सन्धि-आश्रयः-बन्धाबन्ध-रोगः- कन्यालाभः-गर्भधारणम्-जन्मः-वृष्टि-क्षिप्तधन-मिश्र तथा चिन्ताश्चास्ति। भोजकृतसंहितास्कन्धे एकः ग्रन्थः राजमार्तण्डः सक्षणं भूत्वा अस्यग्रन्थकारस्य द्वितीयग्रन्थः राजमार्तण्डः निर्माणं अशक्यमेवास्ति इति शंकास्पदो ज्ञायते। श्री

शंकरबालकृष्णदीक्षितमते। यद्यपि द्वितीयग्रन्थः प्राप्यते यत् तदा स शकाब्दे ११८५ पूर्वास्ति इति मन्ये। माधवकृत 'रत्नमाला' ग्रन्थे अस्य टीका वर्तते। एतद् कारणात् न शक्यमेवास्ति।

**ज्योतिषदर्पणः-**

गद्यपद्योभयात्मकोऽयं ग्रन्थः पश्चपल्लुसंज्ञकेन ज्योतिर्विदा १९७१ मित शकाब्दे प्रणीतः। पश्चपल्लुर्हि कण्वशाखाध्यायी वत्सगोत्रियो ब्राह्मण। स पैलुभटीयाऽऽख्यं स्मरति।

**विवाहवृन्दावनम् –**

विवाहवृन्दावनं हि वराहस्य विवाहपटल इव विवाहसम्बद्धग्रन्थः। असौ केशवप्रणीतत्वेन प्रसिद्धः। केशवोऽसौ ग्रहलाधव प्रणेतुर्गणेशस्य पितृतोऽभिन्न इति सुधाकरमतं भिन्नं कश्चित्प्राचीन इति शंकरबालकृष्णमतम्। अस्य टीका गणेशदैवज्ञस्य ग्रन्थप्रणयन काले अयनांशा १२आसन्निति कथनेनास्य प्रणयनकालः ११६४ मितशकाब्दमभित इति गणेशपितुः केशवस्य तु १४१८ मितशकाब्दमभितः स्थितिरिति शंकरबालकृष्णमतपृष्ठभूमिः। अतः गणेश दैवज्ञेन व्याख्याग्रन्थः प्रणीतोऽस्ति।

**गृहरत्नविभूषणम्-**

ग्रन्थोऽयं १८७८ मितशकाब्दे मातृका प्रसादपाण्डेय सङ्गृहीतः। अत्रापि सर्वे वास्तुविषयाः सायुक्तिकं निरूपिताः। अत्रोक्तं-

**गृहस्थस्य गेहं विना सर्वकार्यं न सिध्यन्त्यतो गेहिनाश्चैव गेहम्।**
**अवश्यं तु रम्यं पवित्रेऽतिभूमौ विनिर्माय कार्या क्रिया सर्वदैव।।**

इति संक्षेपतो निरूपितो ज्यौतिषशास्त्रस्य सुविपुलः संहितास्कन्धः विस्तृतज्ञानाय तु तत्तद्ग्रन्था एव अध्येतव्याः।

**होरा-**

ज्यौतिषशास्त्रस्य तृतीयस्कन्धः होरास्ति। होरा अर्थात् जातकस्य जन्मपत्रिका विषयक विवरणं यस्य विषये फलितास्ति यः ग्रन्थस्य नाम्नः होरा वक्तुं कामये। होराशब्दस्य व्युत्पति 'अहोरात्र' शब्देन प्राप्ता भवति। महर्षिपराशरानुसारं अहोरात्र शब्दस्य प्रारम्भिक स्वर 'अ' तथा अन्तस्थ 'त्र' शब्दस्य लोपो भूत्वा होरा शब्दस्य निर्माणं भवति। आंग्लभाषायां अस्य शब्दस्य पर्याय ऐस्ट्रोलोजी अस्ति। अस्य विषये मानवानां जीवने ग्रह नक्षत्राणां शुभाशुभफलस्य प्राप्तिर्हेतवः अध्ययनं भवति। अस्य विधायाः ज्ञातारः आंग्लभाषायां एस्ट्रोलोजर तथा हिन्दी-संस्कृते ज्यौतिषिक-दैवज्ञश्च नाम्नः वक्तुं शक्यते। मनुष्याणां

दैनिकव्यावहारिकजीवनस्य सम्पर्कनाधारेण ज्यौतिषशास्त्रस्य तृतीयस्कन्धः 'होरा' जनाः मनसि प्रसिद्धास्ति। किन्तु दुर्भाग्यमास्ते धनस्य प्राप्तिर्हेतवः अनध्यायी-अनधिकृत जनाः हस्तेन दुरुपयोग कारणतः ज्यौतिष विद्यायाः होराङ्गविवादास्पदः प्रसिद्धास्ति।

**आकाशे यानि दृश्यन्ते ज्योतिर्बिम्बान्यनेकशः।**

**तेषु नक्षत्रसंज्ञानि ग्रहसंज्ञानि कानिचित्।।**

**तानि नक्षत्रनामानि स्थिरस्थानानि यानि वै।**

**गच्छन्तो भानि गृह्णान्ति सततं ये तु खेचराः।।** [१]

**तोड़रानन्दः**

सुविस्तृतोऽयं ग्रन्थः १५०१ शताब्दे नीलकण्ठेन सङ्कलितः। अत्र चण्डेश्वर पवनेश्वर दुर्गादित्य प्रभृत्याचार्याः स्मृताः दैवज्ञमनोहरव्यवहारोच्चयकल्पलता-प्रभृतिग्रन्थाश्च। सुधाकरस्त्विमं रामदैवज्ञसङ्कलितं मन्यते।

**व्यवहारप्रदीपे यथा –**

**तुष्यन्तु सुजना बुद्ध्वा विशेंषान्मदुदीरितान्।**

**अबोधेन हसन्तो मां स्वतस्तुष्यन्तु दुर्जनाः।। (१७)**

व्यवहारप्रदीपे विविधाः पूर्ववर्त्याचार्यातदग्रन्थाञ्च स्मृता प्राप्यन्ते। यथा – भीमपराक्रमः रत्नमाला रुपनारायणः राजमार्तन्डः सारसागरः रत्नावली – ज्योतिस्तन्त्रम-व्यवहारचण्डेश्वरः मुक्ताबली च इत्यादि ग्रन्थाः उपलभ्यन्ते। असकृत्स्मृताः-शौनक संहिता – बार्हस्पत्यं-व्याससंहिता – अत्रिसंहिता – वशिष्ठ संहिता-वशिष्ठतन्त्रम - चन्द्रिका दीपिका लल्ल संहिता -खण्ड खाधकम सारावली देवल संहिता वामनपुराणं स्कन्दपुराणं – पाठकगृहासूत्रं भारद्वाजसंहिता कश्यपसंहिता मणित्थः जैमिनीसूत्रम विष्णुधर्मोतर वायुपुराणञ्च। इत्थं ग्रन्थोडयं बाहुल्येन प्रचारयोग्यः।

**समरसारः-**

ग्रन्थोऽयं नैमिषारण्यनिवासिनः सूर्यदासस्य सुतस्य रामस्य कृतिः स्वर-शास्त्र विषयकः। अस्योपरि भरतस्य टीका लभ्यते। असौ हि १६७१ मित शकाब्दमभितः प्रणीतः।

**ग्रन्थे वत्समुनीश्वरस्य शिवदासाख्या दुरुरव्यानितः**

**सम्राऽग्रिचिदाप यस्य जनकः श्री सूर्यदासोऽजनि।**

---

१. खेचरप्रभृति (३/२-४)

**यन्मातुर्यशसा दिशोदश विशालाक्ष्या बालक्षाव्यधात्**

**स प्राज्यस्वरशास्त्रसार विचितं रामो वसन्नैमिषे।।**

**बृहत्पाराशरहोराशास्त्रम्-**

बृहत्पाराशरहोराशास्त्रम् पराशरमुनिप्रोक्तत्वेन प्रसिद्धो होराग्रन्थः। असौ पराशरमैत्रेयसंवादरूपः पश्चाद्वर्तिना केनापि दैवज्ञेन सङ्गृह्य विलिखितः। अस्यापि मोहमयीतः काशीतश्च प्रकाशितयोः संस्करणयोर्दृश्यते महान्पाठभेदः। तेन कतरच्छुद्धमिति वक्तुमपि न सुकरम्। वयमत्रास्य काशी- संस्करणमेवानुसरामोऽस्य।

अस्योपसंहाराध्याये प्रोक्तं यच्छास्त्रं यद् ब्रह्मणा नारदाय दत्तं तदेव नारदेन शौनकादिभ्य उक्तम्। ततश्च तज्छास्त्रं पराशरेण प्राप्तं मैत्रेयाय प्रोक्तमिति। ग्रन्थेस्मिन् अष्टनवतिमिता अध्यायाः सन्ति। अत्र यद्विवेचितं तथथोक्तमुपसंहाराध्याये-

**'सृष्टिक्रमोऽवताराश्च गुणाः खेटस्य भस्य च।**

**विशेषलग्नं वर्गाश्च तद्विवेश्च राशिदृक्।।**

**अरिष्टं तद्विभङ्कश्च विवेको भावजस्तथा।**

**भावानाश्च फलाध्यायो भावेशोत्थफलं तथा।।**

**अप्रकाशफलं स्पष्टखेट दृष्टिप्रसाधनम्।**

**ततः स्पष्टबलाध्याय इष्टकष्ट प्रसाधनम्।।**

**पदश्चोपपदं तद्वदर्गला त्वथ कारकाः।**

**जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा।**

**अथवा दैवविमर्शेन पर्यायः खल्वयं शब्दः।। इति (२/४) कल्याणवर्मा**

**जातकस्कन्धस्यः-**

वाजसनेयीतसंहितायां नक्षत्रदर्शस्य (३०/१०) गणकस्य (३०/२०) चोल्लेखो दृश्यते। एवमेव तैत्तिरीयब्राह्मणेऽपि (३/४/४; ३/४/५) तत्र पज्ञानाय नक्षत्रदर्शमालभते गीताया गणकमित्याशयः सायणेन व्याख्यातः एवमेव छान्दोग्योपनिषदपि (७/१/२, ७/७/१) नक्षत्र विधया जीवनं नितान्तमेव गर्हितं मतम्। मनुस्मृतौ नक्षत्रविद्याजीवी अपाङ्क्तेयो मतः। यथा-

**एतान् विगर्हिताचारानपाङ्क्ते यान् द्विजाधमान्।**

**द्विजाति प्रवरो विद्वानुभयत्र विवर्जयेत्।। (३/१६७)**

**न चोत्पात निमित्ताभ्यां न नक्षत्राङ्कविधया।**

**नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ।। (६/५०)**

**एतेन नैतदवधेयं यन्नक्षत्रविधैव तदा निन्दिताऽऽसीदिति।**

**वस्तुतस्तु तदाऽपि नक्षत्रविद्या विशिष्टज्ञानविषयत्वेन मता।**

**केवलं फलादेशेन जीविका तु गर्हिता तदा। मनुस्मृती**

कतिपय जातकग्रन्थाः-बृहत्पाराशर होराशास्त्रम्-नारदीयहोराशास्त्रम्भृगुसंहिता-जैवहोराशास्त्रम् सत्यहोराशास्त्रम्-विष्णुगुप्तहोराशास्त्रम्-गर्गसंहितामयहोराशास्त्रम्यवनहोरा-शास्त्रम्-माणित्थहोराशास्त्रम्-देवस्वामीहोराशास्त्रम्-सिद्धसेनहोराशास्त्रम्-यवनेश्वरहोरा-शास्त्रम्बादरायणहोरा-शास्त्रम्-जैमिनिसूत्रम्-ध्रुवाडीग्रन्थः-बृहज्जातकम्-लघुजातकम्-स्वल्पजातकम्-षट्पश्चाशिका-जातकसारः-सारावली-प्रश्नज्ञानम्-श्रीपतिजातकपद्धति-वृद्धजातकम्-भावनिर्णयम्-सर्वार्थचिन्तामणिः-जातकपारिजातः-केशवीयजातक पद्धतिः जात-काभरणम्-अनन्तजातक-पद्धतिः-जातकोत्तमः-जातकोत्तमः(द्वितीयग्रन्थः)-जातकादेशः-होरा-स्कन्धनिरूपणम्-जातकसारः-जातकालङ्कारः-पद्मजातकम्-पद्धतिभूषणम्-होरारत्नम्-होराकौस्तुभ-होरासारसुधानिधिः-प्रश्नमाणिक्यमाला-पद्धतिचन्द्रिका-साधनसुबोधः-भावकुतूहलम्-अनन्तफलदर्पणः-जातकादेशमार्गः-फलितविचारः-ताजिकशास्त्रम्-ताजिकतन्त्रसारः-दैवज्ञालङ्कृति-केशवीयताजिकपद्धतिः-ताजकसारः-ताजिकभूषणपद्धतिः-सिंहलताजिकम्-हायनरत्नम्-ताजिकनीलकण्ठी-ताजिककौस्तुभम्-ताजिकभूषानिधिः।

प्रश्नतन्त्रम्-प्रश्ननारदीय-प्रश्नज्ञानम्-प्रश्नसारः-प्रश्नमाणिक्यमाला-केरलमतम्-सामुद्रिकशास्त्रम्-रमलशास्त्रम्-स्वप्नशास्त्रम्

उडुदायप्रदीपो हि पुनरूक्तं शास्त्रमिति तस्य

**'वयं पाराशरी होरामनुसृत्य यथामति।**
**उडुदायप्रदीपाख्यं कुर्मो देवविदां मुदे।।**

नारदीयहोराशास्त्रम्-नारदेन हि संहिताशास्त्रबद्धंहोराशास्त्रमपि प्रोक्तमासीदिति-

गर्गसंहिता-पुराणादिषु गर्गाचार्यः सांवत्सरिकत्वेनाऽपि ज्ञातः। भट्टोत्पलो बृहत्संहिताटीकायां गर्गवचन मुद्धरति-यथा-

भृगुसंहिता-भृगुर्हिभगवानृषिज्यौतिषस्य स्कन्धत्रयस्यैव प्रवक्ताऽऽसीत्। सम्प्रति तस्य संहितायाः फलितभाग एव लभ्यते। कथ्यते हि तत्र सन्ति ७४६४१६०० जन्मकुण्डल्यः साधिताः। प्रतिकुण्डलि षष्टयधिकश्लोकैः फलोदशश्च। तथा हि सति तु ग्रन्थं विस्तारस्यानन्त्यमेव स्यात्।

**माणित्थहोराशास्त्रम्-**

मणित्थाचार्यः कः कदाऽऽसीदित्यपि ज्ञानाविषय एवास्माकम्। वराहाचार्यस्तं-मययवनमणित्थ शक्तिपूर्वैः इति श्लोके (७/१) स्मरति। भट्टोत्पलस्तस्य शास्त्रमनुवदति। तथा च मणित्थः-

**नवरूपाः शरयमलास्तिथयोऽर्काः पञ्चरूपकाः क्रमशः।**

**रूपयमाकृतिसङ्ख्याः सूर्यादीनां स्वतुङ्गभेष्वष्दाः।।**

भट्टोत्पलसमये मणित्थहोराशास्त्रं समग्रमेवासीद्वा खण्डितं वा भट्टोत्पलेनापि क्वचिदनुदितं प्रत्युदितमात्रमित्यपि नास्माकं ज्ञातम्। वराहाचार्यस्तु मणित्थमतमनूद्य दूषयतीति तदा तस्य प्रचलन-मीसीदेव। इति आचार्यलोकमणिदहालस्य मते।

**जैवहोराशास्त्रम्-**

जीवशर्मणोऽपि होराशास्त्रमासीदिति वराहमिहिरस्य 'स्वमतेन किलाऽऽह जीवशर्मा (७/१) इति। भट्टोत्पलोऽपि जीवशर्मवाक्यमुद्धरति। च जीवशर्मा-

**सप्तदशैको द्वियमौ वसवो देवाग्नयो ग्रहेन्द्राणाम्।**

**वर्षाऽप्युच्चस्थानां नीचस्थानमतोर्द्ध स्यात्।।**

**मध्येऽनुपाततः स्यादानयनं शेषमत्र यत्किञ्चित्।**

**पिण्डायुष इव कार्यं तत्सर्व गणिततत्त्वज्ञैः।।इति।।**

**राशितुल्यांशसङ्ख्यानि ग्रहोऽद्वानि प्रयच्छति।**

**लग्नश्च सबलोऽन्यानि मुक्तराशि तु।।**

**तेन गर्गहोराशास्त्रस्यास्तित्वं सिद्धमेव।**[1]

**मयहोराशास्त्रम्-**

वराहमिहिरः स्वरूपेण स्मरति- 'मययवनमणित्थ-शक्तिपूर्वैः (७/१) इति कथनेन। भट्टोत्पलो मयकृतहोराशास्त्रं स्मरति उद्धरति च तत्रत्यम्-चित्रं प्रोज्झ्य पराशरः कथयते दौर्भाग्यदं योषिताम्।

**एकोनविंशतिः सूर्यश्चन्द्रमाः पञ्चविंशतिः।**

**तिथिसङ्ख्या कुजः सौम्यो द्वादशोच्चगतो गुरुः।।**

**कुजवदैत्य पूज्यस्य वर्षोणामेकविंशतिः।**

**एकोन सूर्यपुत्रस्य परमोच्चगतस्य च।।**

---

१. जैवहोराशास्त्रम्/ गर्गहोराशास्त्र

**आयुर्दायमिदं प्रोक्तमथ नीचगतस्य तु।**

**अन्तरे त्वनुपाताच्च कारयेदायसङ्ग्रहम्।।**[1]

मयाचार्यो हि सूर्यसिद्धान्तेऽपि स्मर्यते। कथ्यते सूर्यसिद्धान्तः सूर्य निर्दिष्टेन पुरूषेण तपस्यते मयाय प्रोक्त इति। स हि सत्ययुगेऽपि स्थित इति स्मर्यते पुराणादौ। त्रेतायुगे तु तस्य बाहुल्येन स्मरणम्। भट्टोत्पलवाक्येन मयस्य यवनाचार्ययति पूर्ववर्तित्वमप्यनुमीयते।

**जैमिनिसूत्रम्-**

जैमिनिसूत्रं हि सम्प्रत्यति समुपलभ्यते। गद्यात्मकसूत्ररूपे चत्वारोऽध्यायाः ग्रन्थेऽस्मिन् सन्ति। किन्त्वस्य शैलीसूत्रमयी प्राचीना। ग्रन्थोऽयं शकोदयकाल मभितः प्रणीतः सम्भवति। अस्य बह्व्यष्टीकाः सन्ति। अस्य हि मलावारादिदाक्षिणात्यप्रदेशे प्रचारः।

**सारावल्याम्-**

**अत एव विस्तरेभ्यो यवननरेन्द्राःदिरचितशास्त्रेभ्यः।**

**सकलमसारं त्यक्त्वा तेभ्यः सारं समुद्धियते।।** (१/४)[2]

कल्याणवर्मस्मृतो यवनेश्वरः वराह स्मतपूर्वयवनाचार्यद्भिन्नः शकोदयानन्तरजातः इति।

सारावली कल्याणवर्मणः कृतिः। अस्मिन् ग्रन्गे चतुःपञ्चाशदध्यायेषु गुम्फितः। अत्रैव राशि-कालपुरूषः-ग्रहः-वरिशः-आधानः-ग्रहजलज्ञानम्-अरिष्टनाशः-ग्रहयुतिफलम्-भाग्यभावविचारम्-

**लधुजातकम्-**

लधुजातकं वराहमिहिरस्यैव कृतिर्बृहज्जातकस्य सारसङ्क्षेपः। यथोक्तं तत्र-

**'होराशास्त्र वृत्तैर्मया निबद्धं निरीक्ष्य शास्त्राणि।**

**यत्तस्याप्यार्याभिः सारमहं सम्प्रवक्ष्यामिः।।** (१/२)[3]

ग्रन्थोऽयं षट्पञ्चाशच्छ्लोकैनिबद्धः (७+१४+५+५+५+ ४+१३=५३+३=५६)। अस्य वर्णनावैशिष्ट्यं प्रभावोत्पादकं सारविशिष्टश्च। षट्पञ्चाशिका-षट्पञ्चाशिका वराहमिहिरात्मजस्य पृथुयशसः कृतिः। राशिप्रभेदः, ग्रहभेदः, ग्रहमैत्रीविवेकः-ग्रहस्वरूपं-भर्गाधानादि सूतिका प्रकरणम्-अरिष्टविचारः-अरिष्टभङ्गः-आयुर्दायः-दशान्तर्दशा-अष्टकवर्ग-प्रकीर्णकविषयाः राशिशीलनिरूपणम्-आश्रययोगःस्त्रीजातकं निर्याणं नष्टजातकश्चेति निरूपितविषयाः। सन्त्यत्र सप्ताध्यायाः-होरा-गमागम-जयपराजय-शुभाशुभ-प्रवासचिन्ता-नष्टप्राप्ति-मिश्रिकाऽऽख्याः।

---

१. दौर्भाग्यदं योषिताम्

२. बृहज्जातकटीकायम्

३. लधुजातकं

**स्वांशे विलग्ने यदि वा त्रिकोणे स्वांशे स्थितः पश्यति धातुचिन्ताम्।**

**परांशकस्थश्च करोति जीवं मूलं परांशोपनतः परांशम्।।इति (१/६)**[1]

भट्टोत्पलेन व्याख्याग्रन्थः प्रणीतोऽस्ति। पृथुयशसः समयः ४६० मितशकाब्दमभितः।

**केरलमतम्-**

जातकेषु केरलमतं किञ्चिद्विलक्षणमेव वैशिष्टमावहति जातकान्तरापेक्षया। केरलमतविषयकग्रन्थाः बहुशः सन्ति। केरलमतं हि केरलिप्रोक्तम्।

यथोक्तं केरलप्रश्नसङ्ग्रहे-

**त्रैलोक्यफलबोधाय येन दिव्येन चक्षुषा।**

**त्रिकालविषयाः प्रोक्तास्तस्मै केरलये नमः।।**[2]

केरलमतमाश्रित्य प्रणीतेषु ग्रन्थेषु केरलप्रश्नसङ्ग्रहः सर्वत्र ग्रन्थः। असौ हि पूर्वोत्तरभागात्मकः। तत्र पूर्वामागे ६८ मिता उत्तरार्द्धे ७५ मिताः श्लोकाः सन्ति। केरलमतविषये समधिकं ज्ञानमपेक्षितम्।

**स्वप्नशास्त्रम्**

सुप्तस्य मनसश्चेष्टा स्वप्नः। स्वप्नमादाय फलादेशकं हि स्वप्नशास्त्रम्। स्वप्नशास्त्रं हि बहुधा विकसितं दृश्यते स्वतन्त्ररूपेण च इत्थं हि होराशास्त्रमनेकभेदेन समृद्धं जना भूतभविष्यज्ज्ञानेन कृतार्थाः भवितुमर्हन्ति।

**यवनहोराशास्त्रम्-**

वराहमिहिर-कल्याणवर्म-भट्टोत्पलप्रमृतयो यावनंहोराशास्त्रम –

वराहमिहिरादयो यवनशब्देन साम्प्रतिकग्रीस देशवासिनो गृह्णाति न तु आरबीयानपि।

**जातकालङ्कारः-**

ग्रन्थोऽयं १५०१ मितशकाब्दमभितः चिन्तामणिपौत्रेण अनन्तपुत्रेण नीलकण्ठेन रामदैवज्ञाग्रजेन प्रणीतः। प्रश्नकृते ताजिकनीलकण्ठी प्रामाणिको ग्रन्थः। अस्योपरि नीलकण्ठपुत्रस्य गोविन्दस्य रसालाखा (१५४४ श.) तत्पुत्रस्य माधवस्य (१५५५ श.) विश्वनाथस्य च टीका वर्तते।

**अत्रै संज्ञा-वर्ष-प्रश्नभेदेन त्रीणि नन्त्राणि सन्ति।**

**'शाके नन्दाभ्रबाणेन्दुमिते आश्विनमासके।**

**शुक्लेऽष्टम्यां समातन्त्रं नीलकष्टबुधोऽकरोत्।।इति।**

---

१. भट्टोत्पलेन व्याख्याग्रन्थः

२. केरलमतं

गणेशदैवज्ञप्रणीतोऽयं ग्रन्थो लघुरपि विस्तृतप्रसरः। असौ हि १५३५ मितशकाब्द-मभितः प्रणीतः। अस्य हरभानुप्रणीता टीका लभ्यते। ताजिकनीलकण्ठी- सन्त्यत्र षऽध्यायाः-संज्ञाभावयोगविष कन्याऽऽयुर्दायव्यत्ययस्थ भाव फल संज्ञिताः। प्रणेताऽस्य शिवदासशिष्यो-गोपालपुत्रः।

**सामुद्रिकशास्त्रम्-**

प्राचीनत्वं वराहमिहिरोऽधिवक्ति कथनेनानेन-सामुद्रिकशास्त्रमपि होराशास्त्रस्य प्रसिद्धमङ्गान्तरम्।

उन्मानमानगति संहतिसारवर्ण स्नेहखरप्रकृतिसत्वमनूकमादौ क्षेत्रं भुजाश्च विधिवत्कुशलोऽवक्य सामुद्रविद्धदति यातमनागतश्च।। (बृहत्संहिता ६७/१)

अत्रैव नराणामङ्गादिवशात् फलादेशः क्रियते त्त्सामुद्रिकमिति। "समुद्रे प्रोक्तं लक्षणं सामुद्रमिति" भट्टोत्पलः। आर्षेषु महाभारते सामुद्रसम्बद्धवचनानि लभ्यन्ते दुर्योधनादिवर्णने। ततश्च विषयोऽयं क्रमेण संहिताऽङ्गत्वेन विकसितः पश्चद्धोदराशास्त्राङ्गतां प्राप्तः।

सम्प्रत्युपलब्धस्वतन्त्रग्रन्थेषु मेघाविजयगणिनो हस्तसञ्जीवनं सर्वतः प्रसिद्धम्। हस्तसञ्जीवनं प्रबोधिनीटीकया समलङ्कृत्य गणेशदत्तेन प्रकाशितम्। ग्रन्थोऽयं १६०२ मितशकाद्धमभितः प्रणीतः।

**रमलशास्त्रम्-**

निर्दिष्टकोष्टकेष्वन्यतमस्य स्पर्शे वा वरणे या स्थितिर्घटते तदनुसारेण फलकथनमेव रमलशास्त्रविषयः। रमलशास्त्रं पाशकविद्याऽप्युच्यते। रमस्य लः रमलः इत्यप्यपरे। रमलशास्त्रस्य सिद्धेऽपि प्राचीनत्वे पौरूषेयग्रन्थेषु भट्टोत्पलस्य रमलग्रन्थ एव प्रथमत्वेन गृह्यते।

एतदेवाधिकं सम्भाव्यते यद् भट्टोत्पलस्य प्रश्नज्ञाने एव रमलविषयोऽपि समावेशितस्याधेन हि सुधाकरस्तमप्युपेक्षते। रमलशास्त्रमपि प्रश्नविधाङ्गत्वेन, प्राक्काले समुदितं यवनेषु विकसितमिति यावनपरिचयरूपेण रमलशब्देन धोत्यते। रमते इति रमः पचाद्यच् लाति इति लः ज्ञवत्। रमलशास्त्रमपि शास्त्रान्तरवत् समृद्धं लोकोपकारि च।

## १. दैवज्ञलक्षणम्

एवं स्वशास्त्रस्य स्वरूपप्रदर्शनेनात्कर्षं प्रदर्श्याधुना कीदृग् ज्योतिः शास्त्रेऽधिकारी-त्यतोऽधिकारिस्वरूपं प्रदर्शयितुमाह-

अर्थात इत्यमं समुदायः। अथातोऽस्माच्छास्त्रोपनयनादनन्तरं सांवत्सरसूत्रं व्याख्यास्यामः कथयिष्यामः। अथवाऽथशब्दो मङ्गलार्थः। अतोऽस्माच्छास्त्रोपनयनादनन्दरं सांवत्सरसूत्रं विविधैरर्थैरा शास्त्रपरसिमाप्तेर्व्याख्यास्यामः कथयिष्यामः। संवत्सरं वेत्ति सांवत्सरः। सूत्र्यते अर्थो येन तत्सूत्रं सांवत्सरसूत्रमित्यर्थः।

तच्चाह-

**तत्र सांवत्सरोऽभिजातः प्रियदर्शनो विनीतवेषः सत्यवागनसूयकः समः सुसंहितोपचितगात्र-सन्धिरविकलश्चारुकरचरणनखनयनचिबुकदशनश्रवणललाटभ्रूत्तमाङ्गो वपुष्मान् गम्भीरोदात्तघोषः।**

**प्रायः शरीराकारानुवर्तिनो हि गुणा दोषाश्च भवन्ति।।२।।**

तत्र सांवत्सर इति। तत्र तस्मिन् ज्योतिः शास्त्रे सांवत्सरो दैवज्ञः कीदृशः। संगत्सरो वर्षं तत्र सांवत्सर इति। तत्र तस्मिन् ज्योतिः शास्त्रे सांवत्सरो दैवज्ञः कीदृशः। संवत्सरो वर्ष तत्र शुभाशुभज्ञानार्थं यः कृतो ग्रन्थः स सांवत्सरस्तमधीते वेद वा यः सोऽपि सांवत्सरः। स चाभिजातः कुलीनः सांवत्सरकुलप्रसूत इति केचित्। यदि तत्कुलेऽपि जातो वक्ष्यमाणगुणलक्षणयुक्तो न भवति तत्किं तेन। तस्मात् सांवत्सरकुले निरवद्ये जातेनाऽन्यस्मिन् प्रधानकुले वा सांवत्सरकुलाच्च येन विद्या सागमा अधीता सोऽत्राभिजातो विवक्षितः। प्रियदर्शनो दृश्यमानः सुखजनको विनीतवेष उद्भटो वेषः शरीरालङ्करणं यस्य। आचार्येणान्यत्राप्युक्तम् – सांवत्सरस्तस्य विनीतवेषः इति।

सत्यवाक् अवितथभाषी। अनसूयकः अनिन्दकः। गुणेषु दोषाविष्करणमसूया। असूया कुत्सा। न असूयकोऽनसूयकः। समो रागद्वेषरहितः। शत्रौ मित्रे च तुल्यस्नेह इत्यर्थः। सुसंहतोपचित-गात्रसन्धिः सुसंहता अतिसंलग्ना उपचिता मांसला गात्रेषु बाहुहस्तोरुजानुगुल्फपादेषु सन्धयो यस्य। अविकलोऽव्यङ्गः परिपूर्णावयवः। चारुकरचरणनख-नयनचिबुकदशनश्रवणललाटभ्रूत्तमाङ्गः। करौ हस्तौ। चरणौ पादौ। नखाः कररुहाः। नयने चक्षुषी। चिबुकमधराधोभागः। दशना दन्ताः। श्रवणौ कर्णौ। ललाटं मुखपृष्ठभागः। भ्रुवौ

नयनोपरि रोमलेखे। उत्तमाङ्गं शिरः। एतानि चारूणि दर्शनीयानि यस्य। प्रशस्तलक्षण-युक्तानीत्यर्थः। वपुष्मान् वपुः शरीरं शोधनं विद्यते यस्य। रूपवानित्यर्थः। गम्भीरोदात्तधोषः गम्भीरः सानुनाद उदात्त उद्भटो घोषः शब्दो यस्य। मेघमृदङ्गसमध्वनिरित्यर्थः। हि यस्मादर्थे। प्रायो बाहुल्येन शरीराकारानुवर्तिनः। शरीरस्याकारः शरीराकारस्तमनुवर्तन्ते शरीराकारानुवर्तिनः। के ते गुणा दोषाश्च भवन्ति। शरीरस्य सादृश्यं गुणा दोषाश्चानुवर्तन्ते। निर्दोषं शरीरं गुणा अनुवर्तन्ते। सदोषं शरीरं दोषाश्चानुवर्तन्त इति। तथा चोक्तम्निर्दोषं शरीरं गुणा अनुर्वतन्ते। सदोषं शरीरं दोषाश्चानुवर्तन्त इति। तथा चोक्तम् –

यत्राकृतिस्तत्र गुणा भवन्ति।।इति।

**संवत्सरस्य तदहः परिषष्ठन्मण्डूकाः प्रावृषेण्यं बभूव।**

**ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्मकृण्वन्तः परिवत्सरीणम्।।** [१]

ऋग्वेदे राशिविचारः स्पष्टरूपेण प्राप्तः नैव भवति। किन्तु निम्नः मन्त्र द्वारा राशीनां चक्रं विद्यते।

अथ गुणानाह-

**तत्र गुणाः - शुचिर्दक्षः प्रगल्भो वाग्मी प्रतिभानवान् देशकालवित्**
**सात्त्विको न पर्षद्भीरुः सहाध्यायिभिरनभिभवनीयः कुशलोऽव्यसनी**
**शान्तिकपौष्टिकाभिचारस्त्रानविद्याभिज्ञो विबुधार्चनव्रतोपवासनिरतः**
**स्वतन्त्राश्चर्योत्पादितप्रभावः पृष्टाभिधाय्यन्यत्र दैवात्ययात् ग्रहगणितसंहिता**
**होराग्रन्थार्थवेत्तेति।।३।।**

तत्र गुणा इति। तत्र तस्मिन् सांवत्सरे शरीरे वा गुणाः। के ते ? तद्यथा शुचिः शास्त्रोक्त-शौचानुष्ठाता परस्वदेवधनाद्यलुब्धश्च। दक्षश्चतुरः शीघ्रकारी। प्रगल्भः सभायां वक्तुं शक्तः। वाग्ग्मी प्रशस्ता शास्त्रार्थानुसारिणी। प्रतिभानवान् प्रतिभा एव प्रतिभानम् तद्विद्यते यस्यासै प्रतिभानम्, तद्विद्यते यस्यासौ प्रतिभानवान्। पृष्टः सन् पौर्वापर्येण शास्त्रं स्मृत्वोत्तरं ददातीत्यर्थः। देशकालवित् देशवित्यर्स-देशेषु व्यवहाराज्ञः। मध्यदेशादिष्वार्यदेशेषु यच्चेष्टितं तज्जानाति। कालस्वरूपज्ञः पूर्वाह्नमध्याह्नादिषु कालेषु घर्मवर्षशीतसाधारणकालेषु चेदं क्रियते इदं न क्रियत जानाति। अथवा देशमानूपजाङ्गलमरु-भूमीत्यादिकं हस्त्यश्वखरोष्ट्रनावादिषु मनुष्यगम्यं जानाति। कालं यात्रादाविदं योग्यमिदमयोम्यमिति जानाति। अथवा देशविद्यथा-

---

१. शत. ब्रा. -१ / ऋ.वे - १.९०.८

कश्मीरदिषु हिमप्रधानेषु बहुव्रीहिसम्भवं दृष्ट्वोत्पातं न वक्ति मध्यदेशादौ वक्ति। कालविद्यथा-

चित्रगर्भोद्भवाः स्त्रीषु गोऽजाश्वमृगपक्षिषु।

पत्राङ्कुरलतानां च विकाराः शिशिरे शुभाः।।इति।।

सात्त्विको निर्मलचितः। भयहर्षशोकादिभिरनभिभवनीयः। न पर्षद्भीरुः। परिषदि सभायाभीरु-स्त्यक्तभयः। सहाध्यायिभिरभिभवनीया। सह सार्द्धमध्ययनं पठनं कृतं यैस्ते सक्षध्यायिनस्तैः सहाध्यायिभिः समानतन्त्रैरनभिभवनीयो ज्ञेयः। कुशलः शिक्षित इङ्गितज्ञः। अव्यसनी गीतवाद्यनृत्यस्त्रीद्यु-तधूनिद्रादिषु व्यसनेष्वसक्तः। शान्तिकपौष्टिकाभिचारस्नान-विद्याभिज्ञः। उत्पातप्रतीकारार्थ्रं वेदोक्तमन्त्र-पाठविनियोगानुष्ठाता शान्तिकविद्याभिज्ञः। आयुर्धनादिष्टधिकरणं पौष्टिकविद्या तदभिज्ञः। कृत्यावेतालोत्थापनमारणोच्चाटनविद्वेषण-वशीकरणस्तम्भनचालनादिकमभिचारविद्या तदभिज्ञः। स्नान-विद्यासु नित्यनैमित्तिककाम्य-क्रियाङ्गास्वभिज्ञः। पुष्यस्नानादिषु पूजा आवाहनस्नानमाल्यानुलेपनधूपोपहार-वाद्यगेयनृत्य-स्तोत्रपाठादिका तस्यामभिज्ञः। व्रतानि कृच्छ्रपराकचान्द्रायणप्रभृतीनि। उपवासः अभोजनम्। यथा- एकादश्यां् न भुञ्जीतेत्यादि, एतेषु निरतः सक्तः। स्वतन्त्राश्चार्योत्पादिनप्रभावः। स्वतन्त्रं ग्रहगणितं तत्रार्कचन्द्रग्रहणग्रहसमागमयुद्धानामनागताभिधायकत्वाद्यन्त्राणां कूर्ममयूरचापशङ्कु-घण्टापुरुषादीनां काष्ठाधिविरचितानां स्वयमेव कालव्यञ्जकत्वाद्यदाश्चर्यं कुतूहलं तेनोत्पादितो जनित आत्मनः प्रभाव उत्कर्षो येन। पृष्टाभिधायी परिपृष्टस्यार्थस्याभिधायको वक्ता। नापृष्टस्य किन्त्वन्यत्र देवात्ययात्। दिव्यान्तरिक्षभौमेषुत्पातेषु यद्भाव्यशुभं स दैवात्ययस्तन्निवारणाय शान्त्यादिकमपृष्टेनाप्यभिधातव्यं वक्तव्यम्। ग्रहगणितसंहिताहोराग्रन्थार्थवेत्ता। ग्रहगणिते पञ्चसिद्धान्तिकायां संहितायां फलग्रन्थे होरायां जातकादौ ग्रन्थार्थवेता ग्रन्थज्ञोऽर्थज्ञश्च। सूत्रार्थपाठकस्तदर्थविदित्यर्थः।

अथान्यल्लक्षणमाह-

**तत्र ग्रहगणिते पौलिशरोमकवासिष्ठसौरपैतामहेषु पञ्चस्वेतेषु सिद्धान्तेषु युगवर्षायनर्तुमासपक्षा- होरात्रयाममुहूर्तनाडीप्राणत्रुटित्रुट्याद्यवयवादिकस्य कालस्य क्षेत्रस्य च वेत्ता।। ४।।**

तत्रेति। तत्र तस्मिन् ग्रहगणिते पञ्चसिद्धान्ता भवन्ति। के ते? पौलिशरोमकवा-सिष्ठसौरपै-तामहाः, पुलिशसिद्धान्तः , रोमकसिद्धान्तः, वासिष्ठसिद्धान्तः, सूर्यसिद्धान्तः,

ब्रह्मसिद्धान्त इति। एतेषु सिद्धान्तेषु पञ्चसु वेत्ताऽभिज्ञः। युगवर्षायनर्तुमासपक्षाहोरात्रयाम-मुहूर्तनाडीविनाडीप्राणत्रुटित्रुटयाद्यवयवस्य कालस्य वेत्ता। युगानां कृतत्रेताद्वापरकलीनां प्रमाणज्ञः। यथैताविद्भिः सौरेवर्षैः कृतयुगं भवति, एतावद्भिस्त्रेता, एतावद्भिर्द्वापरम्, एतावद्भिः कलिरति। तद्यथा- खखखदन्ताब्धयः, कलियुगपरिमाणं तदेव द्विगुणं द्वापरप्रमाणं त्रिगुणं त्रेताप्रमाणं चतुर्गुणं कृतयुगप्रमाणं भवति। एतैः सर्वैरेकीकृत्य चतुर्युगप्रमाणं भवति।

**ब्रह्मसिद्धान्ते** -

खचतुष्टयरदवेदा ४३२०००० रविवर्षाणां चतुर्युगं भवति।

सन्ध्यासन्ध्यांशैः सह चत्वारि पृथक् कृतादीनि।।

युगदशभागो गुणितः कृतं चतुर्भिस्त्रिभिर्गुणस्त्रेता।

द्विगुणो द्वापरमेकेन सङ्गुणः कलियुगं भवति।।

**पुलिशसिद्धान्ते** दिव्येन मानेन पठ्यन्ते -

अष्टाचत्वारिंशत् पादविहीना क्रमात् कृतादीनाम्।

अब्दास्ते शतगुणिता ग्रहतुल्ययुगं तदेकत्वम्।।इति।।

तद्यथा- ४८००। ३६००। २४००।१२००। एते दिव्येन मानेनातः षष्टिसमधिकशतत्रयेण गुणिता जाताः १७२८००० कृतम्। १२९६००० त्रेता। ८६४००० द्वापरम्।४३२००० कलिः। एवं युगानां वेत्ता।

यावता कालेनार्के द्वादशराशिकं भचक्रं मेषादिमीनान्तं भुङ्क्ते, तद्वर्षं तेन सौरवर्षप्रमाणेन युगसंख्यानम्। एवं रविराशिभोगो मासः। द्वादशमाभिर्मासैर्वर्षमिति। तथा च ब्रह्मसिद्धान्ते - नृवत्सरोऽर्काब्दः इति।

अयने दक्षिणोत्तरे षड्भिः सूर्यमासैरुत्तरमयनं षड्भिर्दक्षिणमिति। तत्र मकरादिरा-शिषट्कस्थेऽर्क उत्तरमयनं कर्क्योदिराशिषट्कस्थे दक्षिणमिति।

ऋतवः षड् भवन्ति शिशिरादयः। ते च मासद्वयात्मकाः। तद्यथा - मकरकुम्भस्थेऽर्के शिशिरः। मीनमेषस्थे वसन्तः। वृषमिथुनस्थे ग्रीष्मः। कर्कटसिंहस्थे वर्षाः। कन्यातुलास्थे शरत्। वृश्चिकधन्विस्थिते हेमन्त इति। **चाचार्यः**-

उदयगयनं मकरादवृतवः शिशिरादयश्च सूर्यवशात्।

द्विभवनकालसमाना दक्षिणमयनं च कर्कटकात्।।इति।

**ब्रह्मसिद्धान्ते।**

द्वौ द्वौ राशी मकरादृतवः षट् सूर्यगतिवशाद्योज्याः।

शिशिरवसन्तग्रीष्मवर्षाशरदः सहेमन्ताः।।इति।।

मासश्चैत्रादिकः। स च रविराशिभोगस्त्रिंशद्दिनात्मकः। पक्षो मासार्धं पञ्चदश दिनानि। अहोरात्रं षष्टिर्घटिकाः। यामोऽहोरात्राष्टमभागः। दिनस्य चतुर्थभागो रात्रेश्च। मुहूर्तोऽह्नः पञ्चदशांशः, रात्रेश्च पञ्चदशभागः। नाडी घटिकाऽहोरात्रषष्टयंशः। विनाडी विघटिका घटिकाषष्टयंश :। प्राणः श्वासनिर्गमप्रवेशौ। त्रुटिश्चक्षुर्निमेषद्वयम्। त्रुटयाद्यवयस्तदर्धम्। आदिग्रहणात् त्रुटिचतुर्थभागमपि। एवमादिकस्य वेत्ता।

तथा च भगवान् पराशर- यावता कालेन विकृतमक्षरमुच्चार्यते स निमेषः। निमेषद्वयं त्रुटिः। त्रुटिद्वयं लवः। लवद्वयं क्षणः। दश क्षणाः काष्ठा। दश काष्ठाः कला। दशकला नाडिका। नाडिकाद्वयं मुहूर्तः। त्रिंशन्मुहूर्ता दिनमिति। एवं कालस्य वेत्ता। तथा क्षेत्रस्य वेत्ता। तत्र कालक्षेत्रयोः साम्यम्। तद्यथ- काले षट् प्राणा विघटिका। विघटिकानां षष्टयां घटिका। घटिकानां षष्टया दिनम्। दिनानां त्रिंशता मास। मासैर्द्वादशभिर्वषं भवति। अथ क्षेत्रे। षष्टयां तत्पराणां विलिप्ता भवति। विलिप्तानां षष्टयां लिप्ता। लिप्तानां षष्टया भागः। भागानां त्रिंशता राशिः। राशिद्वादशकं भगण इति।। तथा च ब्रह्मसिद्धान्ते -

प्राणैर्विनाडिका षड्भिर्घटिकैका विनाडिकषष्टया।

घटिकाषष्टया दिवसो दिवसानां त्रिंशता मासः।।

मासा द्वादश वर्षं विकलालिप्तांशराशिभगणान्तः।

क्षेत्रविभागस्तुल्यः कालेन विनाडिकाद्येन।।

**पौलिशे-**

षट् प्राणास्तु विनाडी तत्षट्या नाडिका दिनं षष्टया।

एतासां तत्त्रिंशन्मासस्तैर्द्वादशभिरब्दः।।

षष्टया तु तत्पराणां विकला तत्षष्टिरपि कला तासाम्।

षष्टयांशस्ते त्रिंशद्राशिस्ते द्वादश भचक्रम्।।

**चार्यभटः-**

वर्षं द्वादश मासास्त्रिंशद्दिवसो भवेत स मासस्तु।

षष्टिर्नाडयो दिवसः षष्टिश्च विनाडिका नाडी।।

गुर्वक्षराणि षष्टिर्विनाडिकार्क्षी षडेव वा प्राणाः।

एवं कालविभागः क्षेत्रविभागस्तथा भगणात्।

अन्यदप्याह-

**चतुर्णां च मानानां सौरसावननाक्षत्रचान्द्राणामधिमासकावमसम्भवस्यचकारणाभिज्ञः।।५।।**

चतुर्णां च मानानामिति। त्रिंशद्भगपरिकल्पनया यावता कालेनार्को भागमेकं भुङ्क्ते तत्सौरं दिनम्। तत्त्रिंशता मासः। एवं राशिभोगेन संक्रान्त्यवधिर्यो मास एतत्सौरं मानम्। सर्वेषां ग्रहनक्षत्राणां स्वोदयात् पुनः स्वोदयं यावत्तत्सावनं दिनम्। तत्त्रिंशता मास इति। एवं सावनं मानम्। नाक्षत्रं मानं चन्द्रनक्षत्रभोगः। यावता कालेन नक्षत्रमेकं चन्द्रमा भुङ्क्ते तन्नाक्षत्रं दिनम्। तत्र च दिनानां सप्तविशंत्या मासो भवति। एवं नाक्षत्रं मानम्। अमाघास्यान्तात् प्रतिपत्प्रभृत्यर्काच्चन्द्रः प्रतिदिनमग्रगो भूत्वा प्रतिपदाद्यान् पञ्चदश तिथीन् निर्वर्तयति यावत्पौर्णमास्यन्तम्। तथा च कृष्णपक्षप्रतिपत्प्र-भृत्यर्कसमीपं क्रमेण गत्वा अमावास्यान्तं निर्वर्तयतीति चान्द्रं मानम्। एवं तिथिरेव चन्द्रदिनम्। त्रिंशत्तिथयो मास इति। तथा च **पुलिशसिद्धान्ते – पृ-२१**

सावनमकृतं चान्द्रं सूर्येन्दुसमागमान् दिनीकृत्य।
सौरं भूदिनराशिं शशिभगणदिनानि नाक्षत्रम्।।

सावनमकृतं स्वयमेव सिद्धं यावन्तश्चतुर्युगेणार्कभगणास्तावन्त एव सौरमानेनाब्दाः। यदस्माकं सौरमानं तत्पुलिशाचार्यासावनम्। तत्रर चतुर्यगाब्दाः ४३२००००। एत एव द्वादशहताः सावनमासाः ५१८४००००। एतावत्यश्चतुर्युगेणार्कसंक्रान्तयः। एतास्त्रिंशद्गुणाः सावनमानदिनानि १५५५२००००। एतावतश्चतुर्युगेणार्को भागान् भुङ्क्ते, तत्र यावता कालेनार्को भागमेकं भुङ्क्ते स सावनमानदिवसः सिद्धः। चान्द्र सूर्येन्दुसमागमान् दिनीकृत्येति तद्यथा -

युगवर्षमासपिण्डं रविमानं साधिमासकं चान्द्रम।
अवमविहीनं सावनमैन्दभब्दान्वितं त्वार्क्षम्।।इति।
एवमधिमासकावमसम्भवस्य च कारणाभिज्ञः।।इति।

अन्यत् कीदृशो दैवविदित्याह-

**षष्टयब्दयुगवर्षमासदिनहोराधिपतीनां प्रतिपत्तिच्छेदवित्।।६।।**

षष्टिवर्षाणि षष्ट्यब्दः। स च पुनः पुनर्भवति। तस्य प्रतिपत्तिः प्रवर्तनं कस्मिन् काले षष्टयब्दस्य प्रारम्भो भविष्यति। एतच्च बृहस्पतिचारे **वक्ष्यत्याचार्यः**-

आद्यं धनिष्ठांशमभिप्रवृत्तो माघे यदा यात्युदयं सुरेज्यः।
षष्ट्यब्दपूर्वः प्रभवः स नाम्ना प्रपद्यते भूतहितस्तदाब्दः।।इति।।

छेदस्तस्यैव षष्टयब्दस्य निवृत्तिः। तज्जानातीति छेदवित्। तन्मध्ये च तत्र द्वादशयुगानि भवन्ति।

विष्णुः सुरेज्यो बलविद्भुतादशस्त्वष्टोत्तरप्रोष्टपदाधिपश्च।

क्रमाद्युगेशाः पितृविश्वसोमशक्रानलाख्याश्विभगाः प्रदिष्टाः।।इति।।

एतेषामाचार्यो बृहस्पतिचारे गणितविधानं वक्ष्यति। वयमपि तत्रैव व्याख्यास्यामः। एषामपि प्रतिपत्तिच्छेदवित्। अत्र च सावनमानेन वर्षपतिर्भवति। तत्र चानयनमाचार्येणोक्तम्। तथाऽ**हर्गणानयनम्** -

सप्ताश्विवेदसंख्यं शक्रकालमपास्य चैत्रशुक्लादौ।

अर्द्धास्तमिते भानौ यवनपुरे सोमदिवसाद्ये।

मासीकृते समासे द्विष्टे सप्ताहतेऽष्टयमपक्षैः२२८।

लब्धैर्युतोऽधिमासैस्त्रिंशद्ध्नस्तिथियुतोऽधःस्थः।।

रुद्रध्नः समनुशरो ५१४ लब्धोनोनो गुणखसप्तभि ७०३ र्द्यूगणः।

रोमकसिंद्धान्तेऽयं नातिचिरे पौलिशेऽप्येवम्।।इति।।

अतो वर्षाधिपानयनम् -

मुनिमयमद्धि २२२७ युक्ते द्युगणे शून्यद्विपञ्चयमभक्ते २५२०।

प्रतिराशि खर्तुदहनैर्लब्धं वर्षाणि यातानि।।

तानि प्रपन्नसहितान्यग्निुणान्यश्विवर्जितानि हरेत्।

सप्तभिरेवं शेषो वर्षाधिपतिः क्रमात् सूर्यात्।।

तत्राहर्गणस्य षष्टिशतत्रयेण भागे हृते यच्छेषं तानि दिनानि प्रवृत्तस्याब्दपतेर्गतानि तान्येव षष्ट्यधिकाच्छतत्रयात् संशोध्य यदवशिष्यते तावन्ति दिनान्येवाब्दपतिर्भविष्यति।

एवमब्दपतेः प्रतिपतिच्छेदौ ज्ञातौ। मासपतेरपि सावनेनैव मानेन प्रवृत्तिनिवृत्ती भवतः। तस्य चानयनमाचार्येण तत्रैवोक्तम्। तथा च -

त्रिंशद्भक्ते मासाः प्रतिपत्सहिता द्विसंगुणा व्येकाः।

सप्तोद्धतावशेषो मासाधिपतिस्तथैवार्कात्।।

तत्र त्रिंशता भागे हृते यदवशिष्यते तावन्त्येव दिनानि तस्य मासपतेः प्रवृत्तस्य गतानि। तानि च त्रिंशतः संशोध्य यदवशिष्यते तावन्ति दिनानि स एव मासपतिर्भवति। एवं मासाधिपतेः प्रतिपतिच्छेदौ जातौ। तथा च ब्रह्मसिद्धान्ते –

षष्टिशतत्रयभक्तत् कल्पगताहर्गणतात्फलं त्रिगुणम्।
सैकं सप्तविभक्तं सावनवर्षाधिपोऽर्कादिः।।
द्युगणांत्त्रिंशद्भक्ताधल्लब्धं द्विगुणितं सरूपं तत्।
सप्तविभक्ते शेषः सावनमासाधिपोऽर्कादिः।।

दिनपतिहोराधिपत्योराचार्याणां निश्चयो नास्ति। केषाञ्चिदौदयिको वारपतिः। अन्येषां माध्याह्निकोऽन्येषामास्तमयिकोऽन्येषामार्द्धरात्रिक इति। तथा चाचार्यः-

द्युगणाद्दिनवाराप्तिर्द्युगणोऽपि हि देशकालसम्बन्धः।
लाटाचार्येणोक्तम् यवनपुरेऽर्द्धागस्ते सूर्यै।।
रव्युदये लङ्कायां सिंहाचार्येण दिनगणोऽभिहितः।
यवनानां निशि दशभिर्गतैर्मुहूर्तैश्च तद्गुरुणा।।
लङ्कार्द्धरात्रसमये दिनप्रवृत्तिं जगाद चार्यभटः।
भूयः स एव चार्कोदयात् प्रभृत्याह लङ्कायाम्।।
देशान्तरसंशुद्धिं कृत्वा चेन्न घटते तथा तस्मिन्।
कालस्यास्मिन् साम्यं तैरेवोक्तं यथा शास्त्रम्।।
मध्याह्नं भद्राश्वेष्वस्तमयं कुरुषु केतुमालानाम्।
कुरुतेऽर्द्धरात्रमुद्यन भारतवर्षे युगपदर्कः।।
उदयो यो लङ्कायां योऽस्तमयः सवितुरेव सिद्धपुरे।
यमकोटयां मध्याह्नं रोमकविषयेऽर्द्धरात्रं च।।
अधिमासकोनरात्रग्रहदिनतिथिदिवसमेषचन्द्रार्काः।
अयनर्त्वार्क्षगतिनिशाः समं प्रवृत्ता युगस्यादौ।।
अन्यद्रमकविषयाद् देशान्तरमन्यदेव यवनपुरात्।
लङ्कार्द्धरात्रसमयादन्यत् सूर्योदयाच्चैव।।
सूर्यस्यार्द्धास्तमयात् प्रतिविषयं यदि दिनाधिपं ब्रूमः।
तत्रापि नाप्तवाक्यं न च युक्तिः काचिदप्यस्ति।।
सन्ध्या क्वचित्क्वचिदहः क्वचिन्निशा दिवसपतेः क्वचित्क्वचित्।
स्वल्पे स्वल्पे स्थाने व्याकुलमेवं दिनपतित्वम्।।

होरावर्त्ताप्येवं यस्माद्धोरा दिनाधिपस्याद्या।

तस्यापरिनिष्ठाने होराधिपतिः कथं भवति।।

अविदित्वैवं प्रायो दिनवारे जनपदः प्रवृत्तोऽयम्।

स्फुटतिथिविच्छेदसमं युक्तमिदं प्राहुराचार्याः।।इति।

अथान्यदप्याह-

**सौरादीनां च मानानामसदृशसदृशयोग्यायोग्यत्वप्रतिपादनपटुः।।७।।**

सौरमानं रविराशिभोगः। अनया कल्पनया यावता कालेनार्को राशिद्वादशकं भचक्रं भुङ्क्ते तावान् कालो रविमानेन वर्ष भवति। द्वादश राशयो द्वादशमासा एव। एतच्च सौरं मानं सावनदिनानां पञ्चषष्ट्यधिकं दिनशतत्रयं भवति घटिकापञ्चदशकेन सार्द्धेनाधिकम्।

सावनं मानं स्वोदयात् स्वोदयं यावत् षष्ट्यधिकेन दिनशतत्रयेण भवति। नाक्षत्रं चन्द्रनक्षत्रभोगः। तच्च कदाचित् षट्षष्टिघटिका भवन्ति कदाचिच्चतुष्पञ्चाशत्। अत्रापि मध्ये सञ्चरति।

चान्द्रं तिथिभोगः। तस्यापि नक्षत्रवदूनाधिकता। एतदसदृशत्वं मानाना्। सदृशत्वंचैक-कार्यकरणद्वारेण। तच्चैककार्यकरणं ग्रहगतिसाधनं नाम। तद्यथा - प्रथमं तावन्नक्षत्रपरिवर्ता इष्टग्रहभगणोना यावत्क्रियन्ते तावदिष्टग्रहस्य सावनदिवसा भवन्ति। ते च नक्षत्रपरिवर्त्ताः सूर्यभगणोना भूदिनसंज्ञास्तावत् स्थाप्याः। तत्रेष्टकाले कल्पाब्दा ये गता रविपरिवर्ताः सौरमानोत्पन्नास्ते च द्वादशगुणिता वर्तमानकाले चैत्रसिताद्यतीतमाससंयुक्ता रविमानेनैव मासा भवन्ति। ततस्तमिसन् मासगणे त्रैराशिकोपलब्धान् गताधिमासकान् संयोज्य त्रिंशता सङ्गुण्य वर्त्तमानमासगततिथीः संयोज्य चान्द्रो दिनगणो भवति। स च त्रैराशिकोपलब्धैस्तिथिलोपैर्विहीनः सावनोऽहर्गणो भवति। स चेष्टग्रहभगणगुणः सावनदिनहतः फलं भगणादिको ग्रहः। स च स्फुटीकृतो जातकादावुपयुज्यत इति।

**अन्यदप्याह-**

**सिद्धान्तभेदेऽप्ययननिवृत्तौ प्रत्यक्ष सममण्डललेखासम्प्रयोगाभ्युदितां-**

**शकानां छायाजलयन्त्रद्दग्गणितसाम्येन प्रतिपादनकुशलः।।८।।**

सिद्धांतभेदेऽपीति – सिद्धान्ताः पौलिशादयः तेषां भेद असादृश्यम् तस्मिन्नपि प्रति पादने कुशलः शक्तः। अतिगणितपटुत्वात्। या- अमुकसिद्धान्तस्याऽमुकसिद्धान्तेन सह ग्रहाणामेतावदन्त-रममुकेनापि सहैतावदन्तरमिति।

एवं ग्रहणसमागमादीनामपि। तथा चाऽसचार्येण पञ्चसिद्धान्तिकायामेव प्रदर्शितम्। तथा च -

खार्कध्नेऽग्निहुताशनमपास्य रूपाग्निवसुहुताशकृतैः।

हत्वा क्रमाद्दिनेशो मध्यः केन्द्र सविंशांशम्।।

इति **पौलिशे** तथा च-

रोमकसूर्यो द्युगणात् खतिथिध्नात्पञ्चकर्तुपरिहीणात्।

सप्ताष्टकसप्तकृतेन्द्रियोद्धतात् मध्यमः सूर्यः।।

तथा –

द्युगणेऽर्कोऽष्टशतध्ने विपक्षवेदार्णवेऽर्कसिद्धान्ते।

स्वरखाश्विद्विनवयमोद्धते क्रमाद्दिनदलेऽवन्त्याम्।।इत्यादि।।

एवं सिद्धान्तत्रयेणार्कमानीयान्तरं बोद्धव्यमिति। तथायनयोर्दक्षिणोत्तरयोर्या निवृत्ति र्निवर्तनं तस्यामपि प्रतिपादने कुशलः। यथा - अमुकसिद्धान्तेऽर्कस्यैतावद्भिर्दिनैरेतावती-भिर्धटिकाभिरयनचलनम-मुकसिद्धान्ते एतावतीभिर्दुष्ट्याऽमुकस्मिन् दिने एतवातीभिर्घ-टिकाभिश्च दृश्यते तत्प्रतिपादने च कुशलः। एतच्चाऽऽचार्येणैव प्रतिपादितम्। तथा च पञ्चसिद्धानित कायाम-

आश्लेषार्द्धदासीद्यदा निवृत्तिः किलोष्णकिरणस्य।

युक्तमयनं तदाऽऽसीत् साम्प्रतमयनं पुनर्वसुतः।।

तथा च **वक्ष्यति –**

आश्लेषार्द्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम्।

नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु।।

साम्प्रतमयनं सवितु : कर्कटकाद्यं मृगादितश्चान्यत्।

उक्ताभावे विकृतिः प्रत्यक्षपरिक्षणैर्व्यक्तिः।।

तथा च **दृष्टिवेधमाचार्य एव वक्ष्यति -**

दूरस्थचिह्नवेधादुदयेऽस्तमये सहस्त्रांशोः।

छायाप्रवेशनिर्गमाचिह्नैर्वा मणडले महति।। इति।

तथाऽन्यदप्याह-

**सूर्यादीनां च ग्रहाणां शीध्रमन्दयाम्योत्तरनीचोच्चगतिकारणाभिज्ञः।।९।।**

सूर्योदय आदित्यादयो ग्रहाः। आदित्यचन्द्रभौमबुधजीवशुक्रसौराः। तेषां कः शीघ्रः को मन्द इत्यस्मिन् कारणेऽभिज्ञः। तत्र च सर्वग्रहेभ्यश्चन्द्रमाः शीघ्रस्ततो मन्दो बुधस्ततः शुक्रस्ततोऽर्कस्ततः कुजस्ततो गुरुस्ततः शनिरित। तथा सर्वग्रहेभ्यो मन्दः शनैश्चरस्ततो गुरुः शीघ्रस्ततः शुक्रस्ततो बुधस्ततश्चन्द्रमा इति। यस्य तु भूमेरासन्नो भ्रमः सोऽन्यस्माच्छीघ्रः। यस्य दूरः स मन्दः। यस्य च महती भुक्तिः स शीघ्रो यस्याल्या स मन्द इति। तथा चाऽऽचार्यः -

चन्द्रादूर्ध्वं बुधसितरविकुजजीवार्कजास्ततो भानि।

प्राग्गतयस्तुल्यजवा ग्रहास्तु सर्वे स्वमण्डलगाः।।

तथा च **ब्रह्मसिद्धान्ते –**

भगणस्याधः शनिगुरुभूमिजरविशुक्रसौम्यचन्द्राः।

कक्ष्याक्रमेण शीघ्राः शनैश्चराद्याः कलाभुक्त्या।।

तथा **चाऽऽचार्यभटः**-

भानामधः शनैश्चरबृहस्पतिकुजार्कशुक्रबुधचन्द्राः।

तेषामघश्च भूमिर्मेढीभूता खमध्यस्था।।

तत्र यस्य भूमिनिटभ्रमः सोऽल्पेन कालेन भगणभोगं पूरयत्यतः शीघ्रः। यस्च दूरे स महता कालेनातो मन्दः। यतो भूम्यासन्नास्याल्यो भ्रमस्तत्र च राशिभागा अल्पा एव भवन्ति। दूरस्थितस्च च महान् भ्रमस्तत्र च राशिभागा एव महान्तस्तेन चन्द्रमाः स्वल्पेन कालेन भगणभोगं पूरयति महता कालेन सौरः। तथा चाऽऽचार्यः-

तैलिकचक्रस्य यथा विवरमराणां घनं भवति नाभ्याम्।

नेम्यां महदेवं संस्थितानि राश्यन्तराण्यूर्ध्वम्।।

पर्येति शंशी शीघ्रं स्वल्पं नक्षत्रमण्डलाधः स्थः।

ऊर्ध्वस्थस्तुल्यजवोऽपि संस्थितस्तथा न महदर्कसुतः।।

तथा च **ब्रह्मसिद्धान्ते –**

लघवोऽल्पे राश्यंशा महति महान्तोऽल्पमल्पेन।

पूरयतीन्दुर्महता कालेन महाशनैश्चारी।।

तथा चाऽऽर्यभटः-

मण्डलमल्पमधः स्थात् कालेनाल्पेन पूरयति चन्द्रः।

उपरिष्टात् सर्वेषां महच्च महता शनैश्चारी।।

अल्पे हि मण्डलेऽल्पा विभागतुल्याः स्वकक्ष्यासु।। इति।

अन्यदप्याह-

**सूर्याचन्द्रमसोश्च ग्रहणे ग्रहणादिमोक्षकालदिक्प्रमाणस्थितिविमर्दवर्णा-देशानामनागतग्रहसमागमयुद्धा नामादेष्टा।।१०।।**

सूर्याचन्द्रमसोरर्कशशिनोर्ग्रहणे उपरागे ग्रहणादि ग्रहणप्रारम्भं जानाति। एतावति स्वदिनगते काले ग्राह्यग्राहकबिम्बसम्पर्कः। तथा मोक्षकालं जानाति। एतावति गते काले मोक्षः। ग्राह्यमण्डलं सकलं ग्राहकस्त्यजति। तथा कालं जानाति। प्रग्रहणमोक्षयोरन्तर एतावान् कालः। तथा दिक्। अमुकस्यां दिशि प्रग्रहणममुकस्यां निमीलनममुकस्यां मध्यग्रहणममुकस्यामुन्मील-नममुकस्यां मोक्ष इति। प्रमाणं यथा - खण्डग्रहण एतावद्बिम्बं छिन्नं भवति। मध्यग्रहणकालिके तिथ्यन्ते स्फुटप्रगहणस्थि-त्यर्थं विशोध्य ग्रहणादिर्भवति, तत्रैव मौक्षकालिकं स्फुटस्थित्यर्द्धं संयोज्य मोक्षकालो भवति। स्थित्यर्धद्वयस्य योगः स्थितिकाल। विमर्दो निमीलनोन्मीलनयोर्मध्यकालः। तावन्तं कालं ग्राह्यबिम्बं सकलं ग्राहकः सञ्छाद्य तिष्ठति स विमर्दकालः। तथा वर्णो ग्रहणे ग्राहकगृहीतस्य बिम्बस्य। स धूम्रकृष्णताम्रकपिल इति। एतत्सर्वं गणितस्कन्धनिर्दिष्टम्। वलनविक्षेपवशेन परिलेखने प्रग्रहणादीनां दिग्ज्ञानम्। मध्यग्रहणपरि-लेखकरणात् प्रमाणज्ञानम्। निमीलिनोन्मीलनविमर्दार्द्धयोर्योगे विमर्दकालः। वर्णो तथा-

आद्यन्तयोः स धूम्रः कृष्णः खण्डग्रहेऽर्धतोऽभ्यधिके।
ग्रासे स कृष्णताम्रः सर्वग्रहणे कपिलवर्णः।। इति।

अन्यदप्याह-

**प्रत्येकग्रहभ्रमणयोजनकक्ष्याप्रमाणप्रतिविषययोजनपरिच्छेदकुशलः।।११।।**

एकमेकं प्रत्येकं प्रत्येकस्य ग्रहस्य भ्रमणयोजनानि प्रत्येकग्रहभ्रमणयोजनानि तेषां परिच्छेद परिच्छितौ विज्ञाने कुशलः शक्तः। यथा – अमुको ग्रह एतावद्भिर्योजनैर्भूगोलादुपरि भ्रमति। ग्रहयोजनकर्ण जानातीत्यर्थः। तथा कक्ष्याप्रमाणपरिचछेदकुशलः। अमुकस्य ग्रहस्यैतावन्ति कक्ष्यायोजनानि। मध्यमो ग्रहो तत्र भ्रमति तद्वृत्तपरिज्ञानमित्यर्थः।

तच्च कक्ष्याकर्णपरिज्ञानं पुलिशादिषु पठयते। तत आनीयास्माभिरिह प्रदर्श्यते। तत्र तावद्योजन-प्रमाणज्ञानम् -

योजनमष्टौ क्रोशाः क्रोशश्चत्वारि करसहस्त्राणि।
हस्तः शङ्कुद्वितयं द्वादशभिः सोऽङ्गुलैः शङ्कुं :।।

अथ ग्रहाणां चतुर्युगाध्वयोजनप्रमाणम् -

युगमासाधिकमासाः सभमासा योजनीकृताः सोऽध्वा।
प्राग्यायिनां ग्रहाणां तस्माात् कक्ष्या भगणभक्ताः।

अथान्यदप्याह-

**भूभगणभ्रमणसंस्थानाद्यक्षावलम्बकाहर्व्यासचरदलकालराश्युदयच्छा-**
**यानडीकरणप्रभृतिषु क्षेत्रकालकरणेष्वभिज्ञः।।१२।।**

भूभगणेति। भूमेः संस्थानाभिज्ञः। भूमेः संस्थानं जानाति। यथा – भूर्गोलकाकारा खमध्यस्थिता नक्षत्रपञ्चरमध्यगता च ध्रूवतारकद्वयप्रतिबद्धा तिष्ठाति। अयस्कान्तद्वया-कृष्टोऽन्तरे लोहपिण्ड इव। स च भूगोलः समन्तात्तरुनगनगरसरित्समुद्रादिभिर्व्याप्तः। तस्योपरि मध्यभागे मेरौ देवास्तले दैत्या इति। एवमियं भूर्गोलकाकारा खमध्यगा तिष्ठति।

पञ्चमहाभूतमयस्तारागणपञ्चरे महीगोलः।
खेऽयस्कान्तान्तः स्थो लोह इवावस्थितो वृत्तः।।
तरुनगनगरारामसरित्समुद्रादिभिश्चितः सर्वः।
विबुधनिलयः सुमेरुस्तन्मध्यऽधः स्थिता दैत्याः।।
सलिलतटासन्नानामावाङ्मुखी दृश्यते यथा छाया।
तद्वद्गतिरसुराणां मन्यन्ते तेऽप्यधो विबुधान्।।
गगनमुपैति शिखिशिखा क्षिप्तमपि क्षितिमुपैति गुरु किञ्चित्।
यद्वदिह मानवानामसुराणां तद्वदेवाधः।

अथ तन्त्रज्ञस्य विशेषलक्षणमाह-

**नानाचोद्यप्रश्नभेदोपलब्धिजनितवाक्सारो निकषसन्तापांभिनिवेशैः**
**कनस्येवाधिकतरममलीकृतस्य शास्त्रस्य वक्ता तन्त्रज्ञो भवति।।१३।।**

इत्थम्भूतस्य शास्त्रस्य यो वक्ता प्रतिपादकः स तन्त्रज्ञो भवति गणितज्ञ इत्यर्थः। कीदृशस्य शास्त्रस्य निकषसन्तापाभिनिवेशैः कनकस्येवाधिकतरममलीकृतस्य। यथा कनकं स्वर्णं स्वभावनिर्मलं भवति। तच्च निकषसन्तापाभिनिवेशैरधिकतरं निर्मलं भवति। निकषं निर्घर्षणं पाषणतले। सन्ता-पोऽग्नौ परितापनम्। अभिनिवेशो यन्त्रच्छेदनसङ्घट्टनमेतैः सुवर्णमधिकतरममलं भवति। शास्त्रस्य निकषं निर्घर्षणं भूयोभूयोऽन्वेषणम्। सन्तापश्चित्तपरिता-पश्चमत्कारस्तत्रैवेकाग्रता। अभिनिवेशो यत्नो व्यासक्तिः। एतैरमलीकृतस्य निः सन्देहभूतस्य

कीदृशो वक्ता नानाचोद्यप्रश्नभेदोपलब्धिजनितवाक्सारः। नानाप्रकाराश्च ते चोद्याः , प्रश्नानां भेदाः प्रश्नभेदाः। अभिधेयस्यार्थस्य प्रतिपक्षोद्भवेनानुपपत्त्योप-पादनं चोद्यम्। यथा केनचिच्चोद्यः कृतः। यथा यो दक्षिणस्यां दिशि कन्यास्थे सवितर्यतीवस्फुटरू-पस्तारको दृश्यते स ध्रुवः। उत्तरस्यां दिशि योऽतिसूक्ष्मरूपः सोऽगस्त्यः। तस्य गोलवासनया तन्त्रज्ञेन परिहारो दीयते। यथा भूगोलमध्ये मेरुस्तत्र चाक्षभागा नुवतिर्ध्रुवोन्नतिरेवाक्षोऽतो दक्षिणस्यां दिशि ध्रुवो न दृश्यते यतस्तत्र भूगोलमध्यम्। अगस्त्य उत्तरस्यां न दृश्यते यतः स खमध्यात् स्वक्रान्त्या दक्षिणे गतो ध्रुवकविक्षेपवशात्। अनधिगतस्यार्थस्याधिगमतापवचनम्। प्रश्नो यथा – नक्षत्रगणनया चित्रा प्रथमतः स्थिता तत्पश्चात् स्वाती कथं स्वाती पूर्वमुदयं याति पश्चाच्चित्रा। वित्रायामस्तमितायां पश्चात्स्वतिरस्तमेति। तस्या अपि गोलवासनया तन्त्रज्ञेन परिहारो दीयते। तथा चित्रा दक्षिणविक्षिप्ता स्वातिरुत्तरतश्चित्राया अल्पमहः प्रमाणं स्वातेरतिमहत्। तेनैतत् सम्भवति। एवं नानाचोद्यप्रश्नभेदानामुपलब्धिर्नानाचोद्यप्रश्नभेदोपलब्धिः। उपलब्धिरुपलम्भनं ज्ञानं वादिकृतप्रश्नानां परिहारः। तयोनानाचोद्यप्रश्नभेदोपलब्ध्या जनितो वाक्सारो यस्य कैर्निकषसन्तापाभिनिवेशैः कनकस्येवाधिकतरममलीकृतस्य शास्त्रस्येति।

उक्तं च गर्गेण महर्षिणा किं तादित्याह–

**न प्रतिबद्धं गमयति वक्ति न च प्रश्नमेकमपि पृष्टः।**

**निगदति न च शिष्येभ्यः स कथं शास्त्रार्थविज्ज्ञेयः।।१४।।**

यो नरः प्रतिबद्धं शास्त्रोपनिबद्धमर्थं न गमयति न प्रतिपादयति सूत्राक्षराणां योऽर्थस्तं विहायाऽसारार्थं प्रतिपादयति। तथा हि - केनचित् सन्देहव्युदासार्थं पृष्टः सन्नेकमपि प्रश्नं न वक्ति न कथयति। तथा च शिष्येभ्यश्छात्रेभ्यो न निगदति न पाठयति। स कथं केन प्रकारेण शास्त्रार्थविद् ग्रन्थसद्भावो ज्ञेयो ज्ञातव्यः। एतदुक्तं भवति। एवंविधः स मूर्ख इति ज्ञेयो न पण्डितः।

अथ **मूखोर्पहासार्थमाह**–

**ग्रन्थोऽन्यथोऽन्यथार्थं करणं यश्चान्यथा करोत्यबुधः।**

**स पितामहमुपगम्य स्तौति नरो वैशिकेनार्याम्।।१५।।**

यो नरो मनुष्योऽन्यथाऽन्येन प्रकारेण ग्रन्थसंस्थितोऽन्यथार्थ करोति। करणं गणित-कर्म्म गुणकारभागहारादिकमन्यथास्थितमन्यथा करोति। यथा–

दिनकरवसिष्ठपूर्वान् विबुधमुनीन् भावतः प्रणम्यादौ।

जनकं गुरुं च शास्त्रे येनास्मिन्न : कृतो बोधः।। इति।।

अत्र व्याख्या- दिनं सर्वत्र मानैर्यद्गण्यते। करौ हस्तौ। याभ्यां गणितकर्म क्रियते। वसिष्ठो धनधान्यतोऽर्थः प्रार्थयते। पूर्वा आद्यपुरुषाः। पितामहप्रभृतयो य एतान् दिनकरवस्ष्ठिपूर्वान्। विशेषेण बुधाः पण्डिता ये मुनयः ऋषयो ये तान्। तथा भावतो भा कान्ति र्विद्यते येषु ते भावन्तो द्वादशादित्यास्तानपि भावतः। यतस्तदालोकात् सर्वेषामेव कर्म्मणां प्रवृत्तिः आदौ प्रथमतः प्रणम्य नमस्कृत्य। तथा जनानां लोकानां कं शिरो जनकं कीदृशं गुरुं च गौरवयुक्तं सर्वाङ्गप्राधान्यता्। येन केन नोऽस्माकमस्मिन् शास्त्रे बोधः कृत उत्पादितः। मूर्ध्ना विना सत्सु विद्यमानेष्ववयवेषु न किश्चित कर्तुं शक्यत इति।

तथा करणे। द्युगणेऽहर्गणे अष्टशतध्ने अष्टौ च शतं चाष्टशतं तेन हते गुणिते। किं भूतेऽहर्गणे विपक्षा वेदार्णवाः प्रमाणं यस्य द्वाभ्यां हीना चनुश्चत्वारिंशदित्यर्थः। तथा तस्मिन् अर्कसिद्धान्ते। अर्का द्वादश। सिद्धाश्चतुर्विशतिरन्तेऽवसाने यस्य। यथासङ्ख्यं स्वरखाश्विद्विनव-यमाभ्यां क्रमादुद्धृते विभक्ते भगणादिविलिप्तानेऽर्को लभ्यते। एवमवन्त्यामुज्जयिन्यां दिनदले मध्याह्ने नान्यदेशेष्वित्यर्थः।

सोऽबुधो मूर्खः पितामहं पितुः पितरमुपागम्य तत्समीपं गत्वा वैशिकेन वैश्यात्वेन नखदशनक्षत-सीत्कारादिभिर्गुणैरायां मातरं स्तौति श्लाघयति। मूर्खोपहासमेतत्।

अथ त्रिस्कन्धस्य वाक्प्रशंसार्थमहा-

**तन्त्रे सुपरिज्ञाते लग्ने छायाम्बुयन्त्रसंविदिते।**

**होरार्थे च सुरूढे नादेष्टुर्भारती वन्ध्या।।१६।।**

तन्त्रे गणितस्कन्धे सुपरिज्ञाते सुष्टु सवासनिके विदिते। तथा लग्ने तात्कालिके उदये छायायाः शङ्कोः सम्बन्धिन्या अम्बुयन्त्रेण घटिकादिकेन च संविदिते सम्यग्ज्ञाते। कालं ज्ञात्वा स्फुटतरे कृत इत्यर्थः।

तथा होरार्थे जातकार्थे सुरूढे सुस्थिरे सति। आदेष्टुरुपदेशकर्तुर्भारती वाग् वन्ध्या निष्फला न भवति। तस्य वाग् मुनेरिव सत्या भवतीत्यर्थः।।१६।।

उक्तं चाऽऽचार्यविष्णुगुप्तेन। तथाऽऽह-

**अप्यर्णवस्य पुरुषः प्रतरन् कदाचिदासादयेदनिलवेगवशेन पारम्।**

**न त्वस्य कालपुरुषाख्यमहार्णवस्य गच्छेत्कदाचिदनृषिर्मनसापि पारम्।।१७।।**

अपिशब्दः सम्भावनायां वर्तते। अर्णवस्य समुद्रस्य दुस्तरस्यापि पुरुषो मनुष्यः प्रतरन्नुल्ल-ङ्घयन्ननिलवेगवशेन वायुरयहेतुना परं पारमासादयेत्प्राप्नुयात्। अस्य पुनः

कालपुरुषाख्यमहार्णवस्य कालरूपः पुरुषः स चाख्या नाम यस्यासौ कालपुरुषाख्यः , स च महार्णवस्तस्य ज्योतिः शास्त्रवि-स्तीर्णसमुद्रस्यानृषिरमुनिर्मनसा चितेनापि पारं नासादयेत्। अनेन ज्योतिः शास्त्राऽऽनत्यं प्रदर्शितं भवति।

अथ स्कन्धद्वये के भेदास्तदर्थमाह-

**होराशास्त्रेऽपि च राशिहोराद्रेष्काणनवांशकद्धादशभागत्रिंशद्भागबलाबलपरिग्रहो ग्रहाणां दिक्स्थानकालचेष्टाभिरनेकप्रकारबलनिर्धारणं प्रकृतिधातुद्रव्यजातिचेष्टादिपरिग्रहो निषेकजन्मकालविस्मापनप्रत्यादेशसद्योमरणायुर्दायदशान्तर्दशाष्टकवर्गराजयोगचन्द्रयोगद्वि-ग्रहादियोगानां नाभसादीनां च योगानां फलान्याश्रयभावावलोकननिर्याणगत्यनूकानि तत्कालप्रश्नशुभाशुभनिमित्तानि विवाहादीनां च कर्मणां करणम्।।१८।।**

होराशास्त्रे जातकशास्त्रे के भेदाः। अपिशब्दः सम्भावनायाम्। चशब्दः प्रकारार्थे। न केवलं तन्त्रे वक्रानुवक्रास्तमयोदयाद्या उक्तः। यावद्धोशारास्त्रेऽपि तथा भेदाः। तद्यथाराशिर्मेषादि-कस्तस्य स्वरूपं मत्स्यो घटीत्यादि स चाष्टादशशतलिप्तात्मकः। होरा तदर्द्धं तस्या मार्तण्डेन्द्वोरिति लक्षणमुक्तम्। द्रेष्काणस्त्रिभागस्तस्य द्रेष्काणाः प्रथमपञ्चनवाधि-पानामिति लक्षणमुक्तम् नवांशको नवभागस्तस्याजमृगेति लक्षणमुक्तम् द्वादशभागो द्वादशांशस्तस्य भवनसमांशकेति लक्षणमुक्तम्। त्रिशद्भगस्त्रिशांशस्तस्य कुजरविजेत्यादि लक्षणमुक्तम्। बालबलपरिग्रहो राशीनामेव होरास्वामिगुरुज्ञेत्यादिनोक्तः। तथा ग्रहाणामा-दित्यादीनां दिग्बलं दिक्षु बुधाङ्गिरसाविति। स्थानबलं स्वोच्चसहृदिति। कालबधं निशि शशिकु-जसौरा इति। चेष्टाबलमुदगयने रविशीतमयूखाविति। एताभिर्दिक्स्थानकालचेष्टाभिः। अनेकप्रकाराणां बहुविधानां बलानां वीर्याणा निर्धारणविचारः। यथा चन्द्रसितौ क्षेत्र इति शुभग्रहदर्शनं नैसर्गिकबल-मित्येवमादिकानाम्। प्रकृतिर्वातपित्तश्लेषमत्मकत्वम्। मधुपिङ्गलदृक्-चतुरस्त्रतनुः पित्तप्रकृति-रित्यादि। धातुः वसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवस्ते चोक्ताः स्नाय्वस्थ्यसृक्त्वगित्यादि। द्रव्यं ताम्रादि। ताम्रं स्यान्मणिहेम इत्याद्युक्तम्। जातिर्ब्रह्मणादि-र्विप्रादितः शुक्रगुरू इत्युक्ता। चेष्टा विनियोगः। राजानौ रविशीतगू इति। आदिग्रहणत् सत्त्वादिगुणत्रयं चन्द्रार्कजीवा इति। कटुकादिरसषट्कं देवादिस्थानानि वस्त्राणि देवाम्ब्वग्नीत्यादिनो-क्तानि। एवमादिकः। परिग्रहः स्वामित्वम्। तथा निषेको गर्भाधानं यथास्तराशिर्मिथुनं समेतीत्यादि। जन्मकालो गर्भमोक्षसमयः पितुर्जातः परोक्षस्येत्यादिकः। तत्र च विस्मापनप्रत्यपादेशः। विस्मजननानां प्रत्ययानां नालवेष्टितकोशवेष्टितानां द्वित्रादीनां

भुजांघ्रिशिरसां जन्मकथनं तदीयस्य पितुश्च सन्निधानमसन्निधानं गर्भमोक्षलक्षणं द्वारधिक्परिज्ञानं गृहशय्यासूतिकासहज-व्रणादिपरिज्ञानम्। सद्योमरणमरिष्टाध्यायः सन्ध्याया-मित्यादि। आयुर्दायो जीवितप्रमाणम्। मययवन-मणित्थमिति। दशा ग्रहाणामायुषं आधिपत्यम्। उदयरविशशाङ्केत्यादि। अन्तर्दशा मध्यवर्तिनो दशा एकर्क्षगोऽर्द्धामिति। अष्टकवर्ग औत्पादिकानां फलानां परिज्ञानं स्वादर्क इत्यादि। राजयोगाः प्राहुर्यवना इति। चन्द्रयोगाः सुनफादुरुधुराख्याः। हित्वार्कं सुनफानफेति। द्विग्रहयोगाः। तिग्मांशुर्जनयतीत्यादि। तथैककस्थैश्चतुरादिभिरिति। नाभसयोगा नवदिग्वसव इति। आदिग्रहणात् कर्माजीवाराशिशीलानि प्रकीर्णाध्यायानिष्टयोगाः। अर्थाप्तिः पितृमातृपत्नीति कर्माजीवाः। वृत्ता तामदृगिति राशिशीलानि। स्वर्क्षतुङ्गेति प्रकीर्णकः। लग्नात् पुत्रकलत्र इत्यनिष्टयोगाः। एतेषां फलाति तथा क्रियाश्रयाध्यायः। कुसलमकुलमुख्य इत्यादि। भावाध्यायः शूरस्तब्धेति। अवलोकनं दृष्टिफलाध्यायः। चन्द्रे भूपबुधाविति। निर्याणं मरणनिमित्तं मृत्युर्गत्युगृहेक्षणेनेति। गतिर्देवलोकादिः गतिरपि रिपुरन्ध्रेत्यादि। अनूकं प्राग्जन्म गुरुरुडुपतिशुक्राविति। तत्कालप्रश्ने पुच्छायां शुभाऽशुभानि। लग्नाश्रितानि निमित्तानि शुभाशुभफल-सूचकानि। तथा चोक्तम् –

अपृच्छतः पृच्छतो वा जिज्ञासोर्यस्य कस्यचित्।
होराकेन्द्रत्रिकोणेभ्यस्तस्य विन्द्याच्छुभाशुभम्।।

**इत्यादि तत्कालप्रश्नः।**

विवाहदीनां च कर्मणां विवाहोनपनयचूडाकरणगृहप्रवेशानां करणं अज्ञातेत्यादि विवाहपटलम्। तत्रैव सप्तैते शशियोगाः सोम्यैः सह सर्वकर्मसिद्धिकरा इत्याद्युपनयादी-नामतिदेशः कृत इति।।१८।।

अथ यात्रायां के भेदा इत्याह-

**यात्रायां तु तिथिदिवसकरणनक्षत्रमुहूर्तविलग्नयोगदेहस्पन्दनस्वन्पविजयस्त्रानग्रहयज्ञगणयागा-ग्निलिङ्गहस्त्यश्वेङ्गितसेनाप्रवादचेष्टादिग्रहषाड्गुण्योपायमङ्गलामङ्गलशकुनसैन्यनिवेशभूमयोऽ-ग्रिवर्णा मन्त्रिचरदूताटविकानां यथाकालं प्रयोगाः परदुर्गोपलम्भोपायश्चेत्युक्तं चाचार्यैः।।१९।।**

यात्रायां यज्ञेऽश्वमेधिकायां देवपुरुषाकारावन्यमतेनोक्तावतः सोऽध्यायो न गृहीतः। तिथयो नन्दादिकास्तासां शुभाशुभं नन्दाभद्राजयेत्यादि। दिवसग्रहणेन वार उच्यते। उदगयने रोगेत्यादि तत्फलमुक्तम्। करणानि ववादीनि तेषां फलं गरवणिजेत्यादि। नक्षत्राण्यश्विन्यादीनि तेषां गमने फलं दिशि बहुलाद्या इत्यादि। मुहूर्त्तास्त्रिंशच्छिवादिकास्तेषां लक्षणं फलानि च

शिवभुजगेति लक्षणं नक्षत्रफलवदिति फलानि। विलग्नं तात्कालिकं यात्रालग्नं द्विपदवशगाः सर्व इत्याद्युक्तम्। योगा योगाध्यायोक्ता देहः कोश इत्यादि। अथात्रैव पृच्छाकाले उक्तः। तस्मान्नृपः कुसुमरत्फलाग्रह इति। अथवा शुभाशुभफलयोगा जातके उदाहृता इति।यथा होरागतः स्वभवने यदि सूर्यपुत्र इति। तेषामपि फलानि तत्रैव। देहस्पन्दनलक्षणं दक्षिणपार्श्व स्पन्दनमिति। स्वप्नं स्वप्नाध्याये दुकूलमुक्तामणिस्तदिति। विजयस्नानं विजिगीषोर्नृपस्य विजयार्थं स्नानं क्षीरैकतरुनगार्णवेतयादि। ग्रहयज्ञो ग्रहाणां यागः। ग्रहयज्ञमतो वक्ष्ये इति। गणयागो गृह्यकपूजनं यात्रार्वाक्सप्ताहादिति। अग्निलिङ्गान्यग्निलक्षणानि होमकाले गच्छ्रायः। स्वयमुज्ज्वलार्चिरिति। हस्तिनां गजानामिङ्गितं चेष्टितं दन्तमूलपरिणाहदीर्धतामित्यादि। अश्वानां तुरगाणां चेङ्गितं बलावकिरणेति। सेनाप्रवादः सैनिकानां प्रधानराजपुरुषाणां प्रवदनं व्याहरणं संग्रामे वयममरद्विजप्रसादादित्यादि। चेष्टा उत्साहोऽनुत्साहोवा विद्विष्टप्रवरनरा इति। आदिग्रहणाद्वातमेघवृष्टयादीनां लक्षणानि। प्रोत्क्षिप्तेत्यादि वातएवमन्येषामपि। तथा ग्रहाणां बलाबलवशात् षाडगुण्यं सन्धिविग्रहयानासनद्वैधीभावसंश्रयाणां पण्णां गुनानां भावः षाडगुण्यं तेषां ग्रहवशात् सिद्धयसिद्धी ज्ञातव्ये स्वर्क्षेशदशापयोरित्याद्युक्ताः। उपायाश्चत्वारः सामदाम-भेददण्डाख्याः। तेषामपि सिद्धयसिद्धी साम्नः शुक्रबृहस्पती इत्याद्युक्ताः। मङ्गलामङ्गलानि सिद्धार्थकादर्शेत्यादिमङ्गलानि, कर्पासौषधादीन्यमङ्गलानि, प्रस्थानसमये शुभाशुभसूचकानि तथा शकुन-मन्यजन्मान्तरकृतमिति। तथा सुरभिगुल्मेति शुद्धाः। नेष्टा विपर्ययगुणेत्यशुभाः। अशुभा अग्निवर्णा उपस्थाग्निकर्मणि शुभाशुभाः। शुक्लेन्दीवरकाञ्चनद्युतिधरा इति। तथा अन्याश्रितान्यापि शुभाशुभनिमित्तानि सर्वाणि सन्ति। चरदूताटविकानां यथाकालं प्रयोगाः। प्रयोगः प्रयुञ्जनं, कस्मिन् काले मन्त्री रिपोः सकाशं प्रयुज्यते। तथा च शत्रोर्वधाय सचिवं शुभदैवयुक्तमाज्ञापयेदित कस्मिन् काले चराणां गूढपुरुषाणां प्रयोगाः कस्मिन् काले दूतादेः। बुद्ध्वा शक्तिं स्वपरबलयोरित्यत्र प्रयोजनमुक्तम्। कस्मिन् काले आटविकादेर्बलस्य प्रयोगः। अर्कादाटविकमित्यादि प्रयोजनमुक्तम्। एतेषां कथाकालं प्रयोगाः। परदुर्गोपलम्भोपायः परस्य शत्रोर्दुर्गे उपलम्भनं लाभो ग्रहणमित्यर्थः। तत्रोपायो यथा लभ्यते दुर्गस्तस्य च केतुल्कार्कज इत्युपलम्भन-मुक्तम्। इत्येवं प्रकारः उक्तमाचार्यैः।

**किं तादित्याह-**

**जगति प्रसारितमिवालिखितमिव मतौ निषिक्तमिव हृदये।**
**शास्त्रं यस्य सभगणं नादेशा निष्फलास्तस्य।।२०।।**

यस्य शास्त्रं ग्रन्थं सभगणं भगणज्ञानेन सहितं संयुक्तं गणितेनेत्यर्थः। अनेन स्कन्धत्रयं प्रतिपादितं भवति। कीदृशं शास्त्रं जगति लोके प्रसारितं विस्तारितमिव मतौ बुद्धावालिखितं चित्रितमिव हृदये निषिक्तं प्रक्षिप्तमिव तस्य दैवज्ञस्याऽऽदेशा उक्तयो निष्फला न भवन्ति, सत्यरूपा भवन्तीत्यर्थः। एतदुक्तं भवति - त्रिस्कन्धज्ञस्य मुनिरिव वाणी सत्यरूपा भवति।।

अथ **संहिताप्रशंसार्थमाह-**

**संहितापारगश्च दैवचिन्तको भवति।।२१।।**

संहितापारगो निः शेषज्ञाततत्वार्थ :। स दैवचिन्तको भवति। दैवस्य प्राक्तनकर्म-विपाकस्य शुभाऽशुभस्य चिन्तको भवति स्मरणशील इत्यर्थः।

**यत्रैते संहितापदार्थाः।।२२।।**

यत्र यस्यां संहितायामेते वक्ष्यमाणाः पदार्थाः।

के त इत्याह-

**दिनकरादीनां ग्रहाणां चारास्तेषु च तेषां प्रकृतिविकृतिप्रमाणवर्णकिरणद्युतिसंस्थाना-स्तमनोदयमार्ग- मार्गान्तरवक्रानुवक्रर्क्षग्रहसमागमचारादिभिः फलानि :, नक्षत्रव्यूहग्रहशृङ्गाट-कयग्रहयुद्धग्रहसमागमग्रहवर्ष-फलगर्भलक्षणरोहिणीस्वात्याषाढीयोगाः सद्योवर्षकुसुमलतापरिधि-परिवेषपरिघपवनोल्कादिग्दाहक्षितिचलन-सन्ध्यारागगन्धर्वनगररजोनिर्धातार्धकाण्डसस्य-जन्मेन्द्रध्वजेन्द्रचापवास्तुविद्याङ्गविद्यावायसविद्यान्तरचक्रमृगचक्रश्चक्रवातचक्रप्रसादलक्षणप्रतिमा लक्षणप्रतिष्ठानवृक्षायुर्वेदोदगार्गलनीराजखञ्जनकोत्पातशान्तिमयूरचित्रकवृतकम्बलखङ्गपट्टकृक वाकुकूर्मगोजोश्वेभपुरुषस्त्रीलक्षणान्यन्तपुरचिन्ता पिटकलक्षणोपानच्छेदवस्त्रच्छेदचामरदण्ड-शयनाऽऽसनलक्षणरत्नपरीक्षा दीपलक्षणं दन्तकाष्ठाद्याश्रितानिशुभाऽशुभानि निमित्तानि सामान्यानि च जगतः प्रतिपुरुषं पार्थिवे च प्रतिक्षणमनन्यकर्माभियुक्तेन दैवज्ञेन चिन्तयि-तव्यानि। न चैकाकिना शक्यन्तेऽहर्निशमवधारयितुं निमित्तानि। तस्मात्सुभृतेनैव दैवज्ञेनान्येऽपि तद्विदश्चत्वारः कर्तव्याः। तत्रैकेनैन्द्री चाग्रजी च दिगबलोकयितव्या। याम्या नैर्ऋती चान्येनैव वारुणी वायव्या चोत्तरा वैशानी चेति। यस्मादुल्कापातादीनि शीघ्रमपगच्छन्तीति। तस्याश्चाकारवर्णस्त्रहप्रमाणादिग्रहर्क्षोपघातादिभिः फलानि भवन्ति।।२३।।**

उक्तंच च गर्गेण महर्षिणा तच्चाह- बृ.सं.

कृत्स्नाङ्गोपाङ्गकुशलं होरागणितनैष्ठिकम्।

यो न पूजयते राजा स नाशमुपगच्छति।।२४।।

कृत्स्नानि निरवशेषाणि यानि ज्योतिः शास्त्राङ्गानि तथोपाङ्गनि तत्रैव पठितानि पुरुष-लक्षणवस्त्रोपानच्छेदरत्नलक्षणदीपदन्तकाष्ठलक्षणादीनि। एतदुक्तं भवतिग्रहनक्षत्र-राशीनाश्रित्य यदुक्तम् तान्यङ्गानि परिशिष्टान्युपाङ्गानि इति। भगवान् गर्गः- **बृ.सं.,पृ-६०**

अधिकृत्य ग्रहर्क्षादि जगतो येन निश्चयः।

तदङ्गमुत्तमं विन्द्यादुपाङ्ग शेषमुच्यते।। इति।।

एतेषां कृत्स्नानां निरवशेषाणामङ्गानामुपाङ्गानां कुशलस्तज्ज्ञः। तथा च होरायां जातके गणिते ग्रहगणिते च नैष्टिकं निष्ठालग्नं षडङ्गं तत्पारगन्तारमित्यर्थः। एवंविधं दैवज्ञं यो राजा नृपो न पूजयते नार्चयति स नाशं विनाशमुपगच्छति प्राप्नोति।

अन्यद्दैववित्प्रशंसार्थमाह-

**वनं समाश्रिता येऽपि निर्ममा निष्परिग्रहाः।**

**अपि ते परिपृच्छन्ति ज्योतिषां गतिकोविदम्।।२५।।**

येऽपि तपस्विनो वनमरण्यं समाश्रिता वसन्ति। निर्ममा निरहङ्काराः। निष्परिग्रहा दारविर्जताः। निर्गतः परिग्रहो येभ्यस्तेऽपि तथाभूता ज्योतिषां ग्रहनक्षत्राणां गतौ गमने कोविदं तज्ज्ञं परिपृच्छन्ति शुभाशुभं ज्ञातुमिच्छन्ति च। अपिशब्दः सम्भावनायां यतस्तेषां ज्योतिः शास्त्रेण न किञ्चित्प्रयोजनं तापसत्वात्।

अन्यत्प्रशंसार्थमाह-

**अप्रदीपा यथा रात्रिरनादित्यं यथा नभः।**

**तथाऽसांवत्सरो राजा भ्रमत्यन्ध इवाध्वनि।।२६।।**

यथा रात्रिर्निशाऽप्रदीपा प्रदीपरहिता न शोभामाप्नोति तमसावृतत्वात्। यथा नभ आकाश-मनादित्यं सूर्यरहितं सान्धकारं न शोभामाप्नोति। तथा तेन प्रकारेण सांवत्सरो दैवज्ञरहितो राजा न शोभते। न केवलं यावत्सर्वत्र च संशयत्वादभ्रमति यथान्धो नेत्रहीनोऽध्वनि पथि परिभ्रमति।

अन्यत्प्रशंसार्थमाह-

**मुहूर्ततिथिनक्षत्रमृतवश्चायने तथा।**

**सर्वाण्येवाकुलानि स्युर्न स्यात्यांवत्सरो यदि।।२७।।**

मुहूर्ताः शिवादिकाः। तिथयः प्रतिपदादिकाः। नक्षत्रमश्विन्यादि। ऋतवः शिशिरादयः। अयने उत्तरदक्षिणे। तथा तेनैव प्रकारेण् एतानि सर्वाणि आकुलानि अज्ञातानि। स्युर्भवेयुः। अथवाऽऽकुलानि नष्टागमानि स्युर्यदि सांवत्सरो दैववित्र स्यान्न भवेत्।

अन्यत्प्रशंसार्थमाह-

**तस्माद्राज्ञाधिगन्तव्यो विद्वान् सांवत्सरोऽग्रणीः।**

**जयं यशः श्रियं भोगान् श्रेयश्च समभीप्सता।।२८।।**

**नासांवत्सरिके देशे वस्तव्यं भूतिमिच्छता।**

**चक्षुर्भूतो हि यत्रैष पापं तत्र न विद्यते।।२९।।**

**न सांवत्सरपाठी च नरकेषूपपद्यते।**

**ब्रह्मलोकप्रतिष्ठां च लभते दैवचिन्तकः।।३०।।**

**ग्रन्थतश्चार्थतश्चैतत्कृत्स्नं जानाति यो द्विजः।**

**अग्रभुक् स भवेच्छ्राद्धे पूजितः पचिपावनः।।३१।।**

एतज्ज्योतिः शास्त्रं ग्रन्थतः, पाठेनार्थतो व्याख्यानात् कृत्स्नं निरवशेषं यो द्विजो ब्राह्मणो जानाति वेत्ति सश्राद्धे पितृतर्पणे अग्रभुक् प्रथमभोजी भवति। स च पूजितोऽर्चितः। पङ्क्तिपावनः। यस्यां पङ्क्त्यामुपविशति तां पवित्रींकरोति।

अन्यदप्याह-

**म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्।**

**ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद्द्विजः।।३२।।**

हि यस्मादर्थे यवनाः किल म्लेच्छजातयस्तेषु यवनेष्विदं ज्योतिः शास्त्रं सम्यक् स्फुटतरमागतः स्थितं यतः पूवाचार्योभ्यस्तैः प्राप्तम्। तथा च -

यद्दानवेन्द्राय मयाय सूर्यः शास्त्रं ददौ सम्प्रणताय पूर्वम्।
विष्णोर्वसिष्ठश्च महर्षिमुख्यो ज्ञानामृतं यत्परमाससाद।।
पराशरश्चाप्यधिगम्य महर्षिमुख्यो ज्ञानामृतं यत्परमाससाद।।
पराशरश्चाप्यधिगम्य सोमाद् गुह्यं सुराणां परमाद्भुतं यत्।
प्रकाशयाञ्चक्रुरनुक्रमेण महर्द्धिसन्तो यवनेषु तत्ते।। इति।

तेऽपि ऋषिवन्मुनिवत्पूज्यन्ते अभ्यर्च्यन्ते किं पुनर्यो द्विजो ब्राह्मणो दैवविद्दैवज्ञ इति।

अथाप्रष्टव्यानाह-

**कुहकावेशपिहितकर्णोपश्रुतिहेतुभि :।**

**कृतादेशो न सर्वत्र प्रष्टव्यो न स दैववित्।।३३।।**

**अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते।**

**स पङ्क्तिदूषकः पापो ज्ञेयो नक्षत्रसूचकः।।३४।।**

यः शास्त्रमविदित्वा अज्ञात्वैव दैवज्ञत्वं ज्यौतिषिकत्वं प्रपद्यते अङ्गीकरोति दैवज्ञत्वमाख्यापयति। स पङ्क्तिदूषकः पंक्तिं दूषयति अपवित्रीं करोति। पापः पापात्मा। नक्षत्रसूचको नक्षत्रपिशुनः। ज्ञेयो ज्ञातव्य इति।

**नक्षत्रसूचकोद्दिष्टमुपवासं करोति यः।**
**स व्रजन्त्यन्धतामिस्त्रं सार्धमृक्षविडम्बिना।।**

यद्येतेषां कदाचिदज्ञानां वचनं सत्यरूपं भवति तान् प्रत्याह-

**नगरद्वारलोष्टस्य यद्वत्स्यादुपयाचितम्।**
**आदेशस्तद्वदज्ञानां यः सत्यः स विभाव्यते।।३५।।**

नगरद्वारे पुरद्वारे यो लोष्टो मृत्खण्डस्तस्योपयाचितं प्रार्थितं यद्वद्यथा सत्यं स्यात्। सत्यरूपं भवेत्। तथा कदाचित्काकतालन्यायेन तद्वदज्ञानां मूर्खाणां य आदेशो वार्ताकथनं सत्यमिव विभाव्यते प्रतिभाति।।

अविदग्धसांवत्सरं प्रत्याह-

**सम्पत्त्या योजितादेशस्तद्विच्छिन्नकथाप्रियः।**
**मत्तः शास्त्रैकदेशेन त्याज्यस्तादृङ्महीक्षिता।।३६।।**
**यस्तु सम्यग्विजानाति होरागणितसंहिता :।**
**अभ्यर्च्यः स नरेन्द्रेण स्वीकर्तव्यो जयैषिणा।।३७।।**

यस्तु सम्यक् स्फुटतराः सागमाश्च। होरागणितसंहिताः। त्रिस्कन्धं ज्योतिः शास्त्रं विजानाति। स च नरेन्द्रेण राज्ञा जयैषिणा क्जियमाकाङ्क्षता प्राप्तुमिच्छताऽभ्यर्च्यः सम्पूज्यः। स्वीकर्तव्य आत्मसात्कार्य इति।

विदग्धसांवत्सरिको हितकृद्भवतीत्याह-

**न तत्सहस्त्रं करिणां वाजिनां च चतुर्गुणम्।**
**करोति देशकालज्ञो यथैको दैवचिन्तकः।।३८।।**

राज्ञः करिणां हस्तिनां सहस्त्रं दशशतानि न तत्कार्यं कुर्वन्ति तथा वाजिनामश्वानां चतुर्गुणं चत्वारि सहस्त्राणि न तत् कार्य कुर्वन्ति यथा देशकालज्ञो दैवचिन्कः सांवत्सरिक एक एव कार्य करोति। देशकाललक्षणं प्रागेव व्याख्यातम्। तथा च **भगवान् पराशरः-**

अथाधुना तिथिनक्षत्रश्रवणात् फलमाह-

**दुःस्वप्नदुर्विचिन्तितदुष्प्रेक्षितदुष्कृतानि कर्माणि।**

**क्षिप्रं प्रयान्ति नाशं शशिनः श्रुत्वा भसंवादम्।।३९।।**

**न तथेच्छति भूपतेः पिता जननी वा स्वजनोऽथवा सुहृत्।**

**स्वयशोऽभिविवृद्धये यथा हितमाप्तः सबलस्य दैववित्।।४०।।**

भूपते राज्ञः। सबजलस्य बलसहितस्च। स्वयशोऽभिविवृद्धये आत्मीयकीर्तिवृद्ध्यर्थम्। आप्तः शास्त्रज्ञाततत्वार्थः। दैवविद्दैवज्ञो यथा हितमिच्छति श्रेय आकाङ्क्षते। तथा न पिता जनक इच्छति न जननी माता न स्वजनो बन्धुजनो न सुहृन्मित्रं तथा हितमिच्छतीति।।